March 1928.

THE

CHOWKHAMBÂ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 363.

याज्ञवल्क्यस्मृतिः ।

श्रीमित्रमिश्रकृत 'वीरमित्रोदय' टीकया श्रीविज्ञानेश्वरकृत-'मिताक्षरा' टीकया च सहिता ।

साहित्याचार्य-खिस्ते नारायणशास्त्रिणा

साहित्योपाध्याय-होशिङ्ग जगन्नाथशास्त्रिणा च संशोधिता ।

YĀJÑAVALKYA SMṚTI

With the Commentary of Mitra Mis'ra's Vīramitrodaya and Vijnānes'vara's Mitākṣarā.

Edited By

Pt. Nārāyaṇa S'āstrī Khiste Sāhityāchārya, Assistant Librarian, and
Pt. Jagannātha S'āstrī Hos'iṅga Sāhityopādhyāya, Sādholāl Scholar,
Sarasvatī Bhavana, Benares.

FASCICULUS VI-६

PRINTED-PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE,
Vidya Vilas Press, North of Gopal Mandir, Benares.

1927

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितमध्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तवकः—३६३

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 Otto Harrassowitz, Leipzig:
GERMANY.

3 The Oriental Book-supplying Agency.
POONA.

ऽकृतश्चेति । साक्षित्वेन निरूपितः कृतः । अनिरूपितोऽकृतः । तत्र कृतः पञ्चविधोऽकृतश्च षड्विध इत्येकादशविधः । यथाह नारदः- 'एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः । कृतः पञ्चविधो ज्ञेयः षड्विधोऽकृत उच्यते' ॥ इति । तेषां च भेदस्तेनैव दर्शितः- 'लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च । गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधः स्मृतः' इति ॥ लिखितादीनां च स्वरूपं कात्यायनेनोक्तम्-'अर्थिना स्वयमानीतो यो लेख्ये संनिवेश्यते । स साक्षी लिखितो नाम स्मारितः पत्रकादृते' ॥ इति । स्मारितः पत्रकादृत इत्यस्य विवरणं तेनैव कृतम्-'यस्तु कार्यप्रसिद्ध्यर्थं दृष्ट्वा कार्यं पुनः पुनः । स्मार्यते ह्यर्थिना साक्षी स स्मारित इहोच्यते' ॥ इति । यस्तु यदृच्छयागतः साक्षी क्रियते स यदृच्छाभिज्ञः । अनयोः पत्रानारूढत्वेऽपि भेदस्तेनैव दर्शितः-'प्रयोजनार्थमानीतः प्रसङ्गादागतश्च यः । द्वौ साक्षिणौ त्वलिखितौ पूर्वपक्षस्य साधकौ' ॥ इति । तथा । 'अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् । यः (१)श्राव्यते स्थितो गूढो गूढसाक्षी स उच्यते' ॥ इति । तथा-'साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते । श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः' ॥ इति । षड्विधस्याप्यकृतस्य भेदो नारदेन दर्शितः-'ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम् । कार्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः ॥ कुल्याः कुलविवादेषु विज्ञेयास्तेऽपि साक्षिणः' । इति । प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणार्थम्-'लेखकः प्राड्विवाकश्च (२)सभ्याश्चैवानुपूर्वशः । नृपे पश्यति तत्कार्यं साक्षिणः समुदाहृताः' ॥इति॥ तेऽपि साक्षिणः कीदृशाः कियन्तश्च भवन्तीत्यत आह—

तपस्विन इति । त्र्यवरा इति च । तपस्विनस्तपःशीलाः । दानशीला दाननिरताः । कुलीना महाकुलप्रसूताः । सत्यवादिनः स(३)त्यवदनशीलाः । धर्मप्रधानाः नार्थकामप्रधानाः । ऋजवोऽकुटिलाः । पुत्रवन्तो विद्यमानपुत्राः । धनान्विता बहुसुवर्णादिधनयुक्ताः । श्रौतस्मार्तक्रियापराः नित्यनैमित्तिकानुष्ठा(४)नरताः एवंभूताः पुरुषास्त्र्यवराः साक्षिणो भवन्ति । त्रयः अवरा न्यूना येषां ते त्र्यवराः त्रिभ्योऽर्वाक् न भवन्ति । परतस्तु यथाकामं भवन्तीत्यर्थः । जाति-

---

(१) श्रावितः ख. । (२) सभ्यैश्चैव. ग. ।
(३) सत्यवादन ख. । (४) ष्ठानपराः ग. ।

मनतिक्रम्य यथाजाति । जातयो मूर्धावसिक्ताद्याः अनुलोमजाः प्रतिलोमजाश्च । तत्र मूर्धावसिक्तानां मूर्धावसिक्ताः साक्षिणो भवन्ति । एवमम्बष्ठादिष्वपि द्रष्टव्यम् । वर्णमनतिक्रम्य यथावर्णम् । वर्णा ब्राह्मणादयः । तत्र ब्राह्मणानां ब्राह्मणा एवोक्तलक्षणा उक्तसंख्याकाः साक्षिणो भवन्ति । एवं क्षत्रियादिष्वपि द्रष्टव्यम् । तथा स्त्रीणां साक्ष्यं स्त्रिय एव कुर्युः । यथाह मनुः (८ । ६८)-'स्त्रीणां साक्ष्यं स्त्रियः कुर्युः' इति । सजातिसवर्णासम्भवे सर्वे मूर्धावसिक्तादयो ब्राह्मणादयश्च सर्वेषु मूर्धावसिक्तादिषु ब्राह्मणादिषु च यथासम्भवं साक्षिणो भवन्ति । उक्तलक्षणानां साक्षिणामसम्भवे प्रतिषेधरहितानामन्येषामपि साक्षित्वप्रतिपादनार्थमसाक्षिणो वक्तव्याः । ते च पञ्चविधा नारदेन दर्शिताः—'असाक्ष्यपि हि शास्त्रेषु दृष्टः पञ्चविधो बुधैः । वचनाद्दोषतो भेदात्स्व(१)यमुक्तिर्मृतान्तरः' ॥ इति । के पुनर्वचनात् असाक्षिण इत्यत आह-'श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः। असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः' ॥ इति । तापसा वानप्रस्थाः । आदिशब्देन पित्रा विवदमानादीनां ग्रहणम् । यथाह शङ्खः-'पित्रा विवदमानगुरुकुलवासिपरिव्राजकवात(२)प्रस्थनिर्ग्रन्था असाक्षिणः' इति । दोषादसाक्षिणो दर्शिताः-'स्तेनाः साहसिकाश्चण्डाः कितवा वञ्च(३)कास्तथा । असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यते' ॥ इति । चण्डाः कोपनाः । कितवा द्यूतकृतः । भेदादसाक्षिणां च स्वरूपं तेनैव दर्शितम्-'साक्षिणां लिखितानां च निर्दिष्टानां च (४)वादिना । तेषामेकोऽन्यथावादी भेदात्सर्वे न (५) साक्षिणः' ॥ इति तथा स्वयमुक्तिस्वरूपं चोक्तम्—'स्वयमुक्ति(६)रनिर्दिष्टः स्वयमेवैत्य यो वदेत् । सूचीत्युक्तः स शास्त्रेषु न स साक्षित्वमर्हति' ॥ इति । मृतान्तरस्यापि लक्षणमुक्तम्—'योऽर्थः श्रावयितव्यः स्यात्तस्मिन्नसति चार्थिनि । क तद्वदतु साक्षित्वमित्यसाक्षी मृतान्तरः' ॥ इति । येनार्थिना प्रत्यर्थिना वा साक्षिणां योऽर्थः श्रावयितव्यो भवेद्यूयमत्रार्थे साक्षिण इति तस्मिन्नर्थिनि प्रत्यर्थिनि

(१) स्वयमुक्तिर्मृतान्तरम् घ. स्वयमुक्तेः ख. ।
(२) वानप्रस्था निर्ग्रन्थाश्रमा ख. निर्ग्रन्था निगडस्था ग. ।
(३) वधकास्तथा ग. । (४) वादिनां इति सर्वत्र पाठः. ।
(५) सर्वे असाक्षिणः घ । (६) मुक्तिर्हि निर्दिष्ट ग. ।

वा असति मृतेऽर्थे चानिवेदिते, (१)साक्षी क कस्मिन्नर्थे कस्य वा कृते साक्ष्यं वदत्विति मृतान्तरः साक्षी न भवति । यत्र तु मुमूर्षुणा स्वस्थेन वा पित्रा पुत्रादयः श्राविता अस्मिन्नर्थेऽमी साक्षिण इति तत्र मृतान्तरोऽपि साक्षी । यथाह नारदः—'मृतान्तरोऽर्थिनि प्रेते मुमूर्षुश्राविताद्दते' । तथा—'श्रावितोऽनातुरेणापि यस्त्वर्थो धर्मसंहितः । मृतेऽपि तत्र (२)साक्षी स्यात् षट्सु चान्वाहितादिषु' ॥इति॥६८-६९॥

स्त्रीबालेति । पतितेति च । स्त्री प्रसिद्धा । बालोऽप्राप्तव्यवहारः । वृद्धोऽशीतिकावरः । वृद्धग्रहणं वचननिषिद्धानामन्येषामपि श्रोत्रियादीनामुपलक्षणार्थम् । कितवोऽक्षदेवी । मत्तः पानादिना । उन्मत्तो (३)ग्रहाविष्टः । अभिशस्तोऽभियुक्तो ब्रह्महत्यादिना । रङ्गावतारी चारणः । पाखण्डिनो निर्ग्रन्थप्रभृतयः । कूटकृत्कपटलेख्यादिकारी । विकलेन्द्रियः श्रोत्रादिरहितः । पतितो ब्रह्महादिः । आप्तः सुहृत् । अर्थसम्बन्धी विप्रतिपद्यमानार्थसम्बन्धी । सहाय एककार्यः । रिपुः शत्रुः । तस्करः स्तेनः । साहसी (४)बलावष्टम्भकारी । दृष्टदोषो दृष्टवि(५)रुद्धवचनः । निर्धूतो बन्धुभिस्त्यक्तः । आद्यशब्दादन्येषामपि स्मृत्यन्तरोक्तानां दोषादसाक्षिणां भेदादसाक्षिणां स्वयमुक्तेर्मृतान्तरस्य च ग्रहणम् । एते स्त्रीबालादयः साक्षिणो न भवन्ति ॥ ७०-७१ ॥

(मिता०) त्र्यवराः साक्षिणो ज्ञेया इत्यस्यापवादमाह—

उभयेति । ज्ञानपूर्वकनित्यनैमित्तिककर्मानुष्ठायी धर्मवित्, स एकोऽप्युभयानुमतश्चेत्साक्षी भवति । अपि(६)शब्दबलाद्द्वावपि । यद्यपि—'श्रौतस्मार्तक्रियापराः' इति त्र्यवराणामपि धर्मवित्त्वं समानं तथापि तेषामुभयानुमत्यभावेऽपि साक्षित्वं भवति । एकस्य द्वयोर्वोभयानुमत्यैव साक्षित्वं भवतीत्यर्थवत् त्र्यवरग्रहणम् ॥

(मिता०) तपस्विनो दानशीला इत्यस्यापवादमाह—

सर्वे इति । सङ्ग्रहणादीनि वक्ष्यमाणलक्षणानि । तेषु सर्वे वचननिषिद्धास्तपःप्रभृतिगुणरहिताश्च साक्षिणो भवन्ति । दोषादसाक्षि-

---

(१) साक्षित्व कस्मिन्नर्थे ख. ।
(२) साक्षात्स्यात् ख. । (३) भूताविष्टः. ग. ।
(४) स्ववला ख. । (५) दृष्टवितथवचनः ख. ।
(६) अपिशब्दाद्द्वावपि ग. घ. । (७) त्यर्थे च त्र्यवर ग. ।

णो भेदादसाक्षिणः स्वयमुक्तिश्चात्रापि साक्षिणो न भवन्ति (१)सत्याभावादिति हेतोरत्रापि विद्यमानत्वात्। 'मनुष्यमारणं चौर्यं परदाराभिमर्शनम्। पारुष्यमुभयं चेति साहसं स्याच्चतुर्विधम्' ॥ इति वचनाद्यद्यपि 'स्त्रीसङ्ग्रहणचौर्यपारुष्याणां साहसत्वं तथापि तेषां स्वबलावष्टम्भेन जनसमक्षं क्रियमाणानां साहसत्वम्। रहसि क्रियमाणानां तु सङ्ग्रहणादिशब्दवाच्यत्वमिति तेषां साहसात्पृथगुपादानम् ॥ ७२ ॥

(वी० मि०) अथ यथा साक्षिणः प्रष्टव्यास्तदाह—

साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान् ॥
ये च (२)पापकृतां लोका महापातकिनां तथा ॥ ७३ ॥
अग्निदानां तु ये लोका ये च स्त्रीबालघातिनाम् ॥
एतान् सर्वान् समाप्नोति यः साक्ष्यमनृतं वदेत् ॥ ७४ ॥
सुकृतं यत्त्वया किञ्चिज्जन्मान्तरशतैः कृतम् ॥
तत्सर्वं तस्य जानीहि यं पराजयसे मृषा ॥ ७५ ॥

साक्ष्यनिगदार्थमुपस्थितान् वादिप्रतिवादिसमीपस्थान् विचारक एवेत्यादिवक्ष्यमाणं श्रावयेत्। पापकृताम्-अत्र विशिष्यानुक्तपापस्य कर्तॄणां लोका रौरवादीनि स्थानानि। अग्निदानां सस्यपूर्णक्षेत्रभाण्डागारादौ द्वेषेणाग्निप्रक्षेपकाणां साक्ष्यं साक्षिवक्तव्यमनृतं अयथार्थं यो वदेत् स एतान् सर्वान् लोकानवाप्नोति। तथापदेनोपपातकिनां, चकारैरतिपातकिविपदातृगर्भहन्तॄणां समुच्चयः। 'शूद्रं सर्वैस्तु पातकै'रिति वचनाच्छूद्रे साक्षिणि शपथमधिकृत्याह सुकृतमिति। जन्मान्तरशतैर्यत्किञ्चित्त्वया सुकृतं पुण्यं सर्वं नक्ष्यतीत्यर्थः। नारदः—

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥

सत्यं वदेति विप्रं सत्यमिदमित्यपि धनरूपं शपथं कारयेत। इदं तु मध्यविधिब्राह्मणपरम्। 'स येनैकेन सत्यकर्म तदेव ब्राह्मणस-

---

(१) सत्यवादित्वहेतो· ख. ।

(२) 'ये पातककृतां'-इति मुद्रित पुस्तके पाठः ।

सदि स्यादब्राह्मणाना'मिति गौतमवचनात् । एकेनेति गुणवत्परं, तेन वाहनायुधैरित्यादिबहुवचनसङ्गतिः । वाहनमश्वादिकं, आयुधं खड्गादि तत्स्पर्शरूपं शपथं कारयेत् । गोवीजस्य कृषिमूलभूतस्य काञ्चनस्य स्पर्शेन वैश्यं शापयेत् । शूद्रमिति सुकृतमित्यादौ विचारके श्राविते सर्वाणि पातकानि मृषा वादे मम स्युरिति वादयेदित्यर्थः । तुशब्देन त्रैवर्णिकशपथानां व्यवच्छेदः ।

ब्रूहीति ब्राह्मणं पृच्छेत्सत्यं ब्रूहीति पार्थिवम् ।

तथा—

गोरक्षकान् वाणिजकान् तथा कारुकुशीलवान् ।
प्रेष्यान्वार्द्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत् ॥

शूद्रवदाचरेत् शूद्रमिव शपथं कारयेत् । क्षत्रियशपथयोर्गुणवन्निर्गुणभेदेन व्यवस्था बोध्या । शङ्खलिखितौ–'पुत्रपौत्रैर्यथावर्णं परिग्रहविशेषः स्याद्देवब्राह्मणस्वामिनामग्रतः पुत्रपौत्रशिरःस्पर्शनेन शापयेत्' । यस्य वर्णस्य यद्द्रव्यस्पर्शनेन शपथः स्मृत्यन्तरेऽभिहितस्तेन स एव शपथः कार्य इत्यर्थः ॥ ७३-७५ ॥

(मिता०) साक्षिश्रावणमाह—

साक्षिण इति । अर्थिप्रत्यर्थिसंनिधौ साक्षिणः समवेतान्–'नासमवेताः पृ(१)ष्टाः प्रब्रूयुः' इति गौतमवचनात् वक्ष्यमाणं श्रावयेत् । तत्रापि कात्यायनेन विशेषो दर्शितः–'सभान्तः साक्षिणः सर्वानर्थिप्रत्यर्थिसंनिधौ । प्राड्विवाको नियुञ्जीत विधिनानेन सान्त्वयन् ॥ देवब्राह्मणसांनिध्ये साक्ष्यं पृच्छेदृतं द्विजान् । उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुचीन् ॥ आहूय साक्षिणः पृच्छेन्नियम्य शपथैर्भृशम् । समस्तान्विदिताचारान्विज्ञातार्थान्पृथक्पृथक्' ॥ इति । तथा ब्राह्मणादिषु श्रावणे मनुना नियमो दर्शितः (८ । ११३)–'सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः । गोवीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः' । इति । ब्राह्मणमन्यथा ब्रु(२)वतः सत्यं ते नश्यतीति शापयेत् । क्षत्रियं वाहनायुधानि तव विफलानीति । गोवीजकाञ्चनादीनि तव विफलानि भविष्यन्तीति वैश्यम् । शूद्रमन्यथा ब्रुवतस्तव सर्वाणि पातकानि भविष्यन्तीति शापयेत् । अत्र चापवादस्तेनैव दर्शितः–(८ । १०२)—'गोरक्षकान्वाणिजकांस्तथा कारुकुशी-

(१) पृथगपृष्टाः ग० । (२) ब्रुवन्तं घ० ।

लवान् । प्रेष्यान्वार्धुषिकांश्चैव विप्राञ्शूद्रवदाचरेत्' । इति ॥ विप्रग्रहणं क्षत्रियवैश्ययोरुपलक्षणार्थम् । कुशीलवा गायकाः । प्रतिवादिना साक्षिदूषणे दत्ते प्रत्यक्षयोग्यदूषणेषु वालयादिषु तथैव निर्णयः । अयोग्येषु तु तद्वचनाल्लोकतश्च निर्णयो न साक्ष्यन्तरेणेति नानवस्था । यदि साक्षिदोषमुद्भाव्य साधयितुं न शक्नोति प्रतिवादी तदासौ (१)सारानुसारेण दण्ड्यः । अथ साधयति तदा न साक्षिणः । यथाह—'असाध(२)यन्दमं दाप्यो दूषणं साक्षिणां स्फुटम् । भाविते साक्षिणो वर्ज्याः साक्षिधर्मनिराकृताः' । इति । उद्दिष्टेषु च सर्वेषु साक्षिषु दुष्टेष्वर्थी यदा क्रियान्तरनिरपेक्षस्तदा पराजितो भवति । 'जितः स विनयं दाप्यः शास्त्रदृष्टेन कर्मणा । यदि वादी निराकाङ्क्षः साक्षिसत्ये व्यवस्थितः' ॥ इति स्मरणात् । साकाङ्क्षश्चेत्क्रियान्तरमवलम्बेतेत्यभिप्रायः ॥

(मिता०) कथं श्रावयेदित्यत आह—

ये पातककृतामित्यादि । पातकोपपातकमहापातककारिणामग्निदानां स्त्रीबालघातिनां च ये लोकास्तान्सर्वानसावाप्नोति यः साक्ष्यमनृतं वदति । तथा जन्मान्तरशतैर्यत्सुकृतं कृतं तत्सर्वं तस्य भवति (३)यस्तेऽनृतवदनेन पराजितो भवतीति श्रावयेदिति सम्बन्धः । एतच्च शूद्रविषयं द्रष्टव्यम्—'शूद्रं सर्वैस्तु पातकैः' इति शूद्रे सर्वपा(४)तकश्रावणस्य विहितत्वात् । गोरक्षकादिद्विजातिविष(५)यं च 'गोरक्षकान्वाणिजकान्' इत्युक्तत्वात् । अ(६)न्यस्यानेकजन्मार्जितसुकृतसंक्रमणस्य महापातकादिफलप्राप्तेश्चानृतवचनमात्रेणानुपपत्तेः साक्षिसंत्रासार्थमिदमुच्यते । यथाह नारदः—'पुराणैर्धर्मवचनैः सत्यमाहात्म्यकीर्तनैः । अनृतस्यापवादैश्च (७)भृशमुत्रासयेदिमान्' ॥ इति ॥ ७३-७४-७५ ॥

(वी० मि०) साक्षिणां निर्णीतार्थानभिधायिनां दोषमाह—

अब्रुवंस्तु(८)नरः साक्ष्यमृणं सदशबन्धकम् ॥
राज्ञा सर्वं प्रदाप्यः स्यात् षट्चत्वारिंशकेऽहनि ॥ ७६ ॥

---

(१) दोषानुसारेण ख० ।
(२) असाधयन् अभावयन् । (३) यस्तेऽनृतवचनेन ग० यस्तेनोऽनृतवदनेन घ० ।
(४) श्रवणस्य घ० । (५) विहितं च—घ० । (६) अन्यानेक० ख० ।
(७) भृशं संत्रासयेत् ग० । (८) अब्रुवन्हि-इति मुद्रितपुस्तके पाठः ।

न ददाति हि यः साक्ष्यं जानन्नपि नराधमः ॥
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि ॥ ७७ ॥

वध्यते राज्ञे देयत्वेन व्यवस्थाप्यते इति बन्धो दशांशरूपो जेतृदेयो दशबन्धस्तत्सहितमृणं सर्वं सवृद्धिकं जान(१)न्नपि साक्ष्यमब्रुवन्नरो राज्ञा षट्चत्वारिंशके दिवसे दाप्यः स्यात्। तुशब्देन षट्चत्वारिंशद्दिनात्पूर्वं दानं व्यवच्छिद्यते। ननु मिथ्यानभिधानात् कथं स दाप्य इत्यतस्तस्य मिथ्याभिधायितुल्यत्वमाह—न ददातीति। हि निश्चितं जानन्नपि यः साक्ष्यं न ददाति न भाषते स नराधमः कूटसाक्षिणां मिथ्यासाक्ष्याभिधायिनां पापैः राजग्राह्यदण्डेन दातव्येन च तुल्यो, हि यतस्ततस्तद्ग्रहणमपि दाप्य इत्यर्थः। कूटसाक्षिदण्डश्च वक्ष्यते। चकारेण लोकनिन्द्यत्वसमुच्चयः। एवकारेण पूर्वश्लोकोक्तरक्तदण्डसमुच्चयं व्यवच्छिनत्ति, तेन दशबन्धकमृणं दाप्यः। बहुधनत्वे तु वक्ष्यमाण एव तस्य दण्ड इति। दण्डान्तरं तु विषयान्तरे व्यवस्थापयिष्यते। वादिनाऽवधिं कृत्वाह बृहस्पतिः—

साक्षिणस्तु समुद्दिश्य यस्तु तान्न निगादयेत्।
त्रिंशद्दिनात् त्रिपक्षाद्वा हानिस्तस्योपजायते॥

वाकारो लघुगुरुविवादपदविषये व्यवस्थितविकल्पार्थः। तथा—

आचारकरणे दिव्ये कृत्वोपस्थाननिर्णयम्।
नोपस्थितो भवेद्वादी छलं तत्र न कारयेत्॥
देवराजकृतो दोषस्तस्मिन् काले यदा भवेत्।
अवधित्यागमात्रेण न भवेत्स पराजितः॥

न कारयेत् निरस्येदित्यर्थः। अत्र पराजित इत्यभिधानात्पूर्वं हानिपदं भङ्गपरमित्येके। व्यवहारे छलस्य निरस्यत्वान्न निगदनमात्रेण भङ्गः, उपन्यस्तानामपि साक्षिणां मध्ये दोषनिश्चयसम्भवात्। किन्तु निगदकपक्षेऽनुत्कटकोटिकः संशय इत्यपरे॥ ७६-७७॥

(मिता०) यदा तु श्रावितः साक्षिणः कथञ्चिन्न ब्रूयुस्तदा किं कर्तव्यमित्यत आह—

अब्रुवन्निति। यः साक्ष्यमङ्गीकृत्य श्रावितः सन् कथंचिन्न वदाति स राज्ञा सर्वं सवृद्धिकमृणं धनिने दाप्यः। सदशबन्धकं दशमांशसहि-

(१) राजन्नपि-इति क०ख० पुस्तकयोः पाठः।

तम्। दशमांशश्च राज्ञो भवति। 'राज्ञाधमर्णिको दाप्यः साधिताद्दशकं शतम्' इत्युक्तत्वात्। एतच्च षट्चत्वारिंशकेऽहनि प्राप्ते वेदितव्यम्। ततोऽर्वाग्वदन्न दाप्यः। इदं च व्याध्याद्युपप्लवरहितस्य। यथाह मनुः (८।१०७)—'त्रिपक्षादब्रुवन्साक्ष्यमृणादिषु नरोऽगदः। तदृणं प्राप्नुयात्सर्वं दशबन्धं च सर्वशः'॥ इति। अगद इति राजदैवोपप्लवविरहोपलक्षणम्॥ ७६॥

(मिता०) यस्तु जानन्नपि साक्ष्यमेव नाङ्गीकरोति दौरात्म्यात्तं प्रत्याह—

नेति। यः पुनर्नराधमो विप्रतिपन्नमर्थं विशेषतो जानन्नपि साक्ष्यं न ददाति नाङ्गीकरोति स कूटसाक्षिणां तुल्यः पापैः कृत्वा दण्डेन च। कूटसाक्षिणां दण्डं वक्ष्यति। कूटसाक्षिणश्च दण्डयित्वा पुनर्व्यवहारः प्रवर्तनीयः। (१)कृतोऽपि वा कौटसाक्ष्ये विदिते निवर्तनीयः। यथाह मनुः (८।११७)—'यस्मिन्यस्मिन्विवादे तु कौटसाक्ष्यं कृतं भवेत्। तत्तत्कार्यं निवर्तेत कृतं चाप्यकृतं भवेत्'॥ इति॥ ७७॥

(वी०मि०) अथ साक्ष्युक्तिविधिः। तत्र कात्यायनः—

सभान्तःस्थैस्तु वक्तव्यं साक्ष्यं(२) नान्यत्र साक्षिभिः।
सर्वसाक्ष्येष्वयं धर्मोऽन्यत्र स्यात् स्थावरेषु च॥
वधे च (३) प्राणिनां साक्ष्यं वादयेच्छत्रसन्निधौ।
तदभावे तु चिन्हस्य नान्यथैव प्रवादयेत्॥
अनुद्विग्नेन चित्तेन दृष्टं सम्यग्यदा तु यत्।
प्रत्यक्षं तत्स्मृतं कार्यं साक्ष्यं साक्षी तु तद्वदेत्॥

तथा—

अप्राक्य आगमो यत्र विदेशप्रतिवादिनाम्।
त्रैविद्यप्रहितं तत्र ले(४)ख्यं साक्ष्यं प्रदापयेत्॥

कात्यायनः—

समवेतैस्तु यद् दृष्टं वक्तव्यं तत्तथैव हि।
विभिन्ने नैककार्ये तु तद्वक्तव्यं पृथक् पृथक्॥

---

(१) कृतेऽपि कौटसाक्ष्ये घ०।
(२) साक्ष्ये-इति ख० पु० पाठः।
(३) वधेति-इति ख० पु० पाठः।
(४) लेख्यं इति क० ख० पुस्तकयोः पाठः।

भिन्नकाले तु यत्कार्यं विज्ञातं तत्र साक्षिभिः।
एकैकं वादयेत्तत्र भिन्नकाले तु तद्भृगुः॥

नैककार्यमनेककार्यम्। यथा—

स्वभावोक्तं वचस्तेषां ग्राह्यं यद्दोषवर्जितम्।
उक्तेषु साक्षिणो राज्ञा न प्रष्टव्याः पुनः पुनः॥

पृष्टानां साक्षिणां वचनद्वैधे कथं कार्यमित्याह—

द्वैधे बहूनां वचनं समेषु गुणिनां तथा॥
गुणिद्वैधे तु वचनं ग्राह्यं ये गुण(१)वत्तराः॥ ७८॥

साक्षिणामेकतरवादिनिगादितानामुभयवादिनिगादितानां वा द्वैधे तु परस्परविरुद्धार्थाभिधायित्वे बहूनां विरुद्धाभिधायिसाक्ष्यपेक्षयाऽधिकानां साक्षिणां वचनं ग्राह्यम्। यत्र गुणिनः समसङ्ख्याश्च उभयत्र कोटौ साक्षिणः तत्र विरुद्धाभिधायिसाक्ष्यपेक्षया ये गुणवत्तरास्तेषां वचनं ग्राह्यम्। तुशब्देन ग्राह्यविपरीतवचनस्य ग्राह्यत्वं व्यवच्छिद्यते। यत्र वादिनोः साक्षिद्वैधे सर्वथा साम्यं तत्र 'साक्षिषूभयतः सत्स्व'त्यादिना प्राग्व्यवस्था कृता। स्वसाक्षिणामेव परस्परद्वैधे सर्वथा च साम्ये मानान्तरमनुसरणीयमिति मिश्राः। अथ—

लिखितानां साक्षिणां च निर्दिष्टानां च वादिना।
तेषामेकोऽन्यथावादी भेदात्सर्वेऽप्यसाक्षिणः॥

इति कात्यायनवचनेनैकस्याप्यन्यथाभिधाने सर्वेषामसाक्ष्यमुच्यत इति विरोध इति केचित्। नये त्रयाणां मध्ये एकस्याऽन्यथावादे अपरस्य तत्तुल्यसत्प्रतिपक्षिततया तृतीयस्य चैकतया तत्र साक्षितो न निर्णय इति कात्यायनतात्पर्यात्। तत्प्रतिपक्षितावशिष्टानां त्वनेकत्वे तत एव निर्णय इति प्रकृतग्रन्थतात्पर्यात्॥ ७८॥

(मिता०) साक्षिविप्रतिपत्तौ कथं निर्णय इत्यत आह—

द्वैध इति। साक्षिणां द्वैधे विप्रतिपत्तौ बहूनां वचनं ग्राह्यम्। समेषु समसंख्येषु द्वैधे ये गुणिनस्तेषां वचनं प्रमाणम्। यदा पुनर्गुणिनां विप्रतिपत्तिस्तदा ये गुणवत्तमाः श्रुताध्ययनतदर्थानुष्ठानधनपुत्रादिगुणसंपन्नास्तेषां वचनं ग्राह्यम्। (२)यत्र तु गुणिनः कतिपये इतरे च बहवस्तत्रापि गुणिनामेव वचनं ग्राह्यम्। 'उभयानुमतः

(१) गुणवत्तमाः—इति मुद्रितपुस्तके पाठः। (२) यत्र गुणिनः घ०।

साक्षी भवत्येकोऽपि धर्मवित्' इति गुणातिशयस्य मुख्यत्वात् । यत्तु भेदादसाक्षिण इत्युक्तं तत्सर्वसाम्येनागृह्यमाणविशेषविषयम् ॥७८॥

(वी० मि०) यादृशं साक्ष्यभिधानं जये पराजये वा हेतुस्तदाह—

सत्यां प्रतिज्ञां यस्योचुः(१) साक्षिणः स जयी भवेत् ॥
अन्यथावादिनो यस्य (२)ध्रुवं तस्य पराजयः ॥ ७९ ॥

यस्य वादिनः प्रतिज्ञां साक्षिणः सत्यां ब्रूयुर्यथार्थत्वेन वदन्ति स वादी जयी भवेत् । अन्यथावादिनः प्रतिज्ञाया असत्यत्ववादिनो यस्य साक्षिणस्तस्य ध्रुवं निश्चितं पराजय इत्यर्थः । केचित्तु यस्य वादिनः साक्षिणो यथा सत्यत्वानभिधायिन इत्यर्थमाहुः, तदयुक्तं धर्मव्यवहारे छलस्य निरस्यतयाऽनभिधानमात्रेण पराजयासंभवादिति दिक् । अत्र साक्षिणाऽभिहितेऽप्यर्थे सप्ताहमध्ये तस्य रोगादिसम्भवे निगादयितुर्न जयः ।

यस्य दृश्येत सप्ताहादुक्तसाक्ष्यस्य साक्षिणः ।
रोगोऽग्निर्ज्ञातिमरणं ऋणं दाप्यो दमं च सः ॥

इति नारदवचनात् । साक्षिनिगदे व्यासः—

कालाकृतिवयोद्रव्यदेशजातिप्रमाणतः ।
अन्यूनं चेन्निगदितं सिद्धं साध्यं विनिर्दिशेत् ॥

बृहस्पतिः—

यस्याऽशेषं प्रतिज्ञातं साक्षिभिः प्रतिपादितम् ।
स जयी स्यादन्यथा तु साध्यर्थं न समाप्नुयात् ॥

अन्यथाऽशेषप्रतिज्ञातप्रतिपादनाभावे । अयं च द्वेधा सम्भवति अनभिधाने,ऽपेक्षितानभिधाने च । अन्त्योऽपि चतुर्विधः न्यूनाभिधानेऽधिकाभिधाने स्वाज्ञानाभिधाने विरुद्धपक्षाभिधाने च । तत्र सर्वत्र प्रकृतसाध्यस्यासिद्धिः । किं तु प्रथमतुर्ययोः प्रमाणान्तरमनुसरणीयं, न तु तावतैव तद्भङ्गनिर्णयः ॥

अथ निगदाः । तत्र नारदः—

निर्दिष्टेष्वर्थजातेषु साक्षी साक्ष्यत्वमागतः ।
न ब्रूयादक्षरसमं तन्नैव गदितं भवेत् ॥

यत्र द्रव्यं निगदति सङ्ख्यांशे मुह्यते तत्र सङ्ख्यांशे प्रमाणमनु-

(१) ध्रुवस्तस्य—इति मुद्रितपुस्तके पाठः ।

सरणीयमित्येके । द्रव्यांशेऽपि क्रियान्तरमिति सम्प्रदायः । तथा—

न्यूनमभ्यधिकं वापि प्रब्रूयुर्यस्य साक्षिणः ।
तदप्यनुक्तं विज्ञेयमेष साक्षिविधिः स्मृतः ॥

शत आक्षिप्ते शतद्वयाभिधानमसत्यत्वनिश्चयादनुक्तप्रायम् । न हि संभवति आहाराभ्यासवतो वादिनः साक्षिस्मर्यमाणविस्मरणम् । पञ्चाशदभिधानं तु तदतिरिक्तभागेऽनुक्तप्रायम् । उक्तभागे तु निर्णायकमेवेति मिश्राः । स्मृतिसारादयस्तु न्यूनाभिधानेन सर्वांशेऽपि क्रियान्तरमित्याहुः । श्रुतसाक्षी तु पृष्टो यत्राऽहमिममर्थमश्रौषमिति वदति तत्र नार्थसिद्धिः शब्दार्थयोर्व्याप्त्यभावात् । किं तु प्रत्यक्षादिव शब्दादप्यवधारितमर्थमेव यत्र निगदति तत्रार्थसिद्धिः । शब्दस्याप्रामाण्यशङ्काकलङ्के तु न स साक्षी भवतीति दिक् ॥ ७९ ॥

(मिता०) साक्षिभिश्च कथमुक्ते जयः कथं वा पराजय इत्यत आह—

यस्येति । यस्य वादिनः प्रतिज्ञां द्रव्यजातिसंख्यादिविशिष्टां साक्षिणः सत्यां वदन्ति सत्यमेवं जानीमो वयमिति स जयी भवति । यस्य पुनर्वादिनः प्रतिज्ञामन्यथा वैपरीत्येन मिथ्यैतदिति वदन्ति तस्य पराजयो ध्रुवो निश्चितः । यत्र तु प्रतिज्ञातार्थस्य विस्मरणादिना भावाभावौ साक्षिणो न प्रतिपादयन्ति तत्र प्रमाणान्तरेण निर्णयः कार्यः । न च राज्ञा साक्षिणः पुनः पुनः प्रष्टव्याः । स्वभावोक्तमेव वचनं ग्राह्यम् । यथाह—'स्वभावोक्तं वचस्तेषां ग्राह्यं यद्दोषवर्जितम् । उक्ते तु साक्षिणो राज्ञा न प्रष्टव्याः पुनः पुनः' ॥ इति ॥ ७९ ॥

(वी० मि०) युगपदुपस्थितानां साक्षिणां द्वैधे बलाबलमुक्तमिदानीं क्रमेणोपस्थितौ तदाह—

उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्त(१)राः ॥
द्विगुणा वाऽन्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः ॥ ८० ॥

साक्षिभिः साक्ष्य उक्तेऽपि तत्साक्ष्यपेक्षया उत्कृष्टगुणाः पूर्वमुपन्यस्ता अन्ये समसंख्या अपि द्विगुणा वा साक्षिणो यद्यन्यथा पूर्वसाक्षिविपरीतं ब्रूयुस्तदा पूर्वसाक्षिणः कूटा असत्यवादित्वेन निर्णेयाः स्युः । वाकारेण यदृच्छावाचिना संख्याधिक्यमात्रं व्यवस्थितम् । इदं तु जयावधारणात्प्राक् ।

(१) गुणवत्तमाः—इति मुद्रितपुस्तके पाठः ।

क्रियां बलवतीं त्यक्त्वा दुर्बलां यः समाश्रयेत् ।
स जयेऽवधृते सभ्यैः पुनस्तां नाप्नुयात् क्रियाम् ॥

इति कात्यायनवचनं तु जयोत्तरम् । प्रमाणस्य वैकल्ये त्यक्त्वेति बुद्धिपूर्वकत्यागवाचिना बुद्धिपूर्वं प्रागनुपन्यस्तस्य च वैकल्यं दर्शयतीति निरोधः ॥ ८० ॥

(मिता०) 'अन्यथावादिनो यस्य ध्रुवस्तस्य पराजय' इत्यस्यापवादमाह—

उक्तेऽपीति । पूर्वोक्तलक्षणैः साक्षिभिः साक्ष्ये स्वाभि(१)प्राये प्रतिज्ञातार्थवैपरीत्येनाभिहिते यद्यन्ये पूर्वेभ्यो गुणवत्तमाः द्विगुणा वा अन्यथा प्रतिज्ञातार्थानुगुण्येन साक्ष्यं ब्रूयुस्तदा पूर्वे साक्षिणः कूटा मि(२)थ्यावादिनो भवेयुः । नन्वेतदनुपपन्नम् , अर्थिप्रत्यर्थिसभ्यसभापतिभिः परीक्षितैः प्रमाणभूतैः साक्षिभिर्निगदिते प्रमाणान्तरान्वेषणेऽनवस्थादोषप्रसङ्गात् । 'निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत् । लिखितं साक्षिणो वापि पूर्वमावेदितं न चेत् ॥ यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः । निर्णिक्तव्यवहाराणां प्रमाणमफलं तथा' ॥ इति नारदवचनाच्च । उच्यते-यदार्थी प्रतिज्ञातार्थस्यान्तरात्मसाक्षित्वेनाऽनाविष्कृतदोषाणामपि साक्षिणां वचनमर्थविसंवादित्वेनाप्रमाणं मन्यमानः साक्षिष्वपि दोषं कल्पयति तदा प्रमाणान्तरान्वेषणं केन वार्यते । उक्तं च—'यस्य च (३)दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीनः' इति । यथा चक्षुरादिकरणदोषाध्यवसायेऽप्यर्थविसंवादात्तज्जनितस्य ज्ञान(४)स्याप्रामाण्येन करणदोषकल्पना तथेहापि । साक्षिपरीक्षातिरेकेण (५)वाक्यपरीक्षोपदेशाच्च-'साक्षिभिर्भाषितं वाक्यं सह सभ्यैः परीक्षयेत् ' इति । कात्यायनेनाप्युक्तम्-'यदा शुद्धा क्रिया न्यायात्तदा तद्वाक्यशोधनम् । शुद्धाच्च वाक्याद्यः शुद्धः स शुद्धोऽर्थ इति स्थितिः' ॥ इति । क्रिया साक्षिलक्षणा 'नार्थसम्बन्धिनो नाप्ताः' इति न्यायाद्यदा शुद्धा तदा तद्वाक्यशोधनं साक्षिवाक्यशोधनं कर्तव्यम् । वाक्यशुद्धिश्च सत्यार्थप्रतिपादनेन-'सत्येन शुध्यते वाक्यम्' इति स्मरणात् । एवं शुद्धायाः क्रियायाः (६)शुद्धवाक्याच्च यः शुद्धोऽवगतोऽर्थः स शु-

(१) स्वाभिप्रायेण प्रतिज्ञा घ. । (२) मिथ्यासाक्षिणो घ. । (३) करणं दुष्टं घ. ।
(४) ज्ञानस्य प्रामाण्य ख. । (५) वाक्यपरीक्षोप घ. । (६) शुद्धाच्च वाक्याद्यः शुद्धो घ. ।

द्धस्तथाभूत इति स्थितिरीदृशी मर्यादा न्यायविदाम् । कारणदोषबाधकप्रत्ययाभावे सत्यवितथ एवार्थ इत्यर्थः । ननु स्वयमर्थिना प्रमाणीकृ(१)तान्साक्षिणोऽतिक्रम्य कथं क्रियान्तरं प्रमाणीक्रियते । नैष दोषः । यतः—'क्रियां बलवतीं मुक्त्वा दुर्बलां योऽवलम्बते । स जयेऽवधृते सभ्यैः पुनस्तां नाप्नुयात्क्रियाम् ' ॥ इति कात्यायनेन जयावधारणोत्तरकालं क्रियान्तरग्रहनिषेधाज्जयावधारणात्प्राक् क्रियान्तरपरिग्रहो दर्शितः । नारदेनापि–'निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत्' इति वदता जयावधारणोत्तरकालमेव प्रमाणान्तरं निषिद्धं न प्रागपि । तस्मादुक्तेऽपि साक्षिभिः साक्ष्येऽपरितुष्यता क्रियान्तरमङ्गीकर्तव्यमिति स्थितम् । एवं स्थिते यथाभिहितवचनेभ्यः साक्षिभ्यो गुणवत्तमाः द्विगुणा वा पूर्वनिर्दिष्टा असन्निहिताः साक्षिणः सन्ति तदा त एव प्रमाणीकर्तव्याः—'स्वभावेनैव यद् ब्रूयुस्तद्ग्राह्यं व्यावहारिकम्' इत्यस्य सर्वव्यवहारशेषत्वात् । 'निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत् । लिखितं साक्षिणो वापि पूर्वमावेदितं न चेत्' ॥ इति नारदवचनाच्च । पूर्वनिर्दिष्टानामसम्भवे त्वनिर्दिष्टा अपि (२)तथाविधाः साक्षिण एव ग्राह्या न दिव्यम् । 'संभवे साक्षिणां प्राज्ञो वर्जयेद्दैविकीं क्रियाम् ' इति स्मरणात् । तेषामसम्भवे दिव्यं (३)प्रमाणीकर्तव्यम् । अतःपरमपरितुष्यताप्यर्थिना न प्रमाणान्तरमन्वेषणी(४)यमवचनादिति परिसमापनीयो व्यवहारः । यत्र तु प्रत्यर्थिनः स्वप्रत्ययविसंवादित्वेन साक्षिवचनस्याप्रामाण्यं मन्यमानस्य साक्षिषु दोषारोपणेनापरितोषस्तत्र प्रत्यर्थिनः क्रियोपन्यासावसराभावात्सप्ताहावधिकदैविकराजिकव्यसनोद्भवेन साक्षिपरीक्षणं कर्तव्यम् । तत्र च दोषावधारणे विवादास्पदीभूतमृणं दाप्याः, सारानुसारेण दण्डनीयाश्च । अथ दो(५)षानवधारणं तदा प्रत्यर्थिना तावता सन्तोष्टव्यम् । यथाह मनुः (८। १०८)–'यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिणः । रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च सः' ॥ इति । एतच्च—'यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्' इत्यस्यापरितुष्यत्प्रत्यर्थिविषयापवादो द्रष्टव्यः । केचित्तु 'उक्तेऽपि साक्षिभिः साक्ष्ये' इत्येतद्वचनमर्थिना निर्दि-

(१) कृताः साक्षिणो ख. । (२) तथाविधा एव साक्षिणो ग्राह्या ख. ।
(३) प्रमाणं कर्तव्यं ख.। (४) मनुवचनात् ख. यमवचनात् घ. । (५) दोषावधारणं ख. ।

ष्टेषु साक्षिष्वर्थानुकूलमभिहितवत्सु यदि प्रत्यर्थी गुणवत्तमान्द्विगुणान्वान्यान्साक्षिणः पूर्वोक्तविपरीतं संवादयति तदा पूर्ववादिनः साक्षिणः कूटा इति व्याचक्षते। तदसत्। प्रत्यर्थिनः क्रियानुपपत्तेः। तथा हि अर्थी नाम साध्यस्यार्थस्य निर्देष्टा, तत्प्रतिपक्षतदभाववादी प्रत्यर्थी तत्राभावस्य भावसिद्धिसापेक्षसिद्धित्वाद्भावस्य (१)चाभावसिद्धिनिरपेक्षसिद्धित्वाद्भावस्यैव साध्यत्वं युक्तम्। अभावस्य(२) स्वरूपेण साक्ष्यादिप्रमेयत्वाभावात्। अतश्चार्थिन एव क्रिया नियता स्मर्यते। 'प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम्। मिथ्योक्तौ पूर्ववादी तु प्रतिपक्तौ न सा भवेत्' ॥ इति। न चैकस्मि(३)न्व्यवहारे द्वयोः क्रिया। 'न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः' इति स्मरणात्। तस्मात्प्रतिवादिनः साक्षिणो गुणवत्तमा द्विगुणा वाऽन्यथा ब्रूयुरित्यनुपपन्नम्। अथ मतम्-यत्र द्वावपि भावप्रतिज्ञावादिनौ मदीयमिदं दायादप्राप्तं मदीयमिदं दायादप्राप्तमिति प्रतिज्ञावादिनोः पूर्वापरकालविभागानाकलितमेव वदतस्तत्र द्वयोः साक्षिषु सत्सु कस्य साक्षिणो ग्राह्या इत्याकाङ्क्षायां—'द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु। पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिणः' ॥ इति वचनेन यः पूर्वं निवेदयति तस्य साक्षिणो ग्राह्या इति स्थिते तस्या(४)पवादः 'उक्तेऽपि साक्षिभिः साक्ष्ये' इति। अतश्च पूर्वोत्तरयोर्वादिनोः समसंख्येषु समगुणेषु साक्षिषु सत्सु पूर्ववादिन एव साक्षिणः प्रष्टव्याः। यदा तु उत्तरवादिनः साक्षिणो गुणवत्तमा द्विगुणा वा तदा प्रतिवादिनः प्रष्टव्याः। एवं च नाभावस्य साध्यता। उभयोरपि भाववादित्वात्, चतुर्विधोत्तरविलक्षणत्वाच्च प्रकृतोदाहरणे न क्रियाव्यवस्था। एकस्मिन्व्यवहारे तु यथैकस्यार्थिनः क्रियाद्वयं परमते तथा वादिप्रतिवादिनोः क्रियाद्वयेऽप्यविरोध इति। तदप्या(५)चार्यो नानुमन्यते—'उक्तेऽपि साक्षिभिः साक्ष्ये' इत्यपि शब्दादर्थात्प्रकरणाद्वाऽस्यार्थस्यानवगमादित्यलं प्रसङ्गेन ॥ ८० ॥

(वी० मि०) कूटसाक्षिणां दण्डमाह –

पृथक्पृथग्दण्डनीयाः कूटकृत्साक्षिणस्तथा ॥

(१) चाभावनिरपेक्ष ख.। (२) अभावस्वरूपेण ख.। (३) कस्मिन्विवादे घ.।
(४) पवादमाह ख.। (५) प्याचार्या नानुमन्यन्ते घ.।

विवादाद्द्विगुणं दण्डं विवास्यो ब्राह्मणः स्मृतः ॥ ८१ ॥
यः साक्ष्यं श्रावितोऽन्येभ्यो निन्हुते तत्तमोवृतः ॥
स दाप्योऽष्टगुणं दण्डं ब्राह्मणं तु विवासयेत् ॥ ८२ ॥

कूटकृतः कपटेन व्यवहरन्तोऽसत्याभिधायिन इति यावत्, ईदृशा ये साक्षिणस्ते पृथक् पृथक् प्रत्येकं विवादपदाद्द्विगुणं दण्डं दण्डनीया राज्ञे दाप्याः । क्वचित्तु कूटसाक्ष्यकृत इति पाठः । इदं च लोभादिवहुकारणनिश्चयेन तथाशब्देन वृथा पराजिताय विवादपदं धनं अनिगददण्डरूपं प्रागुक्तं दाप्या इति समुच्चीयते । ब्राह्मणस्तु राज्ञा स्वदेशादपसारणीयः स्मृतः स्मृतावभिहितो न त्वर्थेन दण्डनीयः । यस्तु साक्ष्यमन्येभ्यः श्रावितः श्रावितवान् अहमिममर्थं जानामीति कथितवान् पश्चात्तमोवृत्तो रागाद्याक्रान्तचित्तः साक्ष्यं निन्हुते निग(१)दकाले यस्तपति स विवादपदादष्टगुणं द्रव्यं दाप्यः । तादृशापराधेऽपि ब्राह्मणं विवासयेदेव । तुशब्देनार्थदण्डव्यवच्छेदः । विष्णुः—'कूटसाक्षिणां सर्वस्वापहरणम्' । एतच्च तच्छीलविषयम् । मनुः—

लोभात्सहस्रं दण्ड्यः स्यान्मोहात्पूर्वं तु साहसम् ।
भयाद्द्वौ मध्यमौ दण्डौ मैत्रात्पूर्वं चतुर्गुणम् ॥
कामाद्दशगुणं पूर्वं क्रोधाच्च त्रिगुणं परम् ।
अज्ञानाद्द्वे शते पूर्णे वालिश्याच्छतमेव च ॥
एतानाहुः कूटसाक्ष्ये प्रोक्तान्दण्डान्मनीषिभिः ॥ ८१-८२ ॥

(मिता०) कूटसाक्षिणो दर्शितास्तेषां दण्डमाह—

पृथगिति । यो धनदानादिना कूटान्साक्षिणः करोतीति स कूटकृत् । साक्षिणश्च ये तथा कूटास्ते वि(२)वादान्नाम विवादपराजयात्पराजये यो दण्डस्तत्रतत्रोक्तस्तं दण्डं द्विगुणं पृथक्पृथगेकैकशो दण्डनीयाः । ब्राह्मणस्तु विवास्यो राष्ट्रान्निर्वास्यो न(३) दण्डनीयः । एतच्च लोभादिकारणविशेषापरिज्ञाने अनभ्यासे च वेदित(४)व्यम् । लोभा(५)दिकारणविशेषपरिज्ञानेऽभ्यासे च मनुनोक्तम् (८।१२०।

(१) निगदनकाले–इति ख. पु. पाठः । (२) विवादाद्विवादपराजये ख. विवादात्पराजये ग. ।
(३) न दण्डयाः ग-घ. । (४) द्रष्टव्यम् ख-ग. । (५) लोभाल्लोभेन मिथ्याभिधाने. ।

२१)—'लोभात्सहस्रं दण्ड्यः स्यान्मोहात्पूर्वं तु साहसम्। भ(१)याद्वौ मध्यमौ दण्डौ मैत्र्या(२)त्पूर्वं चतुर्गुणम्॥ कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम्। अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव तु॥' इति। तत्र लोभोऽर्थलिप्सा। मोहो विपर्ययज्ञानम्। भयं सन्त्रासः। मैत्री स्नेहातिशयः। कामः स्त्री(३)व्यतिकराभिलाषः। क्रोधोऽमर्षः। अज्ञानमस्फुटज्ञानम्। बालिश्यं ज्ञानानुत्पादः। सहस्रादिषु ताम्रिकाः पणा गृह्यन्ते। तथा (मनुः ८।१२३)—'कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः। प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत्'। इति। एतच्चाभ्यासविषयम्। कुर्वाणानिति वर्तमा(४)ननिर्देशात्। त्रीन्वर्णान्क्षत्रियादीन् पूर्वोक्तं दण्डयित्वा प्रवासयेन्मारयेत्। अर्थशास्त्रे प्रवासशब्दस्य मारणे प्रयोगात्, अस्य चाऽर्थशा(५)स्त्ररूपत्वात्। तत्रापि प्रवासनमोष्ठच्छेदनं जिह्वाच्छेदनं प्राणवियोजनं च कौटसाक्ष्यविषयानुसारेण द्रष्टव्यम्। ब्राह्मणं तु दण्डयित्वा विवासयेत् स्वराष्ट्रान्निष्कासयेत्। यद्वा विवासयेत् वाससो विगतो विवासाः। विवाससं करोतीति णिचि कृते 'णाविष्ठवत्प्रातिपदिकस्य' इति टिलोपे रूपम् नग्नीकुर्यादित्यर्थः। अथवा वसत्यस्मिन्निति वासो गृहम्। विवासयेत् भग्नगृहं कुर्यादित्यर्थः। ब्राह्मणस्यापि लोभादिकारणविशेषापरिज्ञानेऽनभ्यासे च तत्रतत्रोक्तो दण्ड एव। अभ्यासे त्वर्थदण्डो विवासनं च। तत्रापि जातिद्रव्यानुबन्धाद्यपेक्षया विवासनं नग्नीकरणं गृहभङ्गो देशान्निर्वासनं चेति व्यवस्था द्रष्टव्या। लोभादिकारणविशेषापरिज्ञानेऽनभ्यासे चाल्पविषये कौटसाक्ष्ये ब्राह्मणस्यापि क्षत्रियादिवदर्थदण्ड एव। महाविषये तु देशान्निर्वासनमेव। अत्राप्यभ्यासे सर्वेषामेव मनूक्तं द्रष्टव्यम्। न च ब्राह्मणस्यार्थदण्डो नास्तीति मन्तव्यम्। अर्थदण्डाभावे शारीरदण्डे च निषिद्धे स्वल्पेऽप्यपराधे नग्नीकरणगृहभङ्गाङ्ककरणविप्रवासनं दण्डाभावो वा प्रसज्यते। 'चतुर्णामपि वर्णानां प्रायश्चित्तमकुर्वताम्। शरीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत्' ॥ इति स्मरणाच्च। तथा (मनुः ८।३७८)—सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन्' इति स्मरणात्। यत्तु शङ्खवचनम्—'त्रयाणां वर्णानां धनापहारवधबन्ध-

(१) भयादौ मध्यमो दण्डो ख.। (२) पूर्वं प्रथमसाहसमेव.। (३) स्त्रीव्यतिरेका ख.।
(४) वर्तमानकाल ख.। (५) शास्त्रस्वरूप ख.।

क्रिया विवासनाङ्ककरणं ब्राह्मणस्य' इति तत्र धनापहारः सर्वस्वापहारो विवक्षितो वधसाहचर्यात् । 'शारीरस्त्ववरोधादिर्जीवितान्तः प्रकीर्तितः । काकिण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च' । इति वधसर्वस्वहरणयोः सहपाठात् । यदप्युक्तम्—'राष्ट्रादेनं वहिः कुर्यात्समग्रधनमक्षतम्' इति तत्प्रथमकृतसाहसविषयं न सर्वविषयम् । शारीरस्तु ब्राह्मणस्य न कदाचिद्भवति । (मनुः ८।३८०)—'न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम्' इति सामान्येन मनुस्मरणात् । तथा (मनुः ८।३८१) 'न ब्राह्मणवधाद् भूयानधर्मो विद्यते भुवि । तस्मादस्य वधं राजा मनसापि न चिन्तयेत्' ॥ इति ॥ ८१ ॥

(मिता०) जानतः साक्ष्यानङ्गीकार आह—

य इति । अपि च-यस्तु साक्षित्वमङ्गीकृत्यान्यैः साक्षिभिः सह साक्ष्यं श्रावितः सन्निगदनकाले तमोवृतो रागाद्याक्रान्तचित्तस्तत्साक्ष्यमन्येभ्यः साक्षिभ्यो निन्हुते नाहमत्र साक्षी भवामीति स विवादपराजये यो दण्डस्तं दण्डमष्टगुणं दाप्यः । ब्राह्मणं पुनरष्टगुणद्रव्यदण्डदानासमर्थं विवासयेत् । विवासनं च नग्नीकरणगृहभङ्गदेशानिर्वासनलक्षणं विषयानुसारेण द्रष्टव्यम् । इतरेषां त्वष्टगुणद्रव्य(१)दण्डदानासंभवे स्वजात्युचितकर्मकरणनिगडबन्धनकारागृहप्रवेशादि द्रष्टव्यम् । एतच्च पूर्वश्लोकेऽप्यनुसर्तव्यम् । यदा सर्वे साक्ष्यं निह्नुवते तदा सर्वे समानदोषाः । यदा तु साक्ष्यमुक्त्वा पुनरन्यथा वदन्ति तदानु(२)बन्धाद्यपेक्षया दण्ड्याः । यथाह कात्यायनः—'उक्त्वान्यथा ब्रुवाणाश्च दण्ड्याः स्युर्वाक्छलान्विताः' इति । न चान्येनोक्ताः साक्षिणोऽन्येन रहस्यनुसर्तव्याः । यथाह नारदः—'न परेण समुद्दिष्टमुपेयात्साक्षिणं रहः । भेदयेन्नैव चान्येन (३)हीयेतैवं समाचरन्' ॥ इति ॥ ८२ ॥

(वी० मि०) कौटसाक्ष्ये दण्डादेरपवादमभिप्रेत्याह—

वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ॥
तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः ॥ ८३ ॥

यत्र वर्णिनां ब्राह्मणक्षत्रियविशां वधः प्राणनाशः सत्याभिधाने प्रसज्यते तत्र साक्षी अनृतं प्राणनाशनिवृत्त्युपयोगि वदेत् । तत्पाव

---

(१) दण्डासंभवे ख. । (२) अनुबन्धो दोषोत्पादः । (३) हीयच्चैवं घ. ।

नाय तस्यानृताभिधानस्य प्रायश्चित्तेन शोधनाय सारस्वतः सरस्वतीदेवताकश्चरुः प्रागुक्तो निर्वाप्य इत्यङ्गमुखेन होमनिर्देशः । न चाऽनृताभिधानस्याऽभ्यनुज्ञानात्प्रायश्चित्तानुपपत्तिः साक्ष्यनृताभिधानजन्यपापस्य पूर्वप्रक्रान्तस्यापवादेऽपि सामान्यतोऽनृताभिधानजन्यपापस्याऽनपवादेन प्रायश्चित्तसम्भवात् । वर्णिवधजन्यपापापेक्षया लघुत्वादेतस्य पापस्याऽगत्याश्रयणमिति केचित् । वस्तुतस्तु तत्पावनायेति अकरणजन्यपापाभावायेत्यर्थकस्याऽनृतवचनस्य यागीयहिंसावद्विहितत्वेन पापाजनकत्वात् । अत एव—

शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः ।
तत्र वक्तव्यमनृतं तत्सत्यादतिरिच्यते ॥

इति मनुरपि दोषाभावमाह । गौतमोऽपि—'नानृतवचने दोषोऽस्ति जीवनं तदधीनञ्चेन्न तु पापीयसो जीवन'मिति तत्त्वम् । अत्र प्रायश्चित्तान्तरमाह मनुः—

कूष्माण्डैर्वापि जुहुयात् घृतमग्नौ यथाविधि ।
उदित्यृचा वा वारुण्या त्र्यृचेनाब्दैवतेन वा ।

विष्णुः—'शूद्रस्त्वेकाह्निकं गोदशकस्य ग्रासं दद्यात्' ॥ ८३ ॥

इति श्रीमत् ० याज्ञवल्क्यव्याख्याने साक्षिप्रकरणम् ।

(मिता०) साक्षिणामवचनमसत्यवचनं च सर्वत्र प्रतिषिद्धं तदपवादार्थमाह—

वर्णिनामिति । यत्र वर्णिनां शूद्रविट्क्षत्रविप्राणां सत्यवचनेन वधः संभाव्यते तत्र (१)साक्ष्यनृतं वदेत् सत्यं न वदेत् । अनेन च सत्यवचनप्रतिषेधेन साक्षिणः पूर्वप्रतिषिद्धमसत्यवचनमवचनं चाभ्यनुज्ञायते । यत्र शङ्काभियोगादौ सत्यवचने वर्णिनो वधोऽनृतवचने न कस्यापि वधस्तत्रानृतवचनमभ्यनुज्ञायते । यत्र तु सत्यवचनेऽर्थिप्रत्यर्थिनोरन्यतरस्य वधोऽसत्यवचने चान्यतरस्य वधस्तत्र तूष्णींभावोऽभ्यनुज्ञा राजा यद्यनुमन्यते । अथ राजा कथमप्यकथने न मुञ्चति तदा भेदादसाक्षित्वं कर्तव्यम् । तस्याप्यसम्भवे सत्यमेव वदितव्यम् । असत्य(२) वचने वर्णिवधदोषोऽसत्यवचनदोष एव । तत्र च यथाशास्त्रं प्रायश्चित्तं कर्तव्यम् ॥

(मिता०) तर्ह्यसत्यवचने तूष्णींभावे च शास्त्राभ्यनु(३)ज्ञाना

(१) वदेत् घ. साक्ष्यमनृतम् घ. । (२) वचनेन. । (३) भ्यनुज्ञया ख. ।

त्प्रत्यवायाभाव इत्यत आह—

तदिति । तत्पावनाय अनृतवचनावचननिमित्तप्रत्यवायपरिहाराय सारस्वतश्चरुर्द्विजैरेकैकशो निर्वाप्यः कर्तव्यः । सरस्वती देवता अस्येति सारस्वतः । अनवस्त्रावितान्तरूष्मपक्वौदने चरुशब्दः प्रसिद्धः । इहायमभिसन्धिः—साक्षिणामनृतवचनमवचनं च यन्निषिद्धं तदिहाभ्यनुज्ञातम् । यत्तु—'नानृतं वदेत् । अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी' इति सामान्येनानृतवचनमवचनं च (१)प्रतिषिद्धं तदतिक्रमनिमित्तमिदं प्रायश्चित्तम् । न च मन्तव्यं साक्षिणामनृतवचनावचनाभ्यनुज्ञानेऽपि साधारणानृतवचनावचनप्रतिषेधातिक्रमनिमित्तप्रत्यवायस्य तादव(२)स्थ्यादभ्यनुज्ञावचनमनर्थकमिति । (३)यतः साक्ष्यनृतवचनावचनयोर्भूयान्प्रत्यवायः साधारणानृतवचनावचनयोरल्पीयानित्यर्थवदभ्यनुज्ञावचनम् । यद्यपि भूयसः प्रत्यवायस्य निवृत्त्या आनुषङ्गिकस्याल्पीयसः प्रत्यवायस्य निवृत्तिरन्यत्र तथापीहाभ्यनुज्ञावचनात्प्रायश्चित्तविधानाच्च भूयसो निवृत्त्याल्पीयानप्यानुषङ्गिकोऽपि प्रत्यवायो न निवर्तत इति गम्यते । एतदेवान्यत्र प्रश्नेषु वर्णिवधाशङ्कायां पान्थादीनामनृतवचनावचनाभ्यनुज्ञानं वेदितव्यम् । न च तत्र प्रायश्चित्तमस्ति प्रतिषेधान्तराभावात् । निमित्तान्तरेण कालान्तरेऽर्थतत्त्वावगमेऽपि साक्षिणामन्येषां च दण्डाभावोऽस्मादेव वचनादवगम्यत इति ॥ ८३ ॥

इति साक्षिप्रकरणम् ।

(वी० मि०) अथ लिखितं प्रमाणं निरूपयति—

यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम् ॥
लेख्यं तु साक्षिमत्कार्यं तस्मिन् धनिकपूर्वकम् ॥ ८४ ॥

समामासतदर्धाहर्नामजातिस(४)गोत्रकैः ॥
सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम् ॥ ८५ ॥

---

(१) निषिद्धं ख. । (२) स्थ्यादवचनाभ्यनुज्ञा ख. ।

(३) साक्षिणामसत्यवचनावचनप्रतिषेधातिक्रमयोः ख. ।

(४) स्वगोत्रकैः—इति मुद्रितपुस्तके पाठः ।

समाप्तेऽर्थे ऋणी नाम स्वहस्तेन निवेशयेत् ॥
मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम् ॥ ८६ ॥
साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम् ॥
अत्राहममुकः साक्षी लिखेयुरिति ते समाः ॥ ८७ ॥

उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना ॥
लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत् ॥ ८८ ॥
विनापि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत् ॥
तत्प्रमाणं स्मृतं स(१)र्वं बलोपधिकृतादृते ॥ ८९ ॥

लिखितं तावद्द्विविधं स्वहस्तकृतमन्यत्कृतं च । तत्रान्त्यं साक्षिमत्कार्य्यम् । आद्यं तु साक्षिभिर्विना बलात्कारेण छद्मना च कृतं विना प्रमाणमिति विशेषः । परं तु स्वलिखितसंशयसम्भावनायां तद्व्युदासाय साक्षिमत्तदपि कार्यम् । इतरत्साधारणं विशेषणम् । यः कश्चिदृणादिरूपोऽर्थः परस्परं धनिकाधमर्णादिभ्यां द्वाभ्यामपि स्वस्वोभयस्य रुच्या निष्णातः व्यवस्थापितः तस्मिन्नर्थे धनिकादिनामलिखनपूर्वकं लेख्यं प्रतिपादकलिपिसमुदायरूपं समा वर्षः, मासः, तदर्धं पक्षः, अहस्तिथिर्वारश्च । एतेन ऋणग्रहणाद्यधिकरणीभूताः, नाम चाऽधमर्णादेः, उत्तमर्णाऽधमर्णयोर्द्वयोरपि जातिर्ब्राह्मणत्वादिः सगोत्रं गोत्रमेव काश्यपादि स्वगोत्रकैरिति क्वचित्पाठः, एतैर्युक्तम् । कठादिना समानं ब्रह्म वेदशाखां चरत्यधीत इति सब्रह्मचारी तस्य भावः सब्रह्मचारिकमुत्तमर्णाधमर्णयोः कठादिशाखाध्यायित्वम् । आत्मीयावुत्तमर्णाऽधमर्णादिसम्बन्धिनौ पितरौ तयोर्नाम, आदिपदाद्द्रव्यजातिसंख्यादेर्ग्रहणं, एतैश्चिन्हितं कार्य्यम् । आद्यतुशब्देन बलोपधिकृतत्वव्यवच्छेदः । द्वितीयतुशब्देनाऽन्यकृते लेख्येऽसाक्षिकत्वव्यवच्छेदः । इदं चाऽवधेयम्—परस्यात्यतिप्रामाणिकत्वेनाऽवधारितस्य लेख्यं साक्षिरहितमपि प्रमाणमन्यथा तु साक्षिणा निर्णयः । लेख्यं तु तत्र साक्षिणां स्मरण एवोपयुज्यत इति । अर्थे सम्पूर्णे लिखिते ऋणी अधमर्णः यदत्र पत्रे लिखितं तदमुकपुत्रस्य मे

(१) लेख्यं—इति मुद्रितपुस्तके पाठः ।

मतमित्येवं क्रमेण स्वस्य नाम स्वहस्तेन लिखित्वा पत्रे निवेशयेत् । लिखनानभिज्ञे विशेषमाह व्यासः—

अनभिज्ञ ऋणी यः स्याल्लेखयेत्स्वमतं तु सः ।
साक्षी वा साक्षिणाऽन्येन परसाक्षिसमर्पितः ॥

साक्षिमदिति कथितं, तत्र प्रकारमाह—साक्षिणश्चेति । समाः समगुणास्ते साक्षिणः स्वपितृनामलेखनपूर्वकमत्रार्थेऽहममुकनामा साक्षीति स्वहस्तेन लिखेयुः । लिखनानभिज्ञास्तु लेखयेयुरिति च शब्देन समुच्चीयते । ततः साक्षिनामलिखनानन्तरं लेखकः पत्रलिखनकर्ता उभाभ्यामुत्तमर्णाऽधमर्णाभ्यामर्थितेनाऽमुकनामकेन मयैतल्लिखितमिति अन्ते लेखनीयाऽखिलार्थशेषे स्वयं लिखेत् । हिशब्दाभ्याम(१)र्थनस्य लेखनहेतुत्वं लेख्यार्थस्याऽवधारणं च दर्शितम् । विनापीति व्याख्यातं प्राक् । तुशब्देन परलिखिते साक्षिविनाकृतत्वस्य व्यवच्छेदः । सर्वमित्यनेन वादिसाक्षिपत्रलेखकानां सर्वं लिखितमुच्यते ॥ ८४-८९ ॥

(मिता०) भुक्तिसाक्षिणौ निरूपितौ, सांप्रतं लेख्यं निरूप्यते । तत्र लेख्यं द्विविधं शासनं जानपदं चेति । शासनं निरूपितम् , जानपदमभिधीयते । तच्च द्विविधम्—स्वहस्तकृतम(२)न्यकृतं चेति । तत्र स्वहस्तकृतमसाक्षिकम्, अ(२)न्यकृतं ससाक्षिकम् । अनयोश्च देशाचारानुसारेण प्रामाण्यम् । यथाह नारदः—'लेख्यं तु द्विविधं ज्ञेयं स्वहस्ताऽन्यकृतं तथा । असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः' ॥ इति । तत्रान्यकृतमाह—

यः कश्चिदिति । धनिकाधमर्णयोर्योऽर्थो हिरण्यादिः परस्परं स्वरुच्या इयता कालेनैतावद्देयमियती च प्रतिमासं वृद्धिरिति निष्णातो व्यवस्थितः तस्मिन्नर्थे कालान्तरे विप्रतिपत्तौ वस्तुतत्त्वनिर्णयार्थं लेख्यं साक्षिमदुक्तलक्षणसाक्षियुक्तं धनिकपूर्वकं धनिकः पूर्वो यस्मिंस्तद्धनिकपूर्वकम् , धनिकनामलेखनपूर्वकमितियावत् कार्यं कर्तव्यम् । उक्तलक्षणाः साक्षिणो वा कर्तव्याः—'कर्त्रा तु यत्कृतं कार्यं सिद्ध्यर्थं तस्य साक्षिणः । प्रवर्तन्ते विवादेषु स्वकृतं वाथ लेख्यकम्' ॥ इति स्मरणात् ॥ ८४ ॥

(१) अर्थितस्य—इति ख० पु० पाठ ।

(२) मन्यंहस्तकृतं ग. ।

(मिता०) अपि च—

समामासेति । समा संवत्सरः। मासश्चैत्रादिः । तदर्धं पक्षः शुक्लः कृष्णो वा । अहस्तिथिः प्रतिपदादिः । नाम धनिक(१)र्णिकयोः । जातिर्ब्राह्मणत्वादिः। स्वगोत्रं वासिष्ठादिगोत्रम्। एतैः समादिभिश्चिह्नितम्। तथा सब्रह्मचारिकं बह्वृचादिशाखाप्रयुक्तं गुणनाम बह्वृचः कठ इति । आत्मीयपितृनाम धनिकपितृनाम । आदिग्रहणाद्द्रव्यजातिसंख्या(२)चारादेर्ग्रहणम् । एतैश्च चिह्नितं लेख्यं कार्यमिति गतेन सम्बन्धः ॥ ८५ ॥

(मिता०) किञ्च—

समाप्त इति । धनिकाधमर्णयोर्योऽर्थः स्वरुच्या व्यवस्थितस्तस्मिन्नर्थे समाप्ते लिखिते ऋणी अधमर्णो नामात्मीयं स्वहस्तेनास्मिन्लेख्ये यदुपरि लेखितं तन्ममामुकपुत्रस्य मतमभिप्रेतमिति निवेशयेत्पत्रे विलिखेत् ॥ ८६ ॥

(मिता०) तथा—

साक्षिण इति । तस्मिल्लेख्ये ये साक्षिणो लिखितास्तेऽप्यात्मीयपितृनामलेखनपूर्वकं अस्मिन्नर्थेऽयममुको देवदत्तः साक्षीति स्वहस्तेनैकैकशो लिखेयुः। ते च समाः संख्यातो गुणतश्च कर्तव्याः। यद्यधमर्णः साक्षी वा लिपिज्ञो न भवति तदाधमर्णोऽन्येन साक्षी च साक्ष्यन्तरेण सर्वसाक्षिसंनिधौ स्वमतं लेखयेत्। यथाह नारदः—'अलिपिज्ञ ऋणी यः स्यात्स्वमतं तु स लेखयेत्। साक्षी वा साक्षिणान्येन सर्वसाक्षिसमीपतः' ॥ इति ॥ ८७ ॥

(मिता०) अपि च—

उभयेति । ततो लेखक उभाभ्यां धनिकाधमर्णि(३)काभ्यां प्रार्थितेन मयामुकेन देवदत्तेन विष्णुमित्रसूनुना एतल्लेख्यं लिखितमित्यन्ते लिखेत् ॥ ८८ ॥

(मिता) सांप्रतं स्वकृतं लेख्यमाह—

विनेति । यल्लेख्यं स्वहस्तेन लिखितमधमर्णेन तत्साक्षिभिर्विनापि प्रमाणं स्मृतं मन्वादिभिः । बलोपधिकृतादृते बलेन बलात्कारेण उपधिना छललोभक्रोधभयमदादिलक्षणेन यत्कृतं तस्माद्विना ।

---

(१) धनिकाधमर्णिकयोः ख. । (२) संख्यावारादेः ख. ग. । (३) काभ्यामुभाभ्यां ख. ।

नारदोऽप्याह–'मत्ताभियुक्तस्त्रीबालबलात्कारकृतं च यत् । तदप्रमाणं लिखितं भयोपधिकृतं तथा' ॥ इति । (१)तच्चैतत्स्वहस्त(२)कृतं कृतं च यल्लेख्यं देशाचारानुसारेण स(३)बन्धकव्यवहारेऽबन्धकव्यवहारे च युक्तमर्थक्रमापरिलोपेन लिप्यक्षरापरिलोपेन च लेख्यमित्येतावत् न पुनः साधुशब्दैरेव, प्रातिस्विकदेशभाषयापि लेखनीयम् । यथाह–'देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणम् । तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम्' ॥ इति । विधानं विधिः आधेर्विधिराधिविधिराधीकरणं तस्य लक्षणं गोप्याधिभोग्याधिकालकृतमित्यादि तद्व्यक्तं विस्पष्टं यस्मिंस्तद्व्यक्ताधिविधिलक्षणम् । अविलुप्तक्रमाक्षरं अक्षराणां क्रमः क्रमश्चाक्षराणि च क्रमाक्षराणि अविलुप्तानि क्रमाक्षराणि यस्मिंस्तदविलुप्तक्रमाक्षरं, तदेवंभूतं लेख्यं प्रमाणम् । राजशासनवन्न साधुशब्दनियमोऽत्रेत्यभिप्रायः ॥ ८९ ॥

(वी० मि०) लेख्यं क्वचिदप्रमाणमित्यभिप्रेत्याह—

ऋणं लेख्यकृतं देयं पुरुषैस्त्रिभिरेव तु ॥
आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते ॥ ९० ॥

लेख्यारूढं कृतमृणं त्रिभिरेव ग्रहीतृतत्पुत्रतत्पौत्रैरेव देयम् । एवकारेण प्रपौत्रादिव्यवच्छेदः । तथा च प्रपौत्रादेः ऋणपत्रं सदप्यर्थासाधकमिति भावः । तुशब्देन ऋणमित्यत्राऽन्वितेन प्रातिभाव्यागते पौत्रदेयत्वं व्यवच्छिद्यते । आधिर्भोग्याधिः क्षेत्रादिस्तावद् भुज्यते यावत्तदाधिग्रहीत्रे ऋणं नाऽधमर्णेन प्रदीयते । तथा चाऽऽधिपत्रं पुरुषत्रयोर्ध्वस्यापि प्रमाणमिति भावः ॥ ९० ॥

(मिता०) लेख्यप्रसङ्गेन लेख्यारूढमप्यृणं त्रिभिरेव देयमित्याह—

ऋणमिति । यथा साक्ष्यादिकृतमृणं त्रिभिरेव देयं तथा लेख्यकृतमप्याहर्तृ(४)तत्पुत्रतत्पुत्रैस्त्रिभिरेव देयं न चतुर्थादिभिरिति नियम्यते । ननु पुत्रपौत्रैर्ऋणं देयमित्यविशेषेण ऋणमात्रं त्रिभिरेव देयमिति नियतमेव । बाढम् । अस्यैवोत्सर्गस्य पत्रारूढर्णविषये स्मृत्यन्तरप्रभवामपवादशङ्कामपनेतुमिदं वचनमारब्धम् । तथा हि पत्रलक्षणमभिधाय कात्यायनेनाभिहितम्—'एवं कालमतिक्रान्तं पितृ-

---

(१) तच्चैतत् घ. ।   (२) कृतं च लेख्यं ग. ।   (३) सबन्धव्यवहारे च ख. ।
(४) तत्पुत्रपौत्रैः ।

णां दाप्यते ऋणम्' इति । इत्थं पत्रारूढमृणमतिक्रान्तकालमपि पितॄणां सम्बन्धि दाप्यते । अत्र पितॄणामिति बहुवचननिर्देशात्कालमतिक्रान्तमिति व(१)चनाच्चचतुर्थादिर्दाप्य इति प्रतीयते । तथा हारीतेनापि—'लेख्यं यस्य भवेद्धस्ते लाभं तस्य विनिर्दिशेत्' इति । अत्रापि यस्य हस्ते लेख्य(पत्र)मस्ति तस्यर्णलाभ इति सामान्येन चतुर्थादिभ्योऽप्यृणलाभोऽस्तीति प्रतीयते । अतश्चैतदाशङ्कानिवृत्त्यर्थमेतद्वचनमित्युक्तम् । वचनद्वयं च योगीश्वरवचनानुसारेण योजनीयम् ॥

(मिता०) अस्यापवादमाह—

आधिरिति । सबन्धकेऽपि (२)पत्रारूढं ऋणं त्रिभिरेव देयमिति नियमादृणापाकरणानधिकारिणा(३)ध्याहरणेऽप्यनधिकारप्राप्ताविदमुच्यते । यावच्चतुर्थेन पञ्चमेन वा ऋणं न दीयते तावदेवाधिर्भुज्यते इति वदता सम्बन्धकर्णापाकरणे चतुर्थादेरप्यधिकारो दर्शितः । नन्वेतदप्युक्तमेव फलभोग्यो न नश्यतीति । सत्यम्, तदप्येतस्मिन्नसत्यवादवचने पुरुषत्रयविषयमेव स्यादिति सर्वमनवद्यम् ॥ ९० ॥

(वी० मि०) ऋणप्रयोगादिकालीनलेख्यस्य देशान्तरस्थत्वादिना व्यवहारकाले व्यापार्यत्वाभावसम्भावनायां लेख्यान्तरं कार्यमुभयानुमतं तच्च प्रमाणमित्याह—

देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे तथैव च ॥
भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत् ॥ ९१ ॥

देशान्तरस्थे व्यवहितदेशान्तर्वर्तिनि दुष्टे सन्दिग्धाक्षरे नष्टे पत्रनाशात्, उन्मृष्टे मसीदौर्बल्यादिना मृदिताक्षरे, भिन्ने पत्रविदलनेन द्विधाभूते, अग्निना दग्धे अथवा छिन्ने पत्रस्य खण्डखण्डीभावेन द्विधाभूते लेख्येऽन्यल्लेख्यं कारयेत् । तथाशब्देन श्लिष्टपदघटितस्य चकारेण चौरहृतस्य समुच्चयः । एवकारेण देशान्तरस्थत्वाद्यभावे लेख्यान्तरकरणव्यवच्छेदः । यदि तु परः पापिष्ठहारिणा पूर्वलेख्यं न मन्यते तदा साक्ष्यादिना पूर्वपत्रं प्रमाप्य पत्रान्तरं करणीयमिति९१॥

---

(१) वचनाच्च चतुर्थादिः ख. ।
(२) पत्रारूढे ऋणे ख. ग. ।
(३) कारेणापहरणे ख. ।

(मिता०) प्रासङ्गिकं परिसमाप्य प्रकृतमेवानुसरति—

देशान्तरस्थ इति । व्यवहाराक्षमे पत्रे पत्रान्तरं कुर्यादिति विधीयते । व्यवहाराक्षमत्वं चात्यन्तव्यवहितदेशान्तरस्थे पत्रे दुर्लेख्ये दुष्टानि संदिह्यमानानि अवाचकानि वा लेख्यानि लिप्यक्षराणि पदानि वा यस्मिंस्तत् दुर्लेख्यं तस्मिन्दुर्लेख्ये, नष्टे कालवशेन, उन्मृष्टे मषीदौर्बल्यादिना मृदितलिप्यक्षरे, हृते (१)तस्करादिभिः, भिन्ने विदलिते, दग्धे प्रज्वलिते, छिन्ने द्विधाभूते सति (२)पत्रं द्विर्भवति । एतच्चार्थिप्रत्यर्थिनोः परस्परानुमतौ सत्याम् । विमत्यां तु व्यवहारप्राप्तौ देशान्तरस्थपत्रानयना(३)याध्वापेक्षया कालो दातव्यः । (४)दुर्देशावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्यः । यथाह नारदः—'लेख्ये देशान्तरन्यस्ते शीर्णे दुर्लिखिते हृते । सतस्तत्कालकरणमसतो (५)द्रष्टृदर्शनम्' ॥ इति । सतो विद्यमानस्य पत्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिर्दातव्यः । असतः पुनरविद्यमानस्य पत्रस्य पूर्वं ये द्रष्टारः साक्षिणस्तैर्दर्शनं (६) व्यवहारपरिसमापनं कार्यम् । यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्यः-'अलेख्यसाक्षिके दैवी व्यवहारे विनिर्दिशेत्' इति स्मरणात् । एतच्च जानपदं व्यवस्थापत्रम् । राजकीयमपि व्यवस्थापत्रमीदृशमेव भवति । इयांस्तु विशेषः—'राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितं तथा । राजकीयं स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमत्' ॥ इति । तथान्यदपि राजकीयं जयपत्रकं वृद्धवसिष्ठेनोक्तम्—'यथोपन्यस्तसाध्यार्थसंयुक्तं सोत्तरक्रियम् । सावधारणकं चैव जयपत्रकमिष्यते ॥ प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया । सिद्धेऽर्थे वादिने दद्याज्जयिने जयपत्रकम्' ॥ इति । तथा सभासदोऽपि म(७)तं मेऽमुकपुत्रस्येति स्वहस्तं दद्युः । 'सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः । यथालेख्यविधौ तद्वत्स्वहस्तं दद्युरेव ते' ॥ इति स्मरणात् । सभासदां च परस्परानुमतिव्यतिरेकेण न व्यवहारो निःशल्यो भवति । यथाह नारदः—'यत्र सभ्यो जनः सर्वः साध्वेतदिति मन्यते । स निःशल्यो विवादः स्यात्सशल्यस्त्वन्यथा भवेत्' ॥

(१) तस्करादिना ग. घ. । (२) द्वितीयपत्रं भवति ग. ।
(३) नाय दुर्गाध्वापेक्षया ख. । (४) दुर्गदेशावस्थिते ख. ।
(५) दृष्टदर्शनं घ. । (६) व्यवहारे-ख० । (७) दत्तं मे ख० ।

इति । एतच्चतुष्पाद्व्यवहार एव । 'साधयेत्साध्यमर्थं यच्चतुष्पादान्वितं च यत् । राज(१)मुद्रान्वितं चैव जयपत्रकमिष्यते' ॥ इति स्मरणात् । यत्र तु हीनता । यथा—'अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः। आहूतप्रप(२)लायी च हीनः पञ्चविधः स्मृतः'॥ इति। तत्र न जयपत्रकमस्ति अपि तु हीनपत्रकमेव । तच्च कालान्तरे दण्डप्राप्त्यर्थं, जयपत्रं तु प्राङ्न्यायविधिसिद्ध्यर्थमिति विशेषः ॥ ९१ ॥

(वी० मि०) लेख्यस्याऽप्रामाण्यशङ्कानिरासकमाह—

सन्दिग्धलेख्यशुद्धिः स्यात्स्वहस्तलिखितादिभिः ॥
युक्तिप्राप्तिक्रियाचिन्हसम्बन्धागमहेतुभिः ॥ ९२ ॥

शुद्धमशुद्धं वेति विचारकसन्देहविषयस्य लेख्यस्य शुद्धिः सम्यक् निश्चयः प्रतिवादिनः स्वहस्तलिखितं यदक्षरान्तरं तत्सौसादृश्यदर्शने । आदिपदात्साक्षिलिखिताक्षरे पत्रलिखिते दर्शनेन पत्रलेखकस्य यदक्षरान्तरं तत्सौसादृश्यस्य तल्लिखिताक्षरे दर्शनेन स्यात् । युक्तिः इदानीं द्रव्यं नास्ति मासान्तरे दातव्यं मयेत्यभिधानान्यथानुपपत्तिः, प्राप्तिः तत्पत्रलिखितर्णवृद्ध्यादिप्राप्तिः, क्रिया साक्षिनिगदनरूपा, चिह्नं प्रतिवादिनो लेखनीयमसाधारणं श्रीकारादि, सम्बन्धः विवादपदे कुण्डलादौ पूर्वकाल उत्तमर्णीयत्वावधारणं, आगमो विवाद(३)पदस्य तत्पूर्वक्रयादिः, एतैर्हेतुभिश्च शुद्धिः स्यात् ॥ ९२ ॥

(मिता०) लेख्यसन्देहे निर्णयनिमित्तान्याह—

सन्दिग्धेति । शुद्धमशुद्धं वेति संदिग्धस्य लेख्यस्य शुद्धिः स्वहस्तलिखितादिभिः स्यात् । स्वहस्तेन लिखितं यल्लेख्यान्तरं तेन शुद्धिः । यदि सदृशान्यक्षराणि भवन्ति तदा शुद्धिः स्यादित्यर्थः । आदिशब्दात्साक्षिलेखकस्वहस्तलिखितान्तरसंवादाच्छुद्धिरिति । युक्त्या प्राप्तिर्युक्तिप्राप्तिः । देशकालपुरुषाणां द्रव्येण सह सम्ब(४)न्धः प्राप्तिः । अस्मिन्देशेऽस्मिन्कालेऽस्य पुरुषस्येदं द्रव्यं घटत इति युक्तिप्राप्तिः । क्रिया तत्साक्ष्युपन्यासः । चिह्नमसाधारणं श्रीकारादि । सबन्धोऽर्थिप्रत्यर्थिनोः पूर्वमपि परस्परविश्वासेन दानग्रहणादिसम्ब-

(१) मुद्राङ्कितं ग० । (२) व्यपलापी ग. ।
(३) विवादस्य—इति ख. पु० पाठः । (४) सम्बन्धप्राप्तिः ख. घ. ।

न्धः । आगमोऽस्यैतावतोऽर्थस्य संभावितः प्राप्त्युपायः । एते एव हेतवः । एभिर्हेतुभिः संदिग्धलेख्यस्य शुद्धिः स्यादित्यन्वयः । यदा तु लेख्यसंदेहे निर्णयो न जायते तदा साक्षिभिर्निर्णयः कार्यः । यथाह कात्यायनः—'दूषिते पत्रके वादी तदारूढांस्तु निर्दिशेत्' इति । साक्षिसंभवविषयमिदं वचनम् । साक्ष्यसम्भवविषयं तु हारीतवचनम्—'न मयैतत्कृतं पत्रं कूटमेतेन कारितम् । अधरीकृत्य तत्पत्रमथो दिव्येन निर्णयः' ॥ इति ॥ ९२ ॥

(वी० मि०) ऋणलेख्यमिव तत्परिशोधनलेख्यमपि प्रमाणमित्यभिप्रेत्याह—

लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वर्णिको धनम् ॥
धनी वो(१)पगतं दद्यात्स्वहस्तपरिचिह्नितम् ॥ ९३ ॥
दत्त्वर्णं पाटयेल्लेख्यं शुद्ध्यैवाऽन्यत्तु कारयेत् ॥
साक्षिमच्च भवेद्यत्तु(२)तद्दातव्यं ससाक्षिकम् ॥ ९४ ॥

लेख्यस्य पत्रस्य पृष्ठेऽभिलिखिताऽपरदिशि स्वल्पं स्वल्पं धनं दत्त्वा दत्त्वा ऋणिकोऽभिलिखेत् । समग्रमृणं दत्त्वा तु स्वदत्तमृणलेख्यं पाटयेत् विदलीकुर्यात् । ऋणपत्रासन्निधाने तु शुद्ध्यै अधमर्णत्वनिवृत्तिनिश्चयायाऽन्यल्लेख्यं परिशोधनप्रतिपादकं कारयेत् । अयं च विशेषः-यदृणं ससाक्षिकं गृहीतं भवेत्तत्तथैव दातव्यमिति । चकारेण स्वस्य लि(३)खितत्वाभावे प्रामाणिकहस्तचिह्नितमिति समुच्चीयते । तुकारेण असाक्षिके ऋणे ससाक्षिकपरिशोधनव्यवच्छेदः । चकारेणाऽसाक्षिके ऋणेऽसाक्षिकं दानं समुच्चीयते ॥ ९३-९४ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने लेख्यप्रकरणम् ॥

(मिता०) एवं शोधिते पत्रे ऋणे च दातव्ये प्राप्ते यदा कृत्स्नमेव ऋणं दातुमसमर्थस्तदा किं कर्तव्यमित्यत आह—

लेख्यस्येति । यदाधमर्णिकः सकलमृणं दातुमसमर्थस्तदा शक्त्यनुसारेण दत्त्वा पूर्वकृतस्य लेख्यस्य पृष्ठेऽभिलिखेत् एतावन्मया

(१) चोपगतं—इति क० ख० पु० पाठः ।
(२) यद्वा—इति मु० पु० पाठः ।   (३) लिपित०—इति क०पु० पाठः ।

दत्तमिति। उत्तमर्णो वा उपगतं प्राप्तं धनं तस्यैव लेख्यस्य पृष्ठे द-द्यादभिलिखेत् एतावन्मया लब्धमिति। कथम्? स्वहस्तपरिचिह्नितं स्वहस्तलिखिताक्षरचिह्नितम्। यद्वोपगतं प्रवेशपत्रं स्वहस्तलिखि(१)तचिह्नितमधमर्णायोत्तमर्णो दद्यात्॥ ९३॥

(मिता०) ऋणे तु कृत्स्ने दत्ते लेख्यं किं कर्तव्यमित्यत आह—

दत्त्वेति। क्रमेण सकृदेव वा कृत्स्नमृणं दत्त्वा पूर्वकृतं लेख्यं पाटयेत्। यदा तु दुर्गदेशावस्थितं लेख्यं नष्टं वा तदा शुद्ध्यै अधमर्णत्वनिवृत्त्यर्थमन्यल्लेख्यं कारयेदु(२)त्तमर्णेनाधमर्णः। पूर्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्रमधमर्णाय दद्यादित्यर्थः॥

(मिता०) ससाक्षिके ऋणे कृत्स्ने दातव्ये किं कर्तव्यमित्यत आह—

साक्षिमदिति। यत्तु ससाक्षिकमृणं तत्पूर्वसाक्षिसमक्षमेव दद्यात्॥ ९४॥

इति लेख्यप्रकरणम्।

(वी० मि०) 'एषामन्यतमाभावे दिव्यान्यतममुच्यते' इत्युक्तं; तत्र दिव्यानि निरूपयति सम्पूर्णप्रकरणेन—

तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये॥
महाभियोगेष्वेतानि शीर्षकस्थेऽभियोक्तरि॥ ९५॥

बृहस्पतिना—

घटोऽग्निरुदकं चैव विषं कोशश्च पञ्चमः।
षष्ठं च तण्डुलाः प्रोक्तं सप्तमं तप्तमाषकाः॥
अष्टमं फालमित्युक्तं धर्मजं नवमं भवेत्।
दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयंभुवा॥

इति कथितेषु नवविधेषु दिव्येषु मध्ये तुलादीनि एतानि पञ्च दिव्यानि महाभियोगेष्वेव सुवर्णस्तेयादिष्वेव शीर्षकस्थ एवाऽभियोक्तरि च सति विशुद्धये; सन्देहनिवृत्तये इह धर्मशास्त्रे विहितानि। शीर्षकं दिव्यकर्तुर्जयपक्षे स्वदण्डस्वीकारः। अथ 'कोशमल्पेपि दा-

(१) लिखितपरिचिह्नित ग०। (२) उत्तमर्णं अध ख०।

पये'दिति स्मरणादल्पाभियोगे कोशोऽस्त्येवेति चेत्सत्यम् । परन्तु—

अवष्टम्भाभियुक्तानां धटादीनि विनिर्दिशेत् ।
तण्डुलाश्चैव कोशश्च शङ्कास्वेव न संशयः ॥

इति वचनेनाऽवष्टंभाभियोगे कोशाभावस्योक्तस्य शीर्षकस्थेऽभियोक्तरि सत्यपवादार्थमिह कोशग्रहणमिति । यत्तु—

शिरोवादिविहीनानि दिव्यानि परिवर्जयेत् ।
चत्वारि तु धटादीनि कोशश्चैवाऽशिराः स्मृतः ॥

इति पितामहेन कोशस्य शिरोवादविहीनत्वमुक्तं तच्छङ्काभियोगपरम् ॥ ९५ ॥

(मिता०) लिखितसाक्षिभुक्तिलक्षणं त्रिविधं मानुषं प्रमाणमुक्तम् । अथाऽवसरप्राप्तं दिव्यं प्रमाणमभिधास्यन् तुलाग्न्याप इत्यादिभि(१)राद्यैः पञ्चभिः श्लोकैर्दिव्यमातृकां कथयति । तत्र तावद्दिव्यान्युपदिशति—

तुलेति । तुलादीनि कोशान्तानि पञ्च दिव्यानीह धर्मशास्त्रे विशुद्धये सन्दिग्धस्यार्थस्य संदेह(२)निवृत्तये दातव्यानीति ॥

(मिता०) न(३)न्वन्यत्रान्यान्यपि तण्डुलादीनि दिव्यानि सन्ति 'धटोऽग्निरुदकं चैव विषं कोशस्तथैव च । तण्डुलाश्चैव दिव्यानि सप्तमस्तप्तमाषकः' ॥ इति पितामहस्मरणात् । अतः कथमेतावन्त्येवेत्यत आह—

महेति । एतानि महाभियोगेष्वेव नान्यत्रेति नियम्यते न पुनरिमान्येव दिव्यानीति । महत्त्वावधिं च वक्ष्यति । नन्वल्पाभियोगेऽपि कोश(४) इष्यते—'कोशमल्पेऽपि दापयेत्' इति स्मरणात् । सत्यम् । कोशस्य तुलादिषु पाठो न महाभियोगेष्वेवेति नियमार्थः, किंतु सावष्टम्भाभियोगेऽपि प्राप्त्यर्थः । अन्यथा शङ्काभियोगे एव स्यात् । 'अवष्टम्भाभियुक्तानां धटादीनि विनिर्दिशेत् । तण्डुलाश्चैव कोशश्च शङ्कास्वेव न संशयः' ॥ इति स्मरणात् ॥

(मिता०) महाभियोगेषु शङ्कितेषु सावष्टम्भेषु चाऽविशेषेण प्राप्तावपवादमाह—

शीर्षक इति । एतानि तुलादीन्यभियोक्तरि शीर्षकस्थेऽभियुक्त-

(१) दिभिरारभ्य घ० । (२) संदिग्ध० । (३) अन्यत्रान्या ख० । (४) कोशोऽस्त्येव ग. ।

कस्य भवन्ति। शीर्षकं शिरो व्यवहारस्य चतुर्थः पादो जयपराजयलक्षणस्तेन च दण्डो लक्ष्यते तत्र तिष्ठतीति शीर्षकस्थः तत्प्रयुक्तदण्डभागित्यर्थः॥ ९५॥

(वी० मि०) 'साक्षिपूभयतः सत्सु साक्षिणः पूर्ववादिन' इत्युक्तं च, तत्र साक्षिपदं प्रमाणमात्रोपलक्षकमिति दिव्यवादिविशेषनियतत्वमभिप्रेतम्। 'न कश्चिदभियोक्तारं पुनर्दिव्ये नियोजये'दिति मनुनाप्युक्तम्। तदपवदति—

रुच्या वाऽन्यतरः कुर्यादितरो वर्तयेच्छिरः॥

वादिप्रतिवादिनोरुभयोर्यदीया दिव्यरुचिः, एवं तयोः करणे रुचिर्द्वयोरप्यरुचिर्वा तत्र साक्षिपूभयत इत्यादि वाच्यं यथाव्याख्यातं व्यवतिष्ठते॥

'शीर्षकस्थेऽभियोक्त्री'त्युक्तमपवदति—

विनाऽपि शीर्षकं कुर्यान्नृपद्रोहेऽथ पातके॥ ९६॥

नृपद्रोहाभिशङ्कायां पातके ब्रह्मवधादौ शङ्किते वा दिव्यानि शीर्षकं विना कुर्यात्। अथशब्देन चौर्यादिपरिग्रहः। तदुक्तं कालिकापुराणे—

परदाराभिशापे च चौर्यागम्यागमेषु च।
महापातकशस्तेषु स्याद्दिव्यं नृपशासने॥
विप्रतिपत्तौ विवादे च पण(१)स्य स्थापने कृते।
तत्रैव दा(२)पयेद्दिव्यं शिरःपूर्वं महीपतिः॥
परदाराभिगमने बहवो यत्र वादिनः।
शिरोहीनं भवेद्दिव्यमात्मसंशुद्धिकारणात्॥

विष्णुः—

राजद्रोहे साहसे च विना शीर्षप्रवर्तनात्।

पितामहः—

राजभिः शङ्कितानां च निर्दिष्टानां च दस्युभिः।
आत्मशुद्धिपराणां च दिव्यं देयं शिरो विना॥

(१) श्रवणास्थापने—इति मुद्रितबालंभट्टीटीकायाः पाठः।
(२) स्थापयेद्दिव्यं—इति क० ख० पुस्तकयोः पाठः।

नारदः—

अशिरांसि च दिव्यानि राजा भृत्येषु दापयेत् ।

यथा—

शिरोवस्थायिनि नरेऽभियोक्तर्युपस्थिते(?) ।
दिव्यप्रदानमुदितमन्यत्र नृपशासनात् ॥-॥९६॥

(मिता०) 'ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधन'मिति भावप्रतिज्ञावादिन एव (१)क्रियेति व्यवस्था दर्शिता । तदपवादार्थमाह—

रुच्येति । रुच्याभियोक्त्रभियुक्तयोः परस्परसंप्रतिपत्त्यान्यतरोऽभियुक्तोऽभियोक्ता वा दिव्यं कुर्यात् । इतरोऽभियुक्तो वा शिरः शारीरमर्थदण्डं वा वर्तयेदङ्गीकुर्यात् । अयमभिसन्धिः—न मानुषप्रमाणवद्दिव्यं प्रमाणं भावैकगोचरं, अपि तु (२)भावाभावावविशेषेण गोचरयति । अतश्च मिथ्योत्तरे प्रत्यवस्कन्दने प्राङ्न्याये वाऽर्थिप्रत्यर्थिनोरन्यतरस्येच्छया दिव्यं भवतीति ॥

(मिता०) अल्पाभियोगे महाभियोगे शङ्कासावष्टम्भयोरप्यविशेषेण कोशो (३)भवतीत्युक्तं, तुलादीनि विषान्तानि तु महाभियोगेष्वेव सावष्टम्भेष्वेवेति च नियमो दर्शितः । तत्रावष्टम्भाभियोगेष्वेवेत्यस्यापवादमाह—

विनेति । राजद्रोहाभिशङ्कायां ब्रह्महत्यादिपातकाभिशङ्कायां च शिरःस्थायिना विनापि तुलादीनि कुर्यात् महाचौर्याभिशङ्कायां च । यथाह—'राजभिः शङ्कितानां च निर्दिष्टानां च दस्युभिः । आत्मशुद्धिपराणां च दिव्यं देयं शिरो विना' ॥ इति । तण्डुलाः पुनरल्पचौर्यशङ्कायामेव । 'चौर्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः' इति पितामहवचनात् । तप्तमाषस्तु महाचौर्याभिशङ्कायामेव । 'चौर्यशङ्काभियुक्तानां तप्तमाषो विधीयते' इति स्मरणात् । अन्ये पुनः शपथा अल्पार्थविषयाः । 'सत्यं वाहनशस्त्राणि गोबीजकनकानि च । देवतापितृपादांश्च दत्तानि सुकृतानि च ॥ स्पृशेच्छिरांसि पुत्राणां दाराणां सुहृदां तथा । अभियोगेषु सर्वेषु(४) कोशपानमथापि वा ॥ इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणे' ॥ इति (५)नारदस्मरणात् ॥ यद्यपि मानुषप्रमाणानिर्णयस्य निर्णायकं यत्तद्दिव्यमिति लोकप्रसि-

(१) क्रियाव्यवस्था घ० । (२) भावाभावविशेषेणेति सर्वत्र पाठः । (३) भवतीति युक्तं घ० ।
(४) साध्येषु ग० सर्वेषु कोशपान घ० । (५) नारदादि ख--ग० ।

च्या शपथानामपि दिव्यत्वं तथापि कालान्तरनिर्णयनिमित्तत्वेन स-मन(१)न्तरनिर्णयनिमित्तेभ्यो घटादिभ्यो दिव्येभ्यो भेदत्वव्यपदेशो ब्राह्मणपरिव्राजकवत् । कोशस्य तु शपथत्वेऽपि घटादिषु पाठो म-हाभियोगविषयत्वेनावष्टम्भाभियोगविषयत्वेन च घटादिसाम्यान्न तु समनन्तरनिर्णयनिमित्तत्वेन । तण्डुलानां तप्तमाषस्य च समनन्त-रनिर्णयनिमित्तत्वेऽप्यल्पविषयत्वेन शङ्काविषयत्वेन च घटादिवैल-क्षण्यात्तेष्वपाठ इति सन्तोष्टव्यम् । एतानि च दिव्यानि शपथाश्च यथासंभवमृणादिषु विवादेषु प्रयोक्तव्यानि । यत्तु पितामहवचनम्–'स्थावरेषु विवादेषु दिव्यानि परिवर्जयेत्' इति, तदपि लिखित-सामन्तादिसद्भावे दिव्यानि परिवर्जयेदिति व्याख्येयम् । ननु विवा-दान्तरेष्वपि प्रमाणा(२)न्तरसम्भवे दिव्यानामनवकाश एव । सत्यम् । ऋणादिषु विवादेषु (३)उक्तलक्षणसाक्ष्युपन्यासेऽर्थिना कृतेऽपि प्रत्य-र्थी यदि दण्डाभ्युपगमावष्टम्भेन । दिव्यमवलम्बते तदा दिव्यमपि भवति । साक्षिणा(४)माशयदोषसम्भवाद्दिव्यस्य च निर्दोषत्वेन वस्तु तत्त्वविषयत्वात्तल्लक्षणत्वाच्च धर्मस्य । यथाह नारदः—'तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिणि । दैवसाध्ये पौरुषेयीं न लेख्यं वा-प्रयोजयेत्' ॥ इति । स्थावरेषु च विवादेषु प्रत्यर्थिना दण्डावष्टम्भे-न दिव्यावलम्बने कृतेऽपि सामन्तादिदृष्टप्रमाणसद्भावे न दिव्यं ग्रा-ह्यमिति विकल्पनिराकरणार्थं 'स्थावरेषु विवादेषु' इत्यादि पिताम-हवचनं नात्यन्तिकदिव्यनिराकरणार्थम् । लिखितसामन्ताद्यभावे स्थावरविवादेष्वनिर्णयप्रसङ्गात् ॥ ९६ ॥

(वी० मि०) दिव्यसामान्येतिकर्तव्यतामाह—

सचैलस्नातमाहूय सूर्योदय उपोषितम् ॥
कारयेत्सर्वदिव्यानि नृपब्राह्मणसन्निधौ ॥ ९७ ॥

सचैलस्नातं दिव्यकर्तारमुदिते सूर्ये प्राड्विवाक आहूय नृपस्य ब्राह्मणानां च सन्निधौ सर्वदिव्यानि कारयेत् । पितामहः—

त्रिरात्रोपोषिताय स्युरेकरात्रोषिताय वा ।
नित्यं दिव्यानि देयानि शुचये चार्द्रवाससे ॥

---

(१) नन्तरनिमित्तनिर्णयेभ्यो घ० । (२) न्तरसद्भावे घ० ।
(३) उक्तलक्षणे घ० । (४) माशयेद्दोष घ० ।

त्रिरात्रैकरात्रोपवासविकल्पः शक्त्यपेक्षो महाभियोगाल्पाभियोगभेदेन व्यवस्थितः। तथा—

> दिव्येषु सर्वकार्याणि प्राड्विवाकः समाचरेत्।
> अध्वरेषु यथाऽध्वर्युः सोपावसो नृपाज्ञया॥

अयं चोपवासः प्राड्विवाकस्य दिव्याङ्गदेवपूजापक्षे। अत्र यद्यपि सूर्योदय इत्यविशेषणोक्तं तथापि शिष्टाचाराद्दिवारादरः। नारदः—

> पूर्वाह्ण एव दिव्यस्य प्रदानं परिकीर्तितम्।

पितामहः—

> पूर्वाह्णेऽग्निपरीक्षा स्यात्पूर्वाह्णे तु धटो भवेत्।
> मध्याह्ने तु जलं देयं धर्मतत्त्वमभीप्सता॥
> दिवसस्य तु पूर्वाह्णे काल(१)शुद्धिर्विधीयते।
> रात्रौ तु पश्चिमे यामे विषं देयं सु(२)शीतलम्॥

तथा—

> चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव हि।
> एते साधारणा मासा दिव्यानामविरोधिनः॥
> धटः सर्वर्तुकः प्रोक्तो वाते वाति विवर्जयेत्।
> अग्निः शिशिरहेमन्तवर्षासु परिकीर्तितः॥
> शरद्ग्रीष्मेषु सलिलं हेमन्ते शिशिरे विषम्।

नारदः—

> न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम्।
> न प्रावृषि विषं दद्यात्प्रवाते न तुलां नृप॥

अत्र शीतशब्देन हेमन्तशिशिरवर्षाणां ग्रहणम्। उष्णपदेन शरद्ग्रीष्मयोर्ग्रहणम्। ज्यौतिषे—

> सिंहस्थे मकरस्थे च जीवे चाऽस्तमिते भृगौ।
> मलमासे न कर्तव्या परीक्षा जयकांक्षिणा॥
> रविशुद्धौ गुरोश्चैव न शुक्रेऽस्तङ्गते पुनः।
> सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः॥
> नाऽष्टम्यां न चतुर्दश्यां प्रायश्चित्तपरीक्षणम्।
> परीक्षा चाधिवासश्च शनिसोमदिने भवेत्॥

(१) कोशशुद्धि—इति मु० पु० पाठः। (२) सुशीतले—इति क० ख० पुस्तकयोः पाठः।

अत्र सङ्क्षेपतो दिव्यसामान्यविधिर्लिख्यते । शुक्लपक्षे शुभदिने कृतनित्यक्रियः सोपवासो यजमानः प्रथमं ब्राह्मणान् स्वस्तिवाच्य प्राड्विवाकमध्वर्युवद् वृणुयात् । वृतश्च प्राड्विवाकस्तडागोत्सर्गविधिना कृताधिवासनयागः सोपवासः परेद्युः कृतनित्यक्रियो रविवारेण—

एह्येहि भगवन्धर्म दिव्यमेतत्समाविश ।
सहितो लोकपालैस्त्वं वस्वादित्यमरुद्गणैः ॥

इति पठेत् । तत्र आर्द्रवासा दिव्यकर्ता यथाविहितं दिव्यं कुर्यात् । त्रिरात्रोपवासश्चात्र शक्तस्य दिव्यकर्तुरिति विशेषः ॥ ९७ ॥

(मिता०) दिव्ये साधारणविधिः—

सचैलमिति । किञ्च पूर्वेद्युरुपोषितमुदिते सूर्ये सचैलं स्नातं दिव्यग्राहिणमाहूय नृपस्य सभ्यानां ब्राह्मणानां च संनिधौ सर्वाणि दिव्यानि कारयेत्प्राड्विवाकः—'त्रिरात्रोपोषिताय स्युरेकरात्रोषिताय वा । नित्यं दिव्यानि देयानि शुचये चार्द्रवाससे' ॥ इत्युपवासविकल्पः पितामहेनोक्तो बलवद्बलवन्महाकार्याल्पकार्यविषयत्वेन व्यवस्थितो द्रष्टव्यः । उपवासनियमश्च कारयितुः प्राड्विवाकस्यापि—'दिव्येषु सर्वकार्याणि प्राड्विवाकः समाचरेत् । अध्वरेषु यथाध्वर्युः सोपवासो नृपाज्ञया' ॥ इति पितामहवचनात् ॥ अत्र यद्यपि सूर्योदय इत्यविशेषेणोक्तं तथापि शिष्टसमाचाराद्धानुवासरे दिव्यानि देयानि । तत्रापि—'पूर्वाह्णेऽग्निपरीक्षा स्यात्पूर्वाह्णे च घटो भवेत् । मध्याह्ने तु जलं देयं धर्मतत्त्वमभीप्सता ॥ दिवसस्य तु पूर्वाह्णे कोश(१)शुद्धिर्विधीयते । रात्रौ तु पश्चिमे यामे विषं देयं सुशीतलम्' । इति पितामहोक्तो विशेषो द्रष्टव्यः । अनुक्त(२)कालविशेषाणां तण्डुलतप्तमाषप्रभृतीनां पूर्वाह्ण एव प्रदानम् । 'पूर्वाह्णे सर्वदिव्यानां प्रदानं परिकीर्तितम्' इति सामान्येन नारदस्मरणात् । अहनि त्रिधा विभक्ते (३)पूर्वो भागः पूर्वाह्णो मध्यमो मध्याह्नः (४)उत्तरोऽपराह्णः । तथापरोऽपि कालविशेषो विधिप्रतिषेधमुखेन दर्शितः । विधिमुखस्तावत्—'अग्नेः शिशिरहेमन्तौ वर्षाश्चैव प्रकीर्तिताः । शरद्ग्रीष्मेषु सलिलं हेमन्ते शिशिरे विषम् ॥ चैत्रो मा·

(१) कोशसिद्धिः ख. । (२) अनुक्तवेला ग. घ. ।
(३) प्रथमो भागः. घ. । (४) उत्तमा घ.

र्गशिरश्चैव वैशाखश्च तथैव च । एते साधारणा मासा दिव्यानामविरोधिनः ॥ कोशस्तु सर्वदा देयस्तुला स्यात्सार्वकालिका' ॥ इति । कोशग्रहणं सर्वशपथानामुपलक्षणम् । तण्डुलानां पुनर्विशेषानभिधानात्सार्वकालिकत्वम् । प्रतिषेधमुखोऽपि-'न शीते तोय(१)शुद्धिः स्यान्नोष्णकालेऽग्निशोधनम् । न प्रावृषि विषं देयात्प्रवाते न तुलां तथा ॥ नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचन' ॥ इति । 'न शीते तोयशुद्धिः स्या'दित्यत्र शीतशब्देन हेमन्तशिशिरवर्षाणां ग्रहणम् । नोष्णकालेऽग्निशोधनमित्यत्रोष्णकालशब्देन ग्रीष्मशरदोः । विधानलब्धस्यापि पुनर्निषेध आदरार्थः । प्रयोजनं तु वक्ष्यते ॥ ९७ ॥

(वी० मि०) दिव्येषु कर्तृनियममाह—

तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम् ॥
अग्निर्जलं वा शूद्रस्य यवाः सप्त विषस्य वा ॥ ९ ॥

षोडशवर्षाभ्यन्तरवयस्कस्य, वृद्धस्य, अन्धस्य, पङ्गोर्ब्राह्मणस्य, रोगिणश्च तुला दिव्यम् । शूद्रस्य तु अग्निर्जलं वा विषस्य सप्तयवपरिमिता भागाश्चादेयाः । नारदः—

ब्राह्मणस्य धटो देयः क्षत्रियस्य हुताशनः ।
वैश्यस्य सलिलं देयं शूद्रस्य विषमेव च ॥
साधारणः समग्राणां कोशः प्रोक्तो मनीषिभिः ।
विषवर्जं ब्राह्मणस्य सर्वेषां वा तुला स्मृता ॥

कात्यायनः—

राजन्येऽग्निं धटं विप्रे वैश्ये तोयं नियोजयेत् ।
सर्वेषु सर्वदिव्यं वा विषवर्जं द्विजोत्तमे ॥
गोरक्षकान् वाणिजकाँस्तथा कारुकुशीलवान् ।
प्रेष्यान् वार्धुषिकांश्चैव ग्राहयेच्छूद्रवत् द्विजान् ॥

तथा—

न लोहशिल्पिनामग्निं सलिलं नाम्बुसेविनाम् ।
मन्त्रयोगविदां चैव विषं दद्यान्न तु क्वचित् ॥
दिव्यं तु वर्जयेन्नित्यमार्तानां तु गदैर्नृणाम् ॥
तण्डुलेन नियुञ्जीत व्रतिनं मुखरोगिणम् ।

---

(१) तोयसिद्धिः स्यात् ख. ।

व्रतिनं तण्डुलभक्षणव्रतवन्तम् । नारदः—

क्लीबातुरान् सत्त्वहीनान् परितापार्दितान्नरान् ।
बालवृद्धातुरार्दांश्च परीक्षेत घटे सदा ॥
नार्तानां तोयशुद्धिः स्यान्न विषं पित्तरोगिणाम् ।
श्वित्र्यन्धकुनखादीनां नाग्निकर्म विधीयते ॥
न मज्ज(१)नीयाः स्त्रीबालाः धर्मशास्त्रविशारदैः ।
रोगिणो ये च वृद्धाः स्युः पुमांसो ये च दुर्बलाः ॥
निरुत्साहान् व्याधि(२)जुष्टान्नार्तांस्तोये निमज्जयेत् ।
सद्यो म्रियन्ते मज्जन्तः स्वल्पप्राणा हि ते न(३)राः ॥
साहसेऽप्यागतानेतान्नैव तोये निमज्जयेत् ।
न चापि हारयेदग्निं न विषे परिशोधयेत् ॥

पितामहः—

मद्यपस्त्रीव्यसनिनां कितवानां तथैव च ।
कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः ॥

कात्यायनः—

देशकालविरोधे तु यथायुक्तं प्रकल्पयेत् ।
अन्येन हारयेद्दिव्यं विधिरेष विपर्यये ॥

विपर्ययोऽभियुक्तस्याऽसामर्थ्यम् । नारदः—

सव्रतानां भृशा(४)र्तानां व्याधिता(५)नां तपस्विनाम् ।
स्त्रीणां च न भवेद्दिव्यं यदि धर्मस्त्व(६)वेक्ष्यते ॥

कात्यायनः—

महापातकयुक्तेषु नास्तिकेषु विशेषतः ।
न देयं तेषु दिव्यं तु पापाभ्यासरते भृगुः ॥
येषु पापेषु दिव्यानि प्रतिषिद्धानि यत्नतः ।
भावयेत्सज्जनैस्तानि नाभिशस्तं जयेन्नृपः ॥–॥ ९८ ॥

(मिता०) अधिकारिव्यवस्थामाह—

तुलेति । स्त्री स्त्रीमात्रं जातिवयोवस्थाविशेषानादरेण । बाल

(१) न मज्जनीयं स्त्रीबालं–इति क० ख० पु० पाठः ।
(२) वाधितुष्टान्–इति ख० पु० पाठः । (३) रताः–इति क० पु० पाठः ।
(४) कृशार्तानाम्—इति क० ख० पु० पाठः । (५) व्याधिनां च—इति क० ख० पु० पाठः ।
(६) धर्मस्त्ववेक्षते—इति क० ख० पुस्तकयोः पाठः ।

आषोडशाद्वर्षाज्जातिविशेषानादरेण । वृद्धोऽशीतिकावरः । अन्धो नेत्रविकलः । पङ्गुः पादविकलः । ब्राह्मणो जातिमात्रम् । रोगी व्याधितः । एतेषां शोधनार्थं तुलैवेति नियम्यते । अग्निः फालस्तप्तमाषश्च क्षत्रियस्य । जलमेव वैश्यस्य । वाशब्दोऽवधारणे । विषस्य यवा उक्तपरिमाणाः सप्तैव शूद्रस्य शोधनार्थं भवन्ति । ब्राह्मणस्य तुलाविधानात् । 'शूद्रस्य यवाः सप्त विषस्य वा' इति विषविधानादग्निजले वेति क्षत्रियवैश्यविषयमुक्तम् । एतदेव स्पष्टीकृतं पितामहेन—'ब्राह्मणस्य घटो देयः क्षत्रियस्य हुताशनः । वैश्यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत्' ॥ इति । यत्तु स्त्र्यादीनां दिव्याभावस्मरणम्—'सव्रतानां भृशार्तानां व्याधितानां तपस्विनाम् । स्त्रीणां च न भवेद्दिव्यं यदि धर्मस्त्वपेक्षितः' ॥ इति, तत् 'रुच्या वान्यतरः कुर्यात्' इति विकल्पनिवृत्त्यर्थम् । एतदुक्तं भवति—'अवष्टम्भाभियोगेषु स्त्र्यादीनामभियोक्तृत्वेऽभियोज्यानामेव दिव्यम् । एतेषामभियोज्यत्वेऽप्यभियोक्तॄणामेव दिव्यम् । परस्पराभियोगे तु विकल्प एव । तत्रापि तुलैवेति कात्यायनवचनेन नियम्यते । तथा महापातकादिशङ्काभियोगे स्त्र्यादीनां तुलैवेति । एतच्च वचनं सर्वदिव्यसाधारणेषु मार्गशिरश्चैत्रवैशाखेषु स्त्र्यादीनां सर्वदिव्यसमवधाने नियामकतयार्थवत् । न च (१)सर्वकालं स्त्रीणां तुलैवेति । 'स्त्रीणां तु न विषं प्रोक्तं न चापि सलिलं स्मृतम् । घटकोशादिभिस्तासामन्तस्तत्त्वं विचारयेत्' ॥ इति विषसलिलव्यतिरिक्तघटकोशाग्न्यादिभिः शुद्धिविधानात् । एवं बालादिष्वपि योजनीयम् । (२)तथा ब्राह्मणादीनामपि न सार्वकालिकस्तुलादिनियमः—'सर्वेषामेव वर्णानां कोशशुद्धिर्विधीयते । सर्वाण्येतानि सर्वेषां ब्राह्मणस्य विषं विना' ॥ इति पितामहस्मरणात् । तस्मात्साधारणे काले बहुदिव्यसमवधाने तुलादिनियमार्थमेवेदं वचनम् । कालान्तरे तु तत्तत्कालविहितं सर्वेषाम् । तथा हि-वर्षास्वग्निरेव सर्वेषाम् । हेमन्तशिशिरयोस्तु क्षत्रियादित्रयाणामग्निविषयोर्विकल्पः । ब्राह्मणस्य त्वग्निरेव न कदाचिद्विषम् । 'ब्राह्मणस्य विषं विना' इति प्रतिषेधात् । ग्रीष्मशरदोस्तु सलिलमेव । येषां तु व्याधिविशेषेणाग्न्यादिनिषेधः—'कुष्ठिनां वर्ज-

(१) सार्वकाले ख. ।　　(२) यथा ख. ।

येदग्निं सलिलं श्वासकासिनाम् । पित्तश्लेष्मवतां नित्यं विषं तु परिवर्जयेत्' ॥ इति तेषामग्न्यादिकालेऽपि साधारणं तुला(१)घेव दिव्यं भवति । तथा—'तोयमग्निर्विषं चैव दातव्यं वलिनां नृणाम्' इति (२)वचनाद् दुर्वलानामपि सर्वथा विधिप्रतिषे(३)धादृतुकालानतिक्रमेण जातिवयो(४)वस्थाश्रितानि दिव्यानि देयानि ॥ ९८ ॥

(वी०मि०) द्रव्यसंख्याविशेषेण दिव्यविशेषानाह—

नासहस्राद्धरेत्फालं न विषं न तुलां तथा ॥
नृपार्थेष्वभिशापे च वहेयुः शुचयः सदा ॥ ९९ ॥

पणसहस्रादर्वाक् ऋणादौ विवादे न फालं न विषं न तुलां वा हरेत् । नृपार्थेषु नृपद्रोहविषयेषु विवादेषु अभिशापे पातकाभियोगे च सदा पूर्वोक्तसंख्यां विनापि शुचयः स्नानादिना शुद्धाः सन्तः फालादिकं दिव्यं वहेयुः । तथापदेनोदकं न हरेदिति समुच्चीयते । चकारेण साहससमुच्चयः । तथा च विष्णुः—'अथ समयक्रिया । राजद्रोहसाहसेषु यथाकामम् । निक्षेपस्तेयेष्वर्थप्रमाणम्' । समयो दिव्यं, यथाकामं राजेच्छानुसारेण । कात्यायनः—

दत्तस्यापन्हवो यत्र प्रमाणं तत्र कल्पयेत् ।
स्तेयसाहसयोर्दिव्यं स्वल्पेऽप्यर्थे प्रदापयेत् ॥

स्वल्पेऽपीति । यादृशि स्वल्पे ऋणादौ दिव्याभावस्तादृश्यपि धने स्तेयसाहयोर्दिव्यमित्यर्थः । बृहस्पतिः—

विषं सहस्रेऽपहृते पादोने च हुताशनः ।
त्रिभागोने च सलिलमर्द्धे देयो घटः सदा ॥
चतुःशताभियोगे तु दातव्यस्तप्तमाषकः ।
त्रिशते तण्डुला देयाः कोशश्चैव तदर्द्धके ॥
शते हृतेऽपन्हुते च दातव्यं धर्मशोधनम् ।
गोचरस्य प्रदातव्यं सभ्यैः फालावलेहनम् ॥
एषा संख्या निकृष्टानां मध्यानां द्विगुणा स्मृता ।
चतुर्गुणोत्तमानां च कल्पनीया परीक्षकैः ॥

विष्णुः—'सर्वेष्वेवार्थजातेषु मूल्यं कनकं कल्पयेत्' । तथा-

(१) दुर्वलानामिति सर्वदा घ. । (२) तुला दिव्यं ग. ।
(३) प्रतिषेधादृते उक्तकालानति ग. । (४) वस्थानाश्रितानि ख. ।

'सुवर्णार्द्धोने कोशो देयः शूद्रस्य । ततः परं यथार्हं धटाग्न्युदकविषाणामन्यतमम् । द्विगुणेऽर्थे यथाभिहिता समयक्रिया वैश्यस्य । त्रिगुणे राजन्यस्य कोशवर्जं चतुर्गुणे ब्राह्मणस्य । न ब्राह्मणस्य कोशं दद्यात् ।अन्यत्रागामिकालसमयवन्धनक्रियातः। कोश(१)स्थाने ब्राह्मणं सीतोद्धृतमहीकरमेव शापयेत् । प्राग्दृष्टदोषं स्वल्पेऽप्यर्थे दिव्यानामन्यतममेव कारयेत् । सत्सु विदितं सच्चरित्रं न महत्यर्थेऽपि' । अन्यत्रेति । अस्माभिर्मिलित्वा एवं कार्यमिति यत्र समयः कृतस्तस्मादन्यत्रेत्यर्थः । तत्र तु ब्राह्मणस्यापि कोशो देयः । सीता हलपद्धतिः ।
कात्यायनः—

(२)सर्वद्रव्यप्रमाणं तु ज्ञात्वा हेम प्रकल्पयेत् ।
हेमप्रमाणयुक्तं तु तत्र दिव्यं प्रयोजयेत् ॥
शेषे विषं तु पादोने हुतभुक् तत्र दृश्यते ।
आपस्त्रिभागहीने तु शतार्द्धे तु तुला स्मृता ॥
कोशपानं तदर्द्धे वा दशपञ्चकसप्तसु ।
तदर्द्धे तण्डुला देयास्तदर्द्धे तप्तमाषकाः ॥

शते सुवर्णस्य पादोने पञ्चसप्ततिमिते सुवर्णे । त्रिभागहीने तृतीयभागहीने सुवर्णशते । तदर्द्धे शतार्द्धे । दशपञ्चकसप्तस्विति । शतस्य दशमांशे पञ्चमांशे सप्तांशे वा कोशपानमित्यर्थः । अत्र चाऽल्पपरिमाणमपकृष्टविषयम् । वृद्धमनुः—

ज्ञात्वा संख्यां सुवर्णस्य शतनाशे विषं स्मृतम् ।
अशीतेस्तु विनाशे तु दद्याच्चैव हुताशनम् ॥
षष्ट्या नाशे जलं देयं स्याच्चत्वारिंशतो धटः ।
त्रिंशद्दशविनाशे वा कोशपानं बृहस्पतिः ॥
पञ्चार्द्धैकस्य नाशे वा तदर्द्धस्य च तण्डुलाः ।

त्रिंशदिति । त्रिंशद्विनाशे दशविनाशे वेत्यर्थः । पञ्चेति । पञ्चार्द्धस्य तदर्द्धस्य वा एकस्य वा नाशे कोशपानमित्यर्थः । इमानि वचनानि ऋणादिविषयाणि उत्सृष्टविषयाणि च । ग्रन्थकृद्वचनं तु स्तेयविषयमित्यविरोध इत्याहुः । इति दिव्यमातृका ॥ ९९ ॥

(मिता०) महाभियोगेष्वेतानीत्युक्तं, तत्राभियोगस्य (३)यदपेक्षं

(१) शोकस्थाने—इति ख० पु० पाठः । (२) पूर्व०—इति ख० पु० पाठः । (३) यदपेक्ष्य ख.ग. ।

महत्त्वं तदिदानीमाह—

नासहस्रादिति। पणसहस्रादर्वाक् फालं विषं तुलां वा न कारयेत्। मध्यवर्ति जलमपि। यथोक्तम्—'तुलादीनि विषान्तानि गुरुष्वर्थेषु दापयेत्' इति। अत्र कोशस्याग्रहणं 'कोशमल्पेऽपि दापयेत्' इत्यःल्पाभियोगेऽपि तस्य स्मरणात्। एतानि चत्वारि दिव्यानि पणसहस्रादूर्ध्वमेव भवन्ति नार्वागित्यर्थः। नन्वर्वागप्यग्न्यादीनि पितामहेन दर्शितानि—'सहस्रे तु घटं दद्यात्सहस्रार्धे तथायसम्। अर्धस्यार्धे तु सलिलं तस्यार्धे तु विषं स्मृतम्' ॥ इति। सत्यम्। त(१)त्रेत्थं व्यवस्था। यद्द्रव्यापहारे पातित्यं भवति तद्विषयं पितामहवचनं, इतरद्रव्यविषयं योगीश्वरवचनमिति। एतच्च वचनद्वयं स्तेयसाहसविषयम्। अपह्नवे तु विशेषो दर्शितः कात्यायनेन—'दत्तस्यापह्नवो यत्र प्रमाणं तत्र कल्पयेत्। स्तेयसाहसयोर्दिव्यं स्वल्पेऽप्यर्थे प्रदापयेत् ॥ सर्वद्रव्यप्रमाणं तु ज्ञात्वा हेम प्रकल्पयेत्। हेमप्रमाणयुक्तं तु तदा दिव्यं नियोजयेत् ॥ ज्ञात्वा संख्यां सुवर्णानां शतनाशे विषं स्मृतम्। अशीतेस्तु विनाशे वै (२)दद्याच्चैव हुताशनम् ॥ षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटम्। विं(३)शद्दशविनाशे तु कोशपानं विधीयते ॥ पञ्चाधिकस्य वा नाशे ततोऽर्धार्धस्य तण्डुलाः। ततोऽर्धार्धविनाशे हि स्पृशेत्पुत्रादिमस्तकान् ॥ ततोऽर्धार्धविनाशे हि लौकिक्यश्च क्रियाः स्मृताः। एवं विचारयन् राजा धर्मार्थाभ्यां न हीयते' इति। ज्ञात्वा संख्यां सुवर्णानामित्यत्र सुवर्णशब्दः 'षोडश माषाः सुवर्णः' इत्युक्तपरिमाणवचनः। नाशशब्दश्चात्रापह्नववचनः। नासहस्राद्धरेत्फालमित्यत्र तु ताम्रिकपणसहस्रं बोद्धव्यम् ॥

(मिता०) ननु नृपद्रोहे महापातके चैतानि दिव्यान्युक्तानि, तत्कथं नासहस्राद्धरेत्फालमित्यत्राह—

नृपार्थेष्विति। (४)नृपद्रोहे महापातकाभियोगे च सदा द्रव्यसंख्यामनपेक्ष्यैवैतानि दिव्यानि वहेयुः कुर्युरुपवासादिना शुचयः सन्तः। तथा देशविशेषोऽपि नारदेनोक्तः—'सभाराजकुलद्वारदेवायतनचत्वरे। निधेयो निश्चलः पूज्यो धूपमाल्यानुलेपनैः' ॥ इति। निधेयो घटः। व्यवस्था च कात्यायनेनोक्ता—'इन्द्रस्थानेऽभिशस्तानां

(१) तत्रैवं व्यवस्था घ.। (२) दद्यादेव ख.। (३) दद्यात्रिंशाद्विनाशे तु ग.। (४) नृपद्रोहेषु ख.।

महापातकिनां नृणाम् । नृपद्रोहे प्रवृत्तानां राजद्वारे प्रयोजयेत् ॥ प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे । (१)अतोऽन्येषु सभामध्ये दिव्यं देयं विदुर्बुधाः ॥ अस्पृश्याधमदासानां म्ले(२)च्छानां पापकारिणाम् । प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि ॥ तत्प्रसिद्धानि दिव्यानि संशये तेषु निर्दि(३)शेत्' ॥ इति ॥९९॥ इति दिव्यमातृका ॥

(वी० मि०) एवं सर्वदिव्योपयोगिनीं दिव्यमातृकामभिधायेदानीं घटादीनां दिव्यानां प्रत्येकं प्रयोगमाह प्रकरणसमाप्तिपर्यन्तेन—

तुलाधारणविद्भिरभियुक्तस्तुलास्थि(४)तः ॥
प्रतिमानसमीभूतो ले(५)ख्यं कृत्वाऽवतारितः ॥१००॥
त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता ॥
तत्सत्यं वद कल्याणि संशयान्मां विमोचय ॥ १०१ ॥
यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय ॥
शुद्धश्चेद्गमयोर्द्ध्वं मां तुलामित्यभिमन्त्रये(६)त् ॥ १०२ ॥

तुलाया धारणं तोलनं ये विदन्ति सुवर्णकारादयस्तैर्लेख्यं नाहं स्तेयमकारिषमित्यादिरूपं शिरसि कृत्वा प्रतिमानेन मृदादिना समीभूतस्तुलास्थितोऽभियुक्तो दिव्यकर्ताऽवतारितः सन् मामित्येतेन तुलामभिमंत्रयेत् अधिवासनदिनेऽनेन मंत्रेण प्रार्थयेत् । द्वितीयदिने पुनस्तुलितो दिव्यकर्ता यदि वर्द्धेत प्रतिमानादूर्ध्वं गच्छति तदा विशुद्धः अभियोगाभावनिश्चयविषयः स्यान्न पुनरभियोगसंशयः स्यात्प्रतिमानेन समोऽधोगतिर्वा यदि स्यात्तदा दिव्यकर्ता नरो न विशुद्धः पराजितो भवेत् । तुलित इत्यादिश्लोको लिखितः पितामहनाम्नैव मिताक्षरायाम् । मंत्रव्याख्या चैवम्—हे तुले त्वं सत्यस्य धाम स्थानमसि देवैर्ब्रह्मादिभिः पुरा आदिसृष्टौ विनिर्मितोत्पादिता तत्तस्माद्धेतोः हे कल्याणि सत्यं यथार्थं वद दर्शय, अस्मात् संश-

(१) ततोऽन्येषु तु कार्येषु सभामध्ये विदुर्बुधाः ग. । (२) म्लेच्छनामापकारिणां ग. । (३) दापयेत् ग. ।
(४) तुलाश्रितः—इति मुद्रितपुस्तके पाठः । (५) रेखां-इति मुद्रितपुस्तके पाठः ।
(६) एतदुत्तरं—'तुलितो यदि वर्धेत विशुद्धः स्यान्न संशयः । समो वा हीयमानो वा न विशुद्धो भवेन्नरः' ॥ इतीदं पद्यमधिकमुभयोरपि क० ख० पुस्तकयोर्विद्यते, परंतु व्याख्यानाभावादन्यत्राप्यनुपलब्धेरप्रसङ्गाच्चोपेक्ष्यते ।

यान्मां विमोचय । हे मातर्यद्यहं पापकृदसत्यवाद्यस्मि ततस्तदा मां त्वमधो नय, यद्यहं शुद्धः सत्यवाद्यस्मि तदा ऊर्ध्वं मां गमयेति । अत्र तुलापुरुषमहादानरीत्या किञ्चिद्विशेषसहितया निर्मितायां तुलायामधिवासनदिने स्वाभियोगाभावप्रतिज्ञालिखनानन्तरम्—

आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मस्य जानाति नरस्य वृत्तम् ॥

इति लिखित्वा तत्पत्रं शिरसि दत्त्वा प्रतिमानसमीकृतं दिव्यकर्तारं पठितोक्ताभिमंत्रणावाक्यं तुलया अवतार्य प्राड्विवाकः परेद्युः कृतनित्यक्रियः प्राङ्मुखः प्राञ्जलिर्देवान् 'एह्येहि भगवन् धर्मे'त्यादिप्रागुक्तमंत्रेण घटे अवाहयेत् । ततः पितामहोक्तक्रमेण देवानां पूजां कुर्यात् । तद्यथा—

इन्द्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा ।
वरुणं पश्चिमे भागे कुवेरं चोत्तरे तथा ॥
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ।
इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः ॥
कुबेरस्तु सुवर्णाभो वन्हिश्चापि सुवर्णभः ।
तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते ॥
ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान् ।
इन्द्रस्य दक्षिणे पार्श्वे वसूनाराधयेद् बुधः ॥
(१)धरो ध्रुवस्तथा सोम आपश्चैवाऽनिलोऽनलः ।
प्रत्यूषश्च प्रभास(२)श्च वसवोऽष्टौ प्रकीर्तिताः ॥
देवेशेशानयोर्मध्ये आदित्यानां तथा(३)यनम् ।
धाताऽर्य्यमा च मित्रश्च वरुणोंऽ(४)शो भगस्तथा ॥
इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ।
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥
इत्येते द्वादशाऽऽदित्या नामभिः परिकीर्तिताः ।
अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ॥

---

(१) धरा—इति ख० पु० पाठः ।
(२) प्रभावश्च—इति ख०, प्रभाषश्च—इति क० पुस्तकयोः पाठौ ।
(३) तथा गणम्—इति मिताक्षरायां पाठः, तथार्चनम्—इति बालंभट्टीपुस्तकस्थः पाठः ।
(४) वरुणोंऽशुर्भ०—इति मु० पु० पाठः, वरुणांशा इति क० ख० पुस्तकयोः पाठः ।

वीरभद्रश्च शंभुश्च गिरिशश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी चाऽपराजितः ॥
भुवनाधीश्वरश्चैव कपाली च विशांपतिः ।
स्थाणुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः ॥
प्रेतेशरक्षोमध्ये च मातृस्थानं प्रकल्पयेत् ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता ।
निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ॥
वरुणस्योत्तरे भागे (१)मरुतां स्थानमुच्यते ।
पवनः स्पर्शनो वायुरनिलो मारुतस्तथा ॥
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिताः ।
घटस्योत्तरभागे तु दुर्गामावाहयेद् बुधः ॥
एतासां देवतानां च स्वनाम्ना पूजनं विदुः ।
भूषावसानं धर्माय दत्त्वा चाऽर्घ्यादिकं क्रमात् ॥
अर्घ्यादि पश्चादङ्गानां भूषान्तं (२)परिकल्पयेत् ।
गन्धादिकां निवेद्यान्तां परिचर्यां प्रकल्पयेत् ॥

ततो वैदिकैश्चतुर्भिः ऋत्विग्भिस्तुलायाश्चतसृषु लौकिकेऽग्नौ प्रणवाद्यया गायत्र्या प्रणवस्वाहान्तया प्रत्येकमष्टोत्तरशतं समिदाज्यचरवो होतव्याः । ततः प्राड्विवाको धटमामंत्रयेत् । तत्र मंत्राः—

त्वं धट ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् ।
धकाराद्धर्ममूर्तिस्त्वं टकारात् कुटिलं नरम् ॥
धृतो भाव(३)यसे यस्माद्धटस्तेनाऽभिधीयसे ।
त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च ॥
त्वमेव देव जानीषे न विदुर्यानि मानवाः ।
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ॥
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ।

ततः शिरोगतपत्रकं दिव्यकर्तारं प्राड्विवाको विनाडीपञ्चकपर्यन्तं तुलायामारोप्य स्थापयेत् । विनाडी च—

दशगुर्वक्षरः प्राणः षट्प्राणः स्याद्विनाडिका ।

---

(१) मरुतां स्थानमित्यारभ्य—प्राणेशजीवौ चेत्यन्तं क० ख० पुस्तकयोर्नास्ति ।

(२) भूषान्तमुपकल्पयेत्–इति मिताक्षरायां पाठः । (३) भावयसे–इति क. ख. पुस्तकयोः पाठः ।

इति लक्षिता । तत ऊर्ध्वगं शुद्धत्वेन राजनियुक्ताः शुचयः पुरुषा वदेयुरिति संक्षेपः । अत्र तुलाकाष्ठपरिमाणादिकं विस्तरभयान्न लिख्यते । महादानेऽन्वेष्टव्यम् ॥ १००-१०२ ॥

(मिता०) एवं सर्वदिव्योपयोगिनीं दिव्यमातृकामभिधायेदानीं धटादिदिव्यानां प्रयोगमाह—

तुलाधारणेत्यादि । तुलाया धारणं तोलनं ये विदन्ति सुवर्णकारप्रभृतयस्तैः प्रतिमानेन मृदादिना समीभूतः समीकृतस्तुलामाश्रितोऽधिरूढोऽभियुक्तोऽभियोक्ता वा दिव्यकारी रेखां कृत्वा येन संनिवेशेन प्रतिमानसमीकरणदशायां शिक्यतलेऽवस्थितस्तस्मिन्पाण्डु-(१)लेखेनाङ्कयित्वावतारितस्तुलामभिमन्त्रयेत्प्रार्थयेतानेन मन्त्रेण । हे तुले, त्वं सत्यस्य स्थानमसि । पुरा आदिसृष्टौ देवैर्हिरण्यगर्भप्रभृतिभिर्विनिर्मितोत्पादिता । तत्तस्मात्सत्यं संदिग्धस्यार्थस्य स्वरूपं वद दर्शय । कल्याणि शोभने, अस्मात्संशयान्मां विमोचय । हे मातः, यद्यहं पापकृदसत्यवाद्यस्मि ततो मां त्वमधो नय । अथ शुद्धः सत्यवाद्यस्मि ततो मामूर्ध्वं गमयेति । प्राड्विवाकस्य तुलाभिमन्त्रणमन्त्रः(२) स्मृत्यन्तरोक्तः । अयं तु दिव्यकारिणः । जयपराजयलक्षणं तु मन्त्रलिङ्गादेवावगम्यत इति न पृथगुक्तम् । धटनिर्माणं पुनरारोहणाद्यर्थसिद्धमेव पितामहनारदादिभिः स्पष्टीकृतम् । तद्यथा—'छित्त्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्वकम् । प्रणम्य लोकपालेभ्यस्तुला कार्या मनीषिभिः ॥ मन्त्रः सौम्यो वानस्पत्यश्छेदने जप्य एव च । चतुरस्रा तुला कार्या दृढा ऋज्वी तथैव च ॥ कटकानि च देयानि त्रिषु स्थानेषु चार्थवत् । चतुर्हस्ता तुला कार्या पादौ चोपरि तत्समौ ॥ (३)अनन्तरं तयोर्हस्तो भवेद्ध्यर्धमेव च । (४)हस्तद्वयं निखेयं तु पादयोरुभयोरपि ॥ तोरणे च तथा कार्ये पार्श्वयोरुभयोरपि । धटादुच्चतरे स्यातां नित्यं दशभिरङ्गुलैः ॥ अवलम्बौ च कर्तव्यौ तोरणाभ्यामधोमुखौ । मृन्मयौ सूत्रसंबद्धौ धटमस्तकचुम्बिनौ ॥ प्राङ्मुखो निश्चलः कार्यः शुचौ देशे धटस्तथा । शिक्यद्वयं समासज्य पार्श्वयोरुभयोरपि ॥ प्राङ्मुखान्कल्पयेद्दर्भाञ्शिक्ययोरुभयोरपि । पश्चिमे तोलयेत्कर्तॄनन्यस्मिन्मृत्तिकां शुभाम् ॥ पि(५)-

---

(१) पाण्डुलेखः खडू इति प्रसिद्धः, पाण्डुलेख्येन ख. । (२) मन्त्राः स्मृत्यन्तरोक्ताः ग-घ. ।
(३) मान्तरं तु ख. । (४) निधेयं इति पाठः । (५) पिटकं वंशभाण्डविशेषः ।

टकं पूरयेत्तस्मिन्निष्टकाग्रावपांसुभिः' । अत्र च मृत्तिकेष्टकाग्रावपांसूनां विकल्पः । 'परीक्षका नियोक्तव्यास्तुलामानविशारदाः । वणिजो हे(१)मकाराश्च कांस्यकारास्तथैव च । कार्यः परीक्षकैर्नित्यमवलम्बः समो धटः ॥ उदकं च प्रदातव्यं धटस्योपरि पण्डितैः । यस्मिन्न प्लवते तोयं स विज्ञेयः समो धटः ॥ तोलयित्वा नरं पूर्वं पश्चात्तमवतार्य तु । धटं तु कारयेन्नित्यं पताकाध्वजशोभितम् ॥ तत आवाहयेद्देवान्विधिनानेन मन्त्रवित् । वादित्रतूर्यघोषैश्च गन्धमाल्यानुलेपनैः ॥ (२)प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् । एह्येहि भगवन्धर्म अस्मिन्दिव्ये समाविश ॥ सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः । आवाह्य तु धटे धर्मं पश्चादङ्गानि विन्यसेत् ॥ इन्द्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा । वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा ॥ अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् । इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः ॥ कुबेरस्तु सुवर्णाभो वह्निश्चापि सुवर्णभः । तथैव निर्ऋतिः श्यामो वायुर्धूम्रः प्रशस्यते ॥ ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान् । इन्द्रस्य दक्षिणे पार्श्वे वसूनाराधयेद् बुधः ॥ धरो (३)ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥ देवेशेशानयोर्मध्य (४)आदित्यानां तथा गणम् । धातार्यमा च मित्रश्च (५)वरुणोऽशुर्भगस्तथा ॥ इन्द्रो विवस्वान्पूषा च पर्जन्यो दशमः स्मृतः । ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ॥ इत्येते द्वादशादित्या नामभिः परिकीर्तिताः । (६)अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ॥ वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः—अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ॥ भुवनाधीश्वरश्चैव कपाली च विशां पतिः । स्थाणुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः ॥ प्रेतेशरक्षोमध्ये तु मातृस्थानं प्रकल्पयेत् । ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ वाराही चैव माहेन्द्री चामुण्डा गणसंयुता । निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ॥ वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते । प-

---

(१) हेमकारश्च कांस्यकारः, घ. । (२) प्राञ्जलिः प्राङ्मुखो भूत्वा घ. ।

(३) धूरुवोऽध्वरस्तथा सोमः ख. धरो धूरुवश्च सोमश्च घ. ।

(४) आदित्यानां तथायनं ग. आदित्याराधनं तथा घ. ।

(५) वरुणोंशो भग ग-घ. । (६) अग्नेः पश्चिमदिग्भागे रुद्राणां स्थापनं विदुः ग. ।

वनः स्पर्शनो वायुरनिलो मारुतस्तथा ॥ प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिताः । घटस्योत्तरभागे तु दुर्गामावाहयेद् बुधः ॥ एतासां देवतानां तु स्वनाम्ना पूजनं विदुः । भूषावसानं धर्माय दत्त्वा चार्घ्यादिकं क्रमात् ॥ अर्घ्यादि पश्चादङ्गानां भूषान्तमुपकल्पयेत् । गन्धादिकां (१)नैवेद्यान्तां परिचर्यां प्रकल्पयेत्' ॥ इति । अत्र च तुलां पताकाध्वजालंकृतां विधाय तस्यामेह्येहीति मन्त्रेण धर्ममावाह्य धर्मायार्घ्यं कल्पयामि नम इत्यादिना प्रयोगेणार्घ्यपाद्याचमनीयमधुपर्काचमनीयस्नानवस्त्रयज्ञोपवीताचमनीयमुकुटकटकादिभूषान्तं दत्त्वा इन्द्रादीनां दुर्गान्तानां प्रणवाद्यैः स्वनामभिश्चतुर्थ्यन्तैर्नमोन्तैरर्घ्यादिभूषान्तं पदार्थानुसमयेन दत्त्वा धर्माय गन्धपुष्पधूपदीपनैवेद्यादि दत्त्वा इन्द्रादीनां गन्धादीनि पूर्ववद्दद्यात् । गन्धपुष्पाणि च घटपूजायां रक्तानि कार्याणि । यथाह नारदः—'रक्तैर्गन्धैश्च माल्यैश्च दध्यपूपाक्षतादिभिः । अर्चयेत्तु घटं पूर्वं ततः शिष्टांस्तु पूजयेत्' ॥ इति । इन्द्रादीनां तु विशेषानभिधानाद्यथालाभं रक्तैरन्यैर्वा पूजनमिति पूजाक्रमः । एतच्च सर्वं प्राड्विवाकः कुर्यात् । यथोक्तम्—'प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः । श्रुतवृत्तोपसंपन्नः शान्तचित्तो विमत्सरः ॥ सत्यसन्धः शुचिर्दक्षः सर्वप्राणिहिते रतः । उपोषितः शुद्धवासाः कृतदन्तानुधावनः ॥ सर्वासां देवतानां च पूजां कुर्याद्यथाविधि' ॥ तथा ऋत्विग्भिश्चतुर्भिश्चतसृषु दिक्षु लौकिकाग्नौ होमः कार्यः । यथाह—'चतुर्दिक्षु तथा होमः कर्तव्यो वेदपारगैः । आज्येन हविषा चैव समिद्भिर्होमसाधनैः ॥ सावित्र्या प्रणवेनाथ स्वाहान्तेनैव होमयेत्' ॥ प्रणवादिकां गायत्रीमुच्चार्य पुनः स्वाहाकारान्तं प्रणवमुच्चार्य समिदाज्यचरून्प्रत्येकमष्टोत्तरशतं जुहुयादित्यर्थः । एवं हवनान्तां देवपूजां विधायानन्तरमभियुक्तमर्थं वक्ष्यमाणमन्त्रसहितं पत्रे लिखित्वा तत्पत्रं शोध्य शिरोगतं कुर्यात् । यथाह--'य(२)दर्थमभियुक्तः स्याल्लिखित्वा तं तु पत्रके । मन्त्रेणानेन सहितं तत्कार्यं तु शिरोगतम्' ॥ मन्त्रश्चायम्--'आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्' ॥ इति । एतच्च धर्मावाहनादि शिरसि पत्रारोपणान्तमनुष्ठानकाण्डं

(१) निवेद्यान्तां परिचर्यां ग-घ. । (२) यं चार्थमभियुक्तः स्यात् घ. ।

सर्वदिव्यसाधारणम् । यथोक्तम्--'इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत् । आवाहनं च देवानां तथैव परिकल्पयेत्' ॥ इति । अनन्तरं प्राड्विवाको घटमामन्त्रयेत्—'घटमामन्त्रयेच्चैव विधिनानेन शास्त्रवित्' इति स्मरणात् । मन्त्राश्च दर्शिताः—'त्वं घट ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् । धकाराद्धर्ममूर्तिस्त्वं टकारात्कुटिलं नरम् ॥ धृतो भावयसे यस्माद्घटस्तेनाभिधीयसे । त्वं वेत्सि सर्व(१)जन्तूनां पापानि सुकृतानि च ॥ (२)त्वमेव देव जानीषे न विदुर्यानि मानवाः । व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ॥ तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि' ॥ इति । शोध्यस्तु 'त्वं तुले' इत्यादिना पूर्वोक्तेन मन्त्रेण तुलामामन्त्रयेत् । अनन्तरं प्राड्विवाकः शिरोगतपत्रकं शोध्य यथास्थानं निवेश्य(३) च घटमारोपयति—'पुनरारोपयेत्तस्मिञ्छिरोवस्थितपत्रकम्' इति स्मरणात् । आरोपितं च विनाडीपञ्चकं यावत्तथैवावस्थापयेत् । तत्कालपरीक्षां च ज्योतिःशास्त्राभिज्ञः कुर्यात्—'ज्योतिर्विद्ब्राह्मणः श्रेष्ठः कुर्यात्कालपरीक्षणम् । विनाड्यः पञ्च विज्ञेयाः परीक्षाकालकोविदैः' ॥ इति स्मरणात् । दशगुर्वक्षरोच्चारणकालः प्राणः । षट्प्राणा विनाडी । उक्तं च—'दशगुरुवर्णः प्राणः षट्प्राणा स्याद्विनाडिका तासाम् । षष्ट्या घटी घटीनां (४)षष्ट्याहः खाग्निभिर्दिनैर्मासः' ॥ इति । तस्मिंश्च काले (५)शुद्ध्यशुद्धिपरीक्षणार्थं शुचयः पुरुषा राज्ञा नियोक्तव्याः । ते च शुद्ध्यशुद्धी कथयन्ति । यथोक्तं पितामहेन--'साक्षिणो ब्राह्मणाः श्रेष्ठा यथादृष्टार्थवादिनः । ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु ॥ शंसन्ति साक्षिणः श्रेष्ठाः(६)शुद्ध्यशुद्धी नृपे तदा' ॥ इति । शुद्ध्यशुद्धिनिर्णयकारणं चोक्तम्--'तुलितो यदि वर्धेत स शुद्धः स्यान्न संशयः । समो वा हीयमानो वा न (७)स शुद्धो भवेन्नरः' ॥ इति । यत्तु पितामहवचनम्—'अल्पदोषः समो ज्ञेयो बहुदोषस्तु हीयते' इति, तत्र यद्यप्यभियुक्तस्यार्थस्याल्पत्वं बहुत्वं च न दिव्येनावधारयितुं शक्यते तथापि सकृदमतिपूर्वत्वेनाल्पत्वमसकृन्मतिपूर्वत्वेन च महत्त्वमिति दण्डप्रायश्चित्ताल्पत्वमहत्त्वमवधार्यते । यदा चानुपलक्ष्यमाणदृष्टकारण एव कक्षादीनां छेदो भङ्गो वा भवति तदाप्यशुद्धि-

(१) सर्वभूताना घ. । (२) त्वमेव सर्वं घ. । (३) यथानिवेशं च घ. ।
(४) षष्ट्याहोरात्र उक्तश्च ख. । (५) शोध्यशुद्धि ग. । (६) सर्वे घ. । (७) न विशुद्धो घ. ।

रेव । 'कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा । रज्जु(१)च्छेदेऽक्षभङ्गे वा तथैवाशुद्धिमादिशेत्' ॥ इति स्मरणात् । कक्ष्यं शिक्यतलम् । कर्कटौ तुलान्तयोः शिक्याधारावीषद्वक्रावायसकीलकौ कर्कटशृङ्गसन्निभौ । अक्षः पादस्तम्भयोरुपरि निविष्टस्तुलाधारपट्टः । यदा तु दृश्यमानकारणक एषां भङ्गस्तदा पुनरारोपयेत् । 'शिक्यादिच्छेद(२)भङ्गेषु पुनरारोपयेन्नरम्' इति स्मरणात् । ततश्च—'ऋत्विक्पुरोहिताचार्यान्दक्षिणाभिश्च तोषयेत् । एवं कारयिता राजा भुक्त्वा भोगान्मनोरमान् ॥ महतीं कीर्तिमाप्नोति ब्रह्मभूयाय कल्पते' ॥ यदा तूक्तलक्षणं घटं तथैव स्थापयितुमिच्छति तदा वायसाद्युपघातनिरासार्थं कपाटादिसहितां शालां कुर्यात् । 'विशालामुन्न(३)तां शुभ्रां घटशालां तु कारयेत् । यत्रस्था नोपहन्येत श्वभिश्चण्डालवायसैः ॥ तत्रैव लोकपालादीन्सर्वान्दिक्षु निवेशयत् । त्रिसन्ध्यं पूजयेदेतान्गन्धमाल्यानुलेपनैः ॥ कपाटबीजसंयुक्तां परिचारकरक्षिताम् । मृत्पानीयाग्निसंयुक्तामशून्यां कारयेन्नृपः' ॥ इति स्मरणात् । बीजानि यवव्रीह्यादीनि ॥ १००–१०१–१०२ ॥ इति घटविधिः ॥

(वी० मि०) इदानीं क्रमप्राप्तमग्निविधिमाह—

करौ विमृदित(४)व्रीहीं लक्षयित्वा ततो न्यसेत् ॥
सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत् ॥ १०३ ॥
त्वमग्ने सर्वभूतानामन्तश्चरसि पावक ॥
साक्षिवत्पुण्यपापे(५)भ्यो ब्रूहि सत्यं कवे मम ॥ १०४ ॥
तस्येत्युक्तवतो लौहं पञ्चाशत्पलिकं समम् ॥
अग्निवर्णं न्यसेत्पिण्डं हस्तयोरुभयोरपि ॥ १०५ ॥
स तमादाय सप्तैव मण्डलानि शनैर्व्रजेत् ॥
षोडशाङ्गुलकं ज्ञेयं मण्डलं तावदन्तरम् ॥ १०६ ॥
मुक्त्वाऽग्निं मृदितव्रीहिरदग्धः शुद्धिमाप्नुयात् ॥
अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेत् ॥ १०७ ॥

---

(१) छेदे च भङ्गे च घ. । (२) भङ्गे तु घ. । (३) मुच्छ्रितां घ. ।
(४) व्रीहेर्लक्ष०—इति मु. पु. पाठः । (५) पापेषु—इति ख. पु. पाठः ।

ततो दिव्यमातृकोक्तसाधारणधर्मतुलाविध्युक्तधर्मावाहनाद्यनन्तरं विमृदिता विघर्षिता व्रीहयो याभ्यां तादृशौ करौ लक्षयित्वा प्राड्विवाकाञ्जलीकृतयोर्हस्तयोरश्वत्थस्य पिप्पलस्य सप्त पत्राणि शुक्लानि ग्राह्यानि ।

वेष्टयीत सितैर्हस्तौ सप्तभिः सूत्रतन्तुभिः ।

इति । नारदवचनात् । अत्र—

शम्यक्षतं तथा दूर्वान् दत्त्वा पत्रेषु विन्यसेत् ।

इति विशेषः स्मृत्यन्तरेऽभिहितः । नारदः—

हस्तक्षतेषु सर्वेषु कुर्याद्धंसपदानि च ।
तान्येव पुनरालक्ष्येद्धस्तौ विन्दुविचित्रितौ ॥
ततश्च सप्त पत्राणि सप्तसूत्रेण वेष्टयेत् ।

ततः 'त्वमग्न' इत्यादिश्लोकमुक्तवतो दिव्यकर्तुर्हस्तयोरपिशब्दादुपरिस्थिताश्वत्थपत्रेषु पञ्चाशत्पलसंमितं सममास्रिरहितं लौहं लोहमयं पिण्डमग्निवर्णं न्यसेत् । मन्त्रार्थस्तु–हे अग्ने ! पावक ! शुद्धिहेतो कवे मनीषिन् ! सर्वभूतानां सर्वेषां प्राणिनामन्तः शरीराभ्यन्तरे चरासि अन्नपानादिपावनाय सञ्चरसि । पुण्यपापेभ्य इति ल्यब्लोपे पञ्चमी । पुण्यपापान्यवेक्ष्य साक्षिवन्मम सत्यं ब्रूहि दर्शय इति । अत्र स्मृतिः—

अग्निवर्णमयःपिण्डमस्फुलिङ्गं सुलक्षितम् ।
पञ्चाशत्पलिकं भूयः कारयित्वा शुचिर्द्विजः ॥
तृतीयतापे तप्यन्तं ब्रूयात्सत्यपुरस्कृतः ।
शृणिवमं मानवं धर्मं लोकपालैरधिष्ठितम् ॥
त्वमग्ने सर्वभूतानामन्तश्चरसि साक्षिवत् ।
त्वमेवाऽग्ने विजानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानवः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ॥

स दिव्यकर्ता तं लौहपिण्डमादाय सप्तमण्डलानि शनैर्लघुलघु व्रजेत् । एवकारेण मण्डलेष्वेकपदन्यासं मण्डलानतिक्रमणं च दर्शयति । यथाह पितामहः—

न मण्डलमतिक्रामेन्नाप्यर्वाक् स्थापयेत्पदम् ।
अष्टमं मण्डलं गत्वा नवमे निक्षिपेद् बुधः ॥

इति । मण्डलं च प्रत्येकं षोडशाङ्गुलप्रमाणं, षोडशाङ्गुलपरिमितमण्डलान्तरव्यवधानवच्च ज्ञेयम् । अथाऽष्टमे मण्डले स्थितो दिव्यकर्ता अग्निमग्निवर्णं लोहपिण्डं नवममण्डले मुक्त्वा कराभ्यां मृदितव्रीहिरप्यदग्धः दाहजनितविकारशून्यश्चेत्तदा शुद्धिं प्रतिज्ञातार्थविजयमाप्नुयात् । यदि तु अम्बराष्टमण्डलादर्वागेव लौहपिण्डः पतति दग्धत्वाऽदग्धत्वयोः संशयो वा भवति तदा पुनः पूर्वोक्तरीत्यैव लौहपिण्डं हस्ताभ्यां हरेदिति । तदयमत्र क्रमः—पूर्वेदिने कृतोपवासाधिवासनादिर्दिव्यकर्ता उत्तरदिने 'एह्येहि भगवन् धर्मे'त्यादिना धर्ममावाह्य शिरसि धटवत्पत्रं स्थापयित्वा नवसु मण्डलेषु षोडशाङ्गुलप्रमाणेषु प्रत्येकं षोडशाङ्गुलान्तरालेषु तण्डुलचूर्णादिना कारितेषु प्रथममण्डले स्थितो हस्तपरीक्षायां कृतायां व्रणस्थानान्यलक्तकेनाङ्कयित्वा वारत्रयं लोहपिण्डे तप्ते प्राड्विवाकेन 'शृण्विमं मानवं धर्म'मित्यादिनाऽभिमन्त्रिते सति हस्तयोः सप्ताऽश्वत्थपत्राणि न्यस्य सप्तभिः शुक्लसूत्रैरश्वत्थपत्रसहितौ हस्तौ यवदूर्वाशमीयुतौ वेष्टयित्वाऽग्निवर्णं लोहपिण्डं तदुपरि धृत्वा क्रमेणाऽपराणि षट् मण्डलानि पादाभ्यामाक्रम्याऽष्टमे स्थितो नवमे लोहं क्षिपेदिति । ततः कराभ्यां मृदितव्रीहिर्निरूपितादग्धभावः शुद्धो व्यवहर्तव्यः । करभिन्नेऽङ्गे दग्धोऽपि शुद्ध एव । १०३–१०७ ॥

(मिता०) इदानीं क्रमप्रा(१)प्तमग्निदिव्यमाह—

कराविति । दिव्यमातृकोक्तसाधारणधर्मेषु सत्सु तुलाविधानोक्तधर्मावाहनादिशिरःपत्रारोपणान्ते च विध्यन्ते सत्ययमग्निविधौ विशेषः । विमृदितव्रीहेर्विमृदिता विघर्षिता व्रीहयः कराभ्यां येनासौ विमृदितव्रीहिस्तस्य करौ लक्षयित्वा तिलकालकव्रणकिणादिस्थानेष्वलक्तकरसादिनाङ्कयित्वा । यथाह नारदः—'हस्तक्षतेषु सर्वेषु कुर्याद्धंसपदानि तु' इति । अनन्तरं सप्ताश्वत्थस्य प(२)र्णानि हस्तयोरञ्जलीकृतयोर्न्यसेत् । 'पत्रैरञ्जलिमापूर्य आश्वत्थैः सप्तभिः समैः' इति स्मरणात् । तानि च ह(३)स्तसहितानि सूत्रेण तावद्वेष्टयेत् । यावन्त्यश्वत्थपर्णानि सप्तकृत्वो वेष्टयेदित्यर्थः । सूत्राणि च सप्त शुक्लानि भवन्ति—'वेष्टयीत सितैर्हस्तौ सप्तभिः सूत्रतन्तुभिः' इति नारदवचनात् । तथा सप्त शमीपत्राणि सप्तैव दूर्वापत्राणि चाक्षतांश्च

(१) अग्निविधि ग. । (२) पत्राणि घ. । (३) स्वहस्तसहितानि घ. ।

दध्यक्तानक्षतांश्चाश्वत्थपत्राणामुपरि विन्यसेत् । 'सप्त पिप्पलपत्राणि शमीपत्राण्यथाक्षतान् । दूर्वायाः सप्त पत्राणि दध्यक्तांश्चाक्षतान्न्यसेत्' ॥ इति स्मरणात् । तथा कुसुमानि च विन्यसेत् । 'सप्त पिप्पलपत्राणि अक्षतान्सुमनो दधि । हस्तयोर्निक्षिपेत्तत्र सूत्रेणावेष्टनं तथा' ॥ इति पितामहवचनात् । सुमनसः पुष्पाणि । यदपि स्मरणम्—'अयस्तप्तं तु पाणिभ्यामर्कपत्रैस्तु सप्तभिः । (१)अन्तर्हितं हरन् शुद्धस्त्वदग्धः सप्तमे पदे' ॥ इति तदश्वत्थपत्राभावेऽर्कपत्रविषयं वेदितव्यम् । अश्वत्थपत्राणां पितामहप्रशंसावचनेन मुख्यत्वावगमात् । 'पिप्पलाज्जायते वह्निः पिप्पलो वृक्षराट् स्मृतः । अतस्तस्य तु पत्राणि हस्तयोर्विन्यसेद् बुधः' ॥ इति ॥ १०२ ॥

(मिता०) कर्तुरग्न्यभिमन्त्रणमाह—

त्वमिति । हे अग्ने, त्वं सर्वभूतानां जरायुजाण्डजस्वेदजोद्भिज्जानामन्तः शरीराभ्यन्तरे चरसि उपभुक्तान्नपानादीनां पाचकत्वेन वर्तसे । पावक शुद्धिहेतो, कवे क्रान्तदर्शिन् , साक्षिवत्पुण्यपापेभ्यः सत्यं ब्रूहि । पुण्यपापेभ्य इति ल्यब्लोपे पञ्चमी । पुण्यपापान्यवेक्ष्य सत्यं ब्रूहि दर्शयेत्यर्थः । अयःपिण्डे त्रिभिस्तापैः सन्तप्ते सन्दंशेन पुरत आनीते कर्ता पश्चिममण्डले प्राङ्मुखस्तिष्ठन् अनेन मन्त्रेणाग्निमभिमन्त्रयेत् । यथाह नारदः—'अग्निवर्णमयःपिण्डं सस्फुलिङ्गं सुरञ्जितम् । तापे तृतीये सन्ताप्य ब्रूयात्सत्यपुरस्कृतम्' ॥ इति । अस्यार्थः-लोहशुद्ध्यर्थं सुतप्तं लोहपिण्डमुदके निक्षिप्य पुनः सन्ताप्योदके निक्षिप्य तृतीये तापे सन्ताप्य सन्दंशेन गृहीत्वा पुरत आनीते सत्यपुरस्कृतं सत्यशब्दयुक्तं 'त्वमग्ने सर्वभूताना'मित्यादिमन्त्रं कर्ता ब्रूयादिति । प्राड्विवाकस्तु मण्डलभूभागाद्दक्षिणप्रदेशे लौकिकमग्निमुपसमाधाय अग्नये पावकाय स्वाहेत्याज्येनाष्टोत्तरशतवारं जुहुयात् । 'शान्त्यर्थं जुहुयादग्नौ घृतमष्टोत्तरं शतम्' इति स्मरणात् । हुत्वा च तस्मिन्नग्नावयःपिण्डं प्रक्षिप्य तस्मिंस्ताप्यमानं धर्मावाहनादिहवनान्तं पूर्वोक्तं विधाय तृतीये तापे वर्तमाने अयःपिण्डमग्निमेभिर्मन्त्रैरभिमन्त्रयेत्—'त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे । त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम् ॥ जठरस्थो हि भूतानां ततो वेत्सि शुभाशुभम् । पापं पुनासि वै यस्मात्तस्मात्पावक उच्य-

---

(१) अन्तर्हितं रहःशुद्धं ख. अन्तर्हितैर्हरन् ग. ।

ते ॥ पापेषु दर्शयात्मानमर्चिष्मान्भव पावक । अथवा शुद्धभावेषु शीतो भव हुताशन ॥ त्वमग्ने सर्वदेवानामन्तश्चरसि साक्षिवत् । त्वमेव देव जानीषे न विदुर्यानि मानवाः ॥ व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति । तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि' ॥ इति ॥ १०४ ॥

(मिता०) अपिच--

तस्येति । तस्य कर्तुरित्युक्तवतस्त्वमग्ने सर्वभूतानामित्यादिभिरभिमन्त्रणं कृतवतो लौहं लोहविकारं पिण्डं पञ्चाशत्पलिकं पञ्चाशत्पलसंमितं सममस्रिरहितम् । सर्वतश्च समं वृत्तं श्लक्ष्णं तथाष्टाङ्गुलायामम् । 'अस्रिहीनं समं कृत्वा अष्टाङ्गुलमयोमयम् । पिण्डं तु तापयेदग्नौ पञ्चाशत्पलिकं समम्' ॥ इति पितामहस्मरणात् । अग्निमर्णमग्निसदृशमुभयोर्हस्तयोरश्वत्थपत्रदधिदूर्वाद्यन्तरितयोर्न्यसेन्निक्षिपेत्प्राड्विवाकः ॥ १०५ ॥

(मिता०) ततः किं कुर्यादित्यत आह—

स इति । स पुरुषस्तं तप्तलोहपिण्डं अञ्जलिना गृहीत्वा सप्त मण्डलानि शनैर्व्रजेत् । एवकारेण मण्डलेष्वेव पदन्यासं मण्डलानतिक्रमणं च दर्शयति । यथाह पितामहः--'न मण्डलमतिक्रामेन्नाप्यर्वाक् स्थापयेत्पदम्' इति ॥

(मिता०) सप्तैव मण्डलानि शनैर्व्रजेदित्युक्तं तत्रैकैकं मण्डलं किंप्रमाणकं मण्डलयोरन्तरं च कियत्प्रमाणकमित्यत आह--

षोडशाङ्गुलकमिति । षोडश अङ्गुलानि यस्य तत्षोडशाङ्गुलकम् । षोडशाङ्गुलप्रमाणं मण्डलं बोद्धव्यम् । मण्डलयोरन्तरं मध्यं च तावदेव षोडशाङ्गुलकमेव । सप्त मण्डलानि व्रजेदिति वदता प्रथममवस्थानमण्डलमेकमुक्तम् । अतश्चाष्ट मण्डलानि षोडशाङ्गुलकानि मण्डलानामन्तराणि मध्यानीत्यर्थः । मण्डलान्तराणि तु सप्त तावत्प्रमाणानि । एतदेव नारदेन परिसं(१)ख्यायोक्तम्—'द्वात्रिंशदङ्गुलं प्राहुर्मण्डलान्मण्डलान्तरम् । अष्टाभिर्मण्डलैरेवमङ्गुलानां शतद्वयम् । चत्वारिंशत्समधिकं भूमेरङ्गुलमानतः' ॥ इति । अयमर्थः-अवस्थानमण्डलात्षोडशाङ्गुलान्मण्डलान्तरमन्यन्मण्डलम् । द्वितीयाद्येकमेकं द्वात्रिंशदङ्गुलं सान्तरालं तदेवमवस्थानमण्डलं षोडशाङ्गु-

(१) परिसंख्ययोक्तम् ख. ग. ।

लम् । गन्तव्यानि च सप्त मण्डलानि सान्तरालानि द्वात्रिंशदङ्गुलानि । एवमष्टाभिर्मण्डलैश्चत्वारिंदशाधिकं शतद्वयं भूमेरङ्गुलमानतोऽङ्गुलमानमिति सार्वविभक्तिकस्तासिः । अस्मिंस्तु पक्षेऽवस्थानमण्डलं षोडशाङ्गुलं विधाय (१)द्वात्रिंशदङ्गुलप्रमाणानां सप्तानां सान्तरालमण्डलभूभागानामेकमेकं भूभागं द्विधा विभज्यान्तरालभूभागान्षोडशाङ्गुलप्रमाणान्विहाय मण्डलभूभागेषु षोडशाङ्गुलप्रमाणेषु गन्तृपदप्रमाणानि सप्त मण्डलानि कार्याणि । यथा तेनैवोक्तम्—'मण्डलस्य प्रमाणं तु कुर्यात्तत्पदसंमितम्' इति । यत्तु पितामहेनोक्तम्—'कारयेन्मण्डलान्यष्टौ पुरस्तान्नवमं तथा । आग्नेयं मण्डलं चाद्यं द्वितीयं वारुणं स्मृतम् ॥ तृतीयं वायुदैवत्यं चतुर्थं यमदैवतम् । पञ्चमं त्विन्द्रदैवत्यं षष्ठं कौबेरमुच्यते ॥ सप्तमं सोमदैवत्यं सावित्रं त्वष्टमं तथा । नवमं सर्वदैवत्यमिति दिव्यविदो विदुः ॥ द्वात्रिंशदङ्गुलं प्राहुर्मण्डलान्मण्डलान्तरम् । अष्टाभिर्मण्डलैरेवमङ्गुलानां शतद्वयम् ॥ षट्पञ्चाशत्समधिकं भूमेस्तु परिकल्पना । कर्तुः पदसमं कार्यं मण्डलं तु प्रमाणतः ॥ मण्डले मण्डले देयाः कुशाः शास्त्रप्रचोदिताः' ॥ इति । तत्र(२) नवमं सर्वदैवत्यमपरिमिताङ्गुलप्रमाणं मण्डलं विहायाष्टाभिर्मण्डलैरष्टाभिश्चान्तरालैः प्रत्येकं षोडशाङ्गुलप्रमाणैरङ्गुलानां षट्पञ्चाशदधिकं शतद्वयं संपद्यते । तत्रापि गन्तव्यानि सप्तैव मण्डलानि । यतः प्रथमे तिष्ठति नवमे क्षिपतीति न विरुध्यते । अङ्गुलप्रमाणं च—'तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः । प्रमाणमङ्गुलस्योक्तं वितास्तिर्द्वा(३)दशाङ्गुला ॥ हस्तो वितस्तिद्वितयं दण्डो हस्तचतुष्टयम् । तत्सहस्रद्वयं क्रोशो योजनं तच्चतुष्टयम्'॥ इति बोद्धव्यम् ॥ १०६ ॥

(मिता०) सप्त मण्डलानि गत्वा किं कर्तव्यमित्यत आह—

मुक्त्वेति । अष्टमे मण्डले स्थित्वा नवमे मण्डलेऽग्नितप्तमयःपिण्डं त्यक्त्वा व्रीही(४)न्कराभ्यां मर्दयित्वाऽदग्धहस्तश्चेच्छुद्धिमाप्नुयात् । दग्धहस्तश्चेदशुद्ध इत्यर्थसिद्धम् । यस्तु संत्रासात्प्रस्खलन्हस्ताभ्यामन्यत्र दह्यते तथाप्यशुद्धो न भवति । यथाह कात्या-

(१) द्वादशाङ्गुलप्रमाणानां घ० । (२) तन्नवमं ख. ग. ।
(३) द्वादशाङ्गुल: ख. । (४) कराभ्यां व्रीहीन् ख. ।

यनः—'प्रस्खलन्नभिशस्तश्चेत्स्थानादन्यत्र दह्यते । अदग्धं ते विदुर्देवास्तस्य भूयोऽपि दापयेत्' ॥ इति ॥

(मिता०) अन्तरेति । यदा गच्छतोऽन्तराऽष्टममण्डलादर्वागेव पिण्डः पतति दग्धादग्धत्वे वा संशयस्तदा पुनर्हरेदित्यर्थप्राप्तमुक्तम् । तत्र चायमनुष्ठानक्रमः । पूर्वेद्युर्भूशु(१)द्धिं विधायापरेद्युर्मण्डलानि यथाशास्त्रं निर्माय मण्डलाधिदेवताश्च मन्त्रैस्तत्र तत्र संपूज्याग्निमुपसमाधाय शान्तिहोमं निर्वर्त्याग्नावयःपिण्डं निधाय धर्मावाहनादिसर्वदेवतापूजां हवनान्तां निवर्त्य उपोषितस्य स्नातस्यार्द्रवाससः पश्चि(२)मे मण्डले तिष्ठतो व्रीहिमर्दनादिकरसंस्कारं विधाय प्रतिज्ञापत्रं समन्त्रकं कर्तुः शिरसि बद्ध्वा प्राड्विवाकस्तृतीये तापेऽग्निमभिमन्त्र्य तप्तमयःपिण्डं सन्दंशेन(३) गृहीत्वा कर्त्रभिमन्त्रितं तस्याञ्जलौ निदध्यात् । सोऽपि मण्डलानि सप्त गत्वा नवमे मण्डले प्रक्षिप्यादग्धः शुद्धो भवतीति ॥ १०७ ॥ इत्यग्निविधिः ।

(वी० मि०) अथ क्रमप्राप्तमुदकविधिमाह—

सत्येन माऽभिरक्ष त्वं वरुणेत्यभि(४)गाय कम् ॥
नाभिदघ्नोदकस्थस्य गृहीत्वोरुं (५)जलं विशेत् ॥ १०८ ॥

समकालमिषुं मुक्तमानीयोऽन्यो जवी नरः ॥
गते तस्मिन्निमग्नाङ्गं पश्येच्चेच्छुद्धिमाप्नुयात् ॥ १०९ ॥

हे वरुण सत्येन त्वं मा मामभिरक्ष इति कं अभिप्रगाय अभिमन्त्र्य । क्वचित्तथैव पाठः । नाभिदघ्नं नाभिप्रमाणमुदकं तत्र स्थितस्य पुंसः ऊरुं गृहीत्वा जलं विशेत् जलं मज्जेत् । दिव्यकर्ता तस्मिन् जविन्येकस्मिन् गते सति जलमज्जनसमकालमुक्तमिषुमन्यो जवी नरः शरमोक्षणस्थानावस्थितो जवी वेगवान् आनीय निमग्नाङ्गं दिव्यकर्तारं यदि पश्येत्तदा स शुद्धिमाप्नुयात् । एतदुक्तं भवति मज्जनकाले मुक्तमेकं शरं गृहीतुं वेगशालिनि गतेऽनन्तरमुक्तं शरमन्यो वेगवानानयति ततो मग्नं चेत्पश्यति तदा स शुद्ध

(१) भूतशुद्धिं ख. । (२) पश्चिममण्डले ख. ग. । (३) संदंशकेन घ. ।
(४) शाप्य–इति मुद्रितपु० पाठः । (५) गृहीत्वोरू जले–इति मु० पु० पाठः ।

इति । तदयमत्र क्रमः—

गन्धमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः ।
वरुणाय प्रकुर्वीत पूजामादौ समाहितः ॥

इति नारदः । तत आवाहनादिप्रतिज्ञापत्रशिरोन्यासान्तं पूर्ववत्कृत्वा—

त्वमम्भः ! सर्वभूतानामन्तश्चरसि साक्षिवत् ।
त्वमेवाम्भो ! विजानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानुषस्त्वयि मज्जति ।
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ॥

इति प्राड्विवाको जलमभिमन्त्रयेत् । ततः 'सत्येन माऽभिरक्ष त्वं वरुणे'ति दिव्यकर्ता जलं प्रार्थयेत् । ततो नाभिमात्रे स्थिरजले दिव्यार्थं तस्मिन् प्राङ्मुखे प्रविष्टे पुरुषान्तरे च तत्र प्रवेशिते शुचिस्थानस्थापितकर्णप्रमाणतोरणस्य मज्जनस्थानसन्निहितस्य निकटे सशरं धनुः प्राड्विवाकः पूजयेत् । ततः सोपवासो ब्राह्मणः क्षत्रियो वा त्रीन् शरान् मुञ्चति । जलस्थस्य पुरुषान्तरस्योरुं गृहीत्वा दिव्यकर्ता मज्जतीत्येकः कालः । तत्र बलवानेको वेगशाली प्रथमशरं गृह्णाति तादृशश्चाऽपरो मध्यमशरं गृहीत्वा मग्नमेवं दिव्यकारिणं पश्यतीति । अत्र पितामहः—

अन्यथा ना विशुद्धः स्यादेकांशस्यापि दर्शनात् ।
स्थानाद्वाऽन्यत्र गमनाद्यस्मिन्पूर्वं निवेशयेत् ॥—॥१०८-१०९॥

(मिता०) संप्रत्युदकविधिमाह—

सत्येनेति । हे वरुण, सत्येन मामभिरक्ष त्वमित्यनेन मन्त्रेण कमुदकमभिशाप्याभिमन्त्र्य नाभिदघ्नोदकस्थस्य नाभिप्रमाणोदकस्थितस्य पुरुषस्योरू गृहीत्वा शोध्यो जले प्रविशेत् जले निमज्जेत् । एतच्च वरुणपूजायां सत्याम—'गन्धमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः । वरुणाय प्रकुर्वीत पूजामादौ समाहितः' ॥ इति नारदस्मरणात् । तथा साधारणधर्मेषु धर्मावाहनादिसकलदेव(१)तापूजाहोमसमन्त्रकप्रतिज्ञापत्रशिरोनिवेशनान्तेषु सत्सु च । तथा—'तोय त्वं प्राणिनां प्राणः सृष्टेराद्यं तु निर्मितम् । शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा ॥ अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे' ॥ इति प्राड्विवाके-

(१) देवपूजा घ. ।

नोदकाभिमन्त्रणे कृते शोध्यः 'सत्येन माभिरक्ष त्वं वरुण'(१)इति जलं प्रार्थयेत् । उदकस्थानानि च नारदेनोक्तानि—'नदीषु तनुवेगासु सागरेषु वहेषु च । ह्रदेषु देवखातेषु तडागेषु सरःसु च' ॥ इति । तथा पितामहेनापि—'स्थिरतोये निमज्जे॑त(२) न ग्राहिणि न चाल्पके । तृणशैवालरहिते (३)जलौकामत्स्यवर्जिते ॥ देवखातेषु यत्तोयं तस्मिन्कुर्याद्विशोधनम् । आहार्यं वर्जयेन्नित्यं शीघ्रगासु नदीषु च ॥ आविशेत्सलिले नित्यमूर्मिपङ्कविवर्जिते' ॥ इति । आहार्यं तडागादिभ्य आहृतं ताम्रकटाहादिक्षिप्तं जलम् । नाभिप्रमाणोदकस्थश्च यज्ञियवृक्षोद्भवां धर्मस्थूणामवष्टभ्य प्राङ्मुखस्तिष्ठेत् । 'उदके प्राङ्मुखस्तिष्ठेद्धर्मस्थूणां प्रगृह्य च' । इति स्मरणात् ॥ १०८ ॥

(मिता०) ततः किं कर्तव्यमित्यत आह—

समकालमिति । निमज्जनसमकालं गते तस्मिन् जविन्येकस्मिन्पुरुषेऽन्यो जवी शरपातस्थानस्थितः पूर्वमुक्तमिषुमानीय जले निमग्नाङ्गं यदि पश्यति त(४)दा स शुद्धो भवति । एतदुक्तं भवति-त्रिषु शरेषु मुक्तेष्वेको वेगवान्मध्यमशरपातस्थानं गत्वा तमादाय तत्रैव तिष्ठति । अन्यस्तु पुरुषो वेगवान् शरमोक्षस्थाने तोरणमूले तिष्ठति । एवं स्थि(५)तयोस्तृतीयस्यां करतालिकायां शोध्यो निमज्जति । तत्समकालमेव तोरणमूलस्थितोऽपि द्रुततरं (६)मध्यशरपातस्थानं गच्छति । शरग्राही च तस्मिन्प्राप्ते द्रुततरं तोरणमूलं प्राप्यान्तर्जलगतं यदि न पश्यति तदा शुद्धो भवतीति । एतदेव स्पष्टीकृतं पितामहेन-'गन्तुश्चापि च कर्तुश्च समं गमनमज्जनम् । गच्छेत्तोरणमूलात्तु लक्ष्यस्थानं जवी नरः ॥ तस्मिन्गते द्वितीयोऽपि वेगादादाय सायकम् । गच्छेत्तोरणमूलं तु यतः स पुरुषो गतः ॥ आगतस्तु शरग्राही न पश्यति यदा जले । अन्तर्जलगतं सम्यक्तदा (७)शुद्धं विनिर्दिशेत् ' ॥ इति ॥ जविनोश्च पुरुषयोर्निर्धारणं कृतं नारदेन—'पञ्चाशतो धावकानां यौ स्यातामधिकौ जवे । तौ च तत्र नियोक्तव्यौ शरानयनकारणात् ' ॥ इति । तोरणं च निमज्जनसमीपस्थाने समे शोध्यकर्णप्रमाणोच्छ्रितं कार्यम् । 'गत्वा तु तज्जलस्थानं

(१) इत्युक्तं प्रार्थयते ख. ग. । (२) निमज्जेत्तु ख. । (३) जलूका घ. ।
(४) तदा शुद्धो ग. घ. । (५) स्थितयोस्तयोस्तृती ख. ।
(६) मध्यमशर ग. । (७) तदा शुद्धिं ख. ।

तटे तोरणमुच्छ्रितम् । कुर्वीत कर्णमात्रं तु भूमिभागे समे शुचौ' ॥ इति नारदस्मरणात् । शरत्रयं वैणवं च धनुर्मङ्गलद्रव्यैः श्वेतपुष्पादिभिः प्रथमं सम्पूजयेत् । 'शरान्संपूजयेत्पूर्वं वैणवं च धनुस्तथा । मङ्गलैर्धूपपुष्पैश्च ततः कर्म समाचरेत्' ॥ इति पितामहवचनात् । धनुषः प्रमाणं लक्ष्यस्थानं च नारदेनोक्तम्—'क्रूरं धनुः सप्तशतं मध्यमं षट्शतं स्मृतम् । मन्दं पञ्चशतं ज्ञेयमेष ज्ञेयो धनुर्विधिः ॥ मध्यमेन तु चापेन प्रक्षिपेच्च शरत्रयम् । हस्तानां तु शते सार्धे लक्ष्यं कृत्वा विचक्षणः ॥ न्यूनाधिके तु दोषः स्यात्क्षिपतः सायकांस्तथा' ॥ इति । अङ्गुलानां सप्ताधिकं शतं सप्तशतं क्रूरं धनुः । एवं षट्शतं पञ्चशतं च । एवं चैकादशाङ्गुलाधिकं हस्तचतुष्टयं क्रूरस्य धनुषः प्रमाणम्, मध्यमस्य दशाङ्गुलाधिकम्, मन्दस्य नवाङ्गुलाधिकमित्युक्तं भवति । 'शरांश्चानायसाग्रांस्तु प्रकुर्वीत विशुद्धये । वेणुकाण्डमयांश्चैव क्षेप्ता तु सुदृढं क्षिपेत्' ॥ इति स्मरणात् । क्षेप्ता क्षत्रियस्तद्वृत्तिर्वा ब्राह्मणः सोपवासो नियोक्तव्यः । यथाह—'क्षेप्ता च क्षत्रियः प्रोक्तस्तद्वृत्तिर्ब्राह्मणोऽपि वा । अक्रूरहृदयः शान्तः सोपवासस्ततः क्षिपेत्' ॥ इति । त्रिषु मुक्तेषु मध्यमः शरो ग्राह्यः । 'तेषां च प्रोषि(१)तानां च शराणां शास्त्रचोदनात् । मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसा' ॥ इति वचनात् । तत्रापि पतनस्थानादानेतव्यो न सर्पणस्थानात् । 'शरस्य पतनं ग्राह्यं सर्पणं तु विवर्जयेत् । सर्पन्सर्पन्शरो यायाद् दूराद् दूरतरं यतः' ॥ इति वचनात् । वाते च प्रवायति विषमादिदेशे च शरमोक्षो न कर्तव्यः । 'इषुं न प्रक्षिपेद्विद्वान्मारुते (२)चातिवायति । विषमे भूप्रदेशे च वृक्षस्थानसमाकुले ॥ तृणगुल्मलतावल्लीपङ्कपाषाणसंयुते' ॥ इति पितामहवचनात् । निमग्नाङ्गं पश्येच्चेच्छुद्धिमाप्नुयादिति वदता उन्मज्जिताङ्गस्याशुद्धिर्दर्शिता । स्थानान्तरगमने चाशुद्धिः पितामहेनोक्ता—'अन्यथा न विशुद्धिः स्यादेकाङ्गस्यापि दर्शनात्' ॥ इति 'स्थानाद्वान्यत्र गमनाद्यस्मिन्पूर्वं निवेशितः' ॥ इति । एकाङ्गस्यापि दर्शनादिति च कर्णाद्यभिप्रायेण । 'शिरोमात्रं तु दृश्येत न कर्णौ नापि नासिका । अप्सु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत्' ॥

---

(१) प्रक्षिप्तानां च ग. । (२) च प्रवायति ग. ।

इति विशेषाभिधानात्। अयमत्र प्रयोगक्रमः—'उक्तलक्षणजलाशयसंनिधावुक्तलक्षणं तोरणं विधाय उक्तप्रमाणे देशे लक्ष्यं निधाय तोरणसंनि(१)धौ सशरं धनुः सम्पूज्य जलाशये वरुणमावाह्य पूजयित्वा तत्तीरे धर्मादींश्च देवान्हवनान्तमिष्ट्वा शोध्यस्य शिरसि प्रतिज्ञापत्रमावध्य प्राड्विवाको जलमभिमन्त्रयते—"तोय त्वं प्राणिनां प्राणः' इत्यादिना मन्त्रेण। अथ शोध्यः—'सत्येन' इत्यादिना मन्त्रेण जलमभिमन्त्र्य गृहीतस्थूणस्य नाभिमात्रोदकावस्थितस्य बलीयसः पुरुषस्य समीपमुपसर्पति। अथ शरेषु त्रिषु मुक्तेषु मध्यमशरपातस्थाने मध्यमं शरं गृहीत्वा जविन्येकस्मिन्पुरुषे स्थिते अन्यस्मिंश्च तोरणमूले स्थिते प्राड्विवाकेन तालत्रये दत्ते युगपद्गमनमज्जनमथ शरानयनमिति ॥ १०९ ॥ इत्युदकविधिः।

(वी० मि०) सम्प्रति विषविधिमाह—

त्वं विष ! ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितः ॥
त्रायस्वाऽस्मादभीशापात्सत्येन भव मेऽमृतम् ॥ ११० ॥
एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम् ॥
यस्य वेगैर्विना (२)जीर्णं शुद्धिं तस्य विनिर्दिशेत् ॥ १११ ॥

'त्वं विषे'त्यादिश्लोकेनाऽभिमन्त्र्य भक्षयेत्। तच्च यस्य वेगैर्विना जीर्णं भवति तस्य शुद्धिं प्राड्विवाको विनिर्दिशेत्। शार्ङ्गं सिंघिआ इति प्रसिद्धम्। तदुक्तम्—

अजाशृङ्गनिभं श्यामं हिमाचलसमुद्भवम्।
शुद्धं च शृङ्गवेराभं सुपीतं तदनुत्तमम् ॥

इति।

धातोर्धात्वन्तरप्राप्तिर्विषवेग इति स्मृतः।

तल्लक्षणं च रोमाञ्चमूर्छादि, तद्दिव्यमत्र प्रयोगः। प्राड्विवाकः कृतोपवासो महादेवं पूजयित्वा तस्य पुरतो विषं स्थापयित्वा धर्मादिपूजां हवनान्तां विधाय प्रतिज्ञापत्रं दिव्यकर्तुः शिरसि निधाय विषमभिमन्त्रयेत्।

त्वं विष ब्रह्मणा सृष्टं परीक्षार्थं दुरात्मनाम्।
पापिनां दर्शयात्मानं शुद्धानाममृतं भव ॥

---

(१) समीपे सशरं घ.। (२) जीर्येत्—इति मु० पु० पाठः।

मृत्युमूर्ते विष त्वं हि ब्रह्मणा परिनिर्मितम् ।
त्रायस्वैनं नरं पापात्सत्येनाऽस्याऽमृतं भव ॥

इति मंत्रेण । ततो दक्षिणामुखाय दिव्यकर्त्रे उदङ्मुखः प्राङ्मुखो वा ब्राह्मणसन्निधौ घृते नियोजितं श्लक्ष्णं पिष्टं विषं दद्यात् । कालविशेषेण परिमाणविशेषश्चात्र नारदेनोक्तः—

तोलयित्वेप्सितं काले देयं तद्धि हिमागमे ।
नापराह्णे न मध्याह्ने न सन्ध्यायां तु धर्मवित् ॥
वर्षे चतुर्यवा मात्रा ग्रीष्मे पञ्चयवा स्मृता ।
हेमन्ते सा सप्तयवा शरद्यल्पा ततोऽपि हि ॥

अल्पा षड्यवा । ततो दिव्यकर्ता 'त्वं विषे'त्यादिश्लोकेनाभिमंत्र्य भक्षयेत् ॥ ११०-१११ ॥

(मिता०) इदानीं विषविधानमाह—

त्वं विष—इत्यादि । त्वं विषेत्यादिमन्त्रेण विषमभिमन्त्र्य कर्ता विषं हिमशैलजं शृङ्गभवं भक्षयेत् । तच्च भक्षितं सत् यस्य विषवेगैर्विना जीर्यति स शुद्धो भवति । विषवेगो नाम धातोर्धात्वन्तरप्राप्तिः । 'धातोर्धात्वन्तरप्राप्तिर्विषवेग इति स्मृतः' इति वचनात् । धातवश्च त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणीति सप्त । एवं च सप्तैव विषवेगा भवन्ति । तेषां च लक्षणानि पृथगेव विषतन्त्रे कथितानि । 'वेगो रोमाञ्चमाद्यो रचयति विषजः स्वेदवक्त्रोपशोषौ तस्योर्ध्वस्तत्परौ द्वौ वपुषि जनयतो वर्णभेदप्रवेपौ । यो वेगः पञ्चमोऽसौ नयति विवशतां कण्ठभङ्गं च हिक्कां षष्ठो निःश्वासमोहौ वितरति च मृतिं सप्तमो भक्षकस्य' ॥ इति । अत्र च महादेवस्य (१)पूजा कर्तव्या । यथाह नारदः—'दद्याद्विषं सोपवासो देवब्राह्मणसंनिधौ । धूपोपहारमन्त्रैश्च पूजयित्वा महेश्वरम्' ॥ इति । प्राड्विवाकः कृतोपवासो महादेवं पूजयित्वा तस्य पुरतो विषं व्यवस्थाप्य धर्मादिपूजां हवनान्तां विधाय प्रतिज्ञापत्रं शोध्यस्य शिरसि निधाय विषमभिमन्त्रयते । 'त्वं विष ब्रह्मणा सृष्टं परीक्षार्थं दुरात्मनाम् । पापानां दर्शयात्मानं शुद्धानाममृतं भव ॥ मृत्युमूर्ते विष त्वं हि ब्रह्मणा परिनिर्मितम् । त्रायस्वैनं नरं पापात्सत्येनास्यामृतं भव' ॥ इति । एवमभिमन्त्र्य दक्षिणाभिमुखावस्थिताय दद्यात् । 'द्विजानां संनिधावेव दक्षिणाभिमुखे स्थिते । उदङ्मुखः

---

(१) पूजा कार्या. ख. ।

प्राङ्मुखो वा विषं दद्यात्समाहितः' ॥ इति नारदवचनात्। विषं च वत्सनाभादि ग्राह्यम्। 'शृङ्गिणा वत्सनाभस्य हिमजस्य विषस्य वा' ॥ इति पितामहवचनात्। वर्ज्यानि च तेनैवो(१)क्तानि—'चारितानि च जीर्णानि कृत्रिमाणि तथैव च। भूमिजानि च सर्वाणि विषाणि परिवर्जयेत्' ॥ इति। तथा नारदेनापि—'भ्रष्टं च चारितं चैव धूपितं मिश्रितं तथा। कालकूटमलावुं च विषं (२)यत्नेन वर्जयेत्' ॥ इति। कालश्च नारदेनोक्तः—'तोलयित्वेप्सितं काले देयं तद्धि हिमागमे। नापराह्णे न मध्याह्ने न सन्ध्यायां तु धर्मवित्' ॥ इति। कालान्तरे तूक्तप्रमाणादल्पं देयम्। 'वर्षे चतुर्यवा मात्रा ग्रीष्मे पञ्चयवा स्मृता। हेमन्ते सा सप्तयवा शरद्यल्पा ततोऽपि हि' ॥ इति स्मरणात्। अल्पेति पञ्चयवेत्यर्थः। हेमन्तग्रहणेन शिशिरस्यापि ग्रहणम्। 'हेमन्तशिशिरयोः समासेन' इति श्रुतेः। वसन्तस्य च सर्वदिव्यसाधारणत्वात्तत्रापि सप्त यवा विषं च घृतप्लुतं देयं नारदवचनात्। 'विषस्य पलषड्भागाद्भागो विंशतिमस्तु यः। तमष्टभागहीनं तु शोध्ये दद्याद् घृतप्लुतम्' ॥ इति। पलं चात्र चतुःसुवर्णकम्। तस्य षष्ठो भागो दश माषाः दश यवाश्च भवन्ति। 'त्रियवं त्वेककृष्णलम्। पञ्चकृष्णलको माषः' इत्येको माषः पञ्चदश यवा भवन्ति। एवं दशानां माषाणां यवाः सार्धशतं भवन्ति। पूर्वं च दश यवा इति षष्ट्यधिकं शतं यवाः पलस्य षष्ठो भागस्तस्माद्विंशतितमो भागोऽष्टौ यवास्तस्याष्टभाग एकयवः तेन हीनं विंशतिमं भागं सप्तयवं घृतप्लुतं शोध्ये दद्यात्। घृतं च विषात् त्रिंशद्गुणं ग्राह्यम्। 'पूर्वाह्णे शीतले देशे विषं देयं तु देहिनाम्। घृते नियोजितं श्लक्ष्णं पिष्टं त्रिंशद्गुणान्वितम्' ॥ इति कात्यायनवचनात्। त्रिंशद्गुणेन घृतेनान्वितं विषम्। शोध्यश्च कुहकादिभ्यो रक्षणीयः। 'त्रिरात्रं पञ्चरात्रं वा पुरुषैः स्वैरधिष्ठितम्। कुहकादिभयाद्राजा रक्षयेद्दिव्यकारिणम् ॥ ओषधीर्मन्त्रयोगांश्च मणीनथ विषापहान्। कर्तुः शरीरसंस्थांस्तु गूढोत्पन्नान्परीक्षयेत्' ॥ इति पितामहस्मरणात्। तथा विषमपि (३)रक्षणीयम्—'शार्ङ्गं हैमवतं शस्तं गन्धवर्णरसान्वितम्। अकृत्रिममसंमूढममन्त्रोपहतं च यत्' ॥ इति नारदस्मरणात्। (४)तथा

(१) तथैवोक्तानि ख.। (२) यत्नेन परिवर्जयेदिति ग.।
(३) परिरक्षणीयं ग.। (४) तथापि घ.।

विषे पीते यावत्करतालिकाशतपञ्चकं तावत्प्रतीक्षणीयोऽनन्तरं चिकित्सनीयः। यथाह नारदः—'पञ्चतालशतं कालं निर्विकारो यदा भवेत् । तदा भवति संशुद्धस्ततः कुर्याच्चिकित्सितम्' ॥ इति । पितामहेन तु दिनान्तोऽवधिरुक्तोऽल्पमात्राविषयः । 'भक्षिते तु यदा स्वस्थो मूर्च्छाछर्दिविवर्जितः। निर्विकारो दिनस्यान्ते शुद्धं तमपि निर्दिशेत्' ॥ इति । अत्र च प्राड्विवाकः सोपवासो महादेवं सम्पूज्य तत्पुरतो विषं स्थापयित्वा धर्मादीनिष्ट्वा शोध्यस्य शिरसि प्रतिज्ञापत्रं निधाय विषमभिमन्त्र्य दक्षिणाभि(१)मुखस्थिताय विषं प्रयच्छति। स च शोध्यो विषमभिमन्त्र्य भक्षयतीति क्रमः ॥ ११०-१११ ॥ इति विषविधानम् ॥

(वी० मि०) अथ कोशविधिमाह—

देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत् ॥
संस्नाप्य पाययेत्तस्माज्जला(२)त्तु प्रसृतित्रयम् ॥११२॥
आ(३)चतुर्दशिकादह्नो यस्य नो राजदैविकम् ॥
व्यसनं जायते घोरं स शुद्धः स्यान्न संशयः ॥११३॥

उग्रान्देवानभ्यर्च्य प्राड्विवाकस्तस्य देवस्य स्नानोदकमाहरेत् । उग्रत्वं च विवृतं पितामहेन—

भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलम् ।
समभावे तु देवानामादित्यस्य तु पाययेत् ॥
दुर्गायाः स्नापयेच्छूलमादित्यस्य तु मण्डलम् ।
अन्येषामपि देवानां स्नापयेदायुधानि तु ॥

तस्मात्स्नानजलात्प्रसृतित्रयं जलं संस्नाप्याऽभियुक्तं पाययेत्। पीतोदकस्य च यस्य राजदैविकं व्यसनं रोगादि घोरं अतिपीडाकरं चतुर्दशदिनपर्यन्तं न जायते स शुद्धः विजयी स्यात्। यतोऽवधिपर्यन्तेन व्यसनाभावे संशयो न तिष्ठतीत्यर्थः। तुशब्देन जलान्तरमिश्रणव्यवच्छेदः ।

त्रिरात्रात्सप्तरात्राद्वा द्वादशाहाद्विसप्तकात् ।
वैकृतं यस्य दृश्येत पापकृत्स उदाहृतः ॥

(१) भिमुखाय स्थिताय ख मुखाय विष घ. । (२) जलं तु—इति मु० पु० पाठः ।
(३) अर्वाक् चतुर्दशादह्नो—इति मु० पु० पाठः ।

इति पितामहवचनं त्वल्पाल्पतमाभियोगविषय इति न विरोधः । तत्र चायं क्रमः-गोमयेन मण्डलं कृत्वा दिव्यकर्तारमादित्याभिमुखं स्थापयित्वा शिरसि पत्रन्यासान्तं कृत्वा उग्रदेवान्संपूज्य तदीयस्नानोदकं प्रसृतित्रयमितं 'तोय त्वं प्राणिना'मित्यादिनाभिमन्त्र्य 'सत्येन माऽभिरक्ष त्वं वरुणे'ति दिव्यकर्तारमभिमन्त्रितं पाययेदिति ॥ ११२-११३ ॥

(मिता०) अथ कोशविधिमाह—

देवानिति । उग्रान्देवान्दुर्गादित्यादीन्समभ्यर्च्य गन्धपुष्पादिभिः पूजयित्वा संस्नाप्य तत्स्नानोदकमाहरेत् । आहृत्य च 'तोय त्वं प्राणिनां प्राणः' इत्यादिना तत्तोयं प्राड्विवाकः संस्नाप्य शोध्येन च तत्तोयं पात्रान्तरे कृत्वा 'सत्येन माभिरक्ष त्वं वरुण' इत्यनेनाभिमन्त्रितं पाययेत्प्रसृतित्रयम् । एतच्च साधारणधर्मेषु धर्मावाहनादिसकलदेवतापूजाहोमसमन्त्रकप्रतिज्ञापत्रशिरोनिवेशनान्तेषु सत्सु । अत्र च स्नाप्यदेवनियमः कार्यनियमोऽधिकारिनियमश्च पि(१)तामहादिभिरुक्तः । 'भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलम् । समभावे तु देवानामादित्यस्य च पा(२)ययेत् ॥ दुर्गायाः पाययेच्चौरान्ये च शस्त्रोपजीविनः । भास्करस्य तु यत्तोयं ब्राह्मणं तत्र पाययेत् ॥ दुर्गायाः स्नापयेच्छूलमादित्यस्य तु मण्डलम् । अन्येषामपि देवानां स्नापयेदायुधानि तु' ॥ इति देवतानियमः । 'विस्र(३)म्भे सर्वशङ्कासु सन्धिकार्ये तथैव च । एषु कोशः प्रदातव्यो नित्यं चित्तविशुद्धये' ॥ इति कार्यनियमः । 'पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च । सशूकस्याव्यसनिनः कोशपानं विधीयते' ॥ सशूक आस्तिकः । 'मद्यपस्त्रीव्यसनिनां कितवानां तथैव च । कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः ॥ महापराधे निर्धर्मे कृतघ्ने क्लीबकुत्सिते । नास्तिकव्रात्य(४)दाशेषु कोशपानं विवर्जयेत्' ॥ इति । महापराधो महापातकम् । निर्धर्मो वर्णाश्रमधर्मरहितः पाखण्डी । कुत्सितः प्रतिलोमजः । दाशाः कैवर्ताः । इत्यधिकारिनियमः । तथा गोमयेन मण्डलं कृत्वा तत्र शोध्यमादित्याभिमुखं स्थापयित्वा पाययेदिति नारदवचनादवगन्तव्यम् । यथाह—"तमाहूयाभिशस्तं तु

(१) पितामहनारदादिभिः घ. । (२) दापयेत घ ।
(३) विभेदे घ. । (४) दासेषु ख. ।

मण्डलाभ्यन्तरे स्थितम् । आदित्याभिमुखं कृत्वा पाययेत्प्रसृतित्रयम्' ॥ इति ॥ ११२ ॥

(मिता०) ननु तुलादिषु विषान्तेषु समनन्तरमेव शुद्ध्यशुद्धिभावना, कोशे तु कथमित्यत आह—

अर्वागिति । चतुर्दशादह्नः पूर्वं यस्य राजिकं राजनिमित्तं दैविकं देवप्रभवं व्यसनं दुःखं घोरं महत् नो नैव जायते, अल्पस्य देहिनामपरिहार्यत्वात्स शुद्धो वेदितव्यः । ऊर्ध्वं पुनरवधेर्न दोषः । यथाह नारदः—'ऊर्ध्वं यस्य द्विसप्ताहाद्वैकृतं तु महद्भवेत् । नाभियोज्यः स विदुषा कृतकालव्यतिक्रमात्' ॥ इत्यर्थसिद्धमेवोक्तम् । 'अर्वाक् चतुर्दशादह्नः' इत्येतन्महाभियोगविषयम्–'महाभियोगेष्वेतानि' इति प्रस्तुत्याभिधानात् । अवध्यन्तराणि पितामहेनोक्तान्यल्पाविषयाणि । 'कोशमल्पेऽपि दापयेत्' इति स्मरणात् । तानि च—'त्रिरात्रात्सप्तरात्राद्वा द्वादशाहाद्विसप्तकात् । वैकृतं यस्य दृश्येत पापकृत्स उदाहृतः' ॥ इति । महाभियोगोक्तद्रव्यादर्वाचीनं द्रव्यं त्रिधा विभज्य त्रिरात्राद्यपि पक्षत्रयं व्यवस्थापनीयम् ॥ ११३ ॥ इति कोशविधिः ॥

(वी० मि०) अथाऽल्पाभियोगे तण्डुलादीनि चत्वारि दिव्यानि ग्रन्थकर्त्रा विशिष्याऽप्रतिपादितान्युच्यन्ते । तत्र पितामहः—

तण्डु(१)लानां प्रवक्ष्यामि विधिं भक्षणचोदितम् ।
चौरे तु तण्डुला देया नान्यस्येति विनिश्चयः ॥
तण्डुलान्कारयेच्छुक्लाञ्छालेर्नान्यस्य कस्यचित् ।
मृण्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ॥
स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् ।
प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकम् ॥
तण्डुलान्भक्षयित्वा तु पत्रे निष्ठीवयेत्ततः ।
पिप्पलस्य तु नान्यस्य अभावे भूर्जपत्रकम् ॥
लोहितं दृश्यते यस्य हनुस्तालु च शीर्यते ।
गात्रं च कम्पते यस्य तमशुद्धं विनिर्दिशेत् ॥

धर्मावाहनादिकं चात्र वक्ष्यमाणेषु त्रिष्वगन्तव्यम् ॥

---

(१) इदमर्धं नास्ति क. ख. पुस्तकयोः ।

तथा—

सौवर्णं राजतं वापि ताम्रं वा षोडशाङ्गुलम् ।
चतुरङ्गुलखातं तु मृण्मयं वाथ मण्डलम् ॥
पू(१)रयेद् घृततैलाभ्यां विंशत्या तु पलैस्तु तम् ।
सुवर्णमाषकं तस्मिन् सुतप्ते निक्षिपेत्ततः ॥
अङ्गुष्ठाङ्गुलियोगेन उद्धरेत्तप्तमाषकम् ।
कराग्रं यो न धुनुयाद्विस्फोटो वा न जायते ॥
शुद्धो भवति धर्मेण निर्विकारकराङ्गुलिः ।

मण्डलं वर्तुलम्, उद्धरेन्निःकारयेत् ॥

बृहस्पतिः—

आयसं द्वादशपलं घटितं फालमुच्यते ।
अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तरम् ॥
अग्निवर्णं तु तच्चौरो जिह्वया संलिहेत्सकृत् ।
अदग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते ॥

धर्मजं दिव्यमाह पितामहः—

लिखेद् भूर्जे पटे वापि धर्माधर्मौ सितासितौ ।
अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत ॥
सितपुष्पस्तु धर्मः स्यादधर्मोऽसितपुष्पधृक् ।
एवं विधायोपलिख्य पिण्डयोस्तौ निधापयेत् ॥
गोमयेन मृदा वापि पिण्डौ कार्यौ समन्ततः ।
मृद्भाण्डकेऽनुपहते स्थाप्यौ चानुपलक्षितौ ॥
उपलिप्ते शुचौ देशे देवब्राह्मणसन्निधौ ।
आवाहयेत्ततो देवांल्लोकपालांश्च पूर्ववत् ॥
धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत् ।

ततो—

यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे ।

इति अभिशस्तोऽभिमन्त्रयेत् ।

अभियुक्तस्तयोश्चैकं प्रगृह्णीताऽविलम्बितः ।
धर्मे गृहीते शुद्धः स्यादधर्मे तु स हीयते ॥

---

(१) इत आरभ्य सार्धमेकं पद्यं नास्ति ख. पुस्तके ।

अथ शपथाः । तत्र मनुः—

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥
पुत्रदारस्य वाप्येषां शिरांसि स्पर्शयेत्पृथक् ।

यद्येतन्मया कृतं तदा सत्यातिक्रमजन्यं पापं मम स्यादिति विप्रं वादयेत् । यद्येतन्मया कृतं तदा मम वाहनान्यायुधानि निष्फलानि भवन्त्विति क्षत्रियं वादयेत् । एवमुत्तरत्रापि । हलायुधस्तु 'सत्यमिति ब्राह्मणं वादयेत् । क्षत्रियं वाहनमायुधं स्पर्शयेत् । वैश्यं गवादि स्पर्शयेत् । उक्तशपथैर्वृथाकृतं यत्पापं तेन शूद्रं वृथाशपथकारिणं योजयेत् । सर्वं पूर्वोक्तं कारयेदिति तात्पर्यार्थं' इत्याह । बृहस्पतिः—

सत्यं वाहनमस्त्राणि गोबीजकनकानि च ।
देवब्राह्मणपादाश्च पुत्रदारशिरांसि च ॥
एते च शपथाः प्रोक्ता मनुना स्वल्पकारणे ।

अत्र शपथस्य दिव्यभिन्नत्वादुपवासादिकं नास्ति किं तु स्नानाचमनमात्रम् । शङ्खः—'इष्टापूर्त्तैः प्रदानमन्यांश्च शपथान् कारयेत्' । मनुः—

वृथा हि शपथान् कुर्वन् प्रेत्य चेह च नश्यति ।
कामिनीषु विवाहेषु गवां भुक्ते तथेन्धने ॥
ब्राह्मणाभ्युपपत्तौ च शपथैर्नास्ति पातकम् ।

कामिनीष्विति । रहसि कामिनीसन्तोषार्थं, विवाहेषु स्त्रीभिः पत्यर्थं, गोग्रासार्थं, नित्याहुतिसम्पादकेन्धनार्थं ब्राह्मणगवादिप्राणरक्षार्थं च वृथा शपथैरपि न पापं भवतीत्यर्थः ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने दिव्यप्रकरणम् ॥

(मिता०) तुलादीनि कोशान्तानि पञ्च महादिव्यानि यथोद्देशं योगीश्वरेण व्याख्यातानि । स्मृत्यन्तरे त्वल्पाभियोगविषयाण्यन्यान्यपि दिव्यानि कथितानि । यथाह पितामहः—'तण्डुलानां प्रवक्ष्यामि विधिं भक्षणनोदितम् । चौरे तु तण्डुला देया नान्यस्येति विनिश्चयः ॥ तण्डुलान्कारयेच्छुक्लाञ्छालेर्नान्यस्य कस्यचित् । मृन्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ॥ स्नानोदकेन संमिश्रान्रात्रौ

तत्रैव वासयेत् । प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकम् ॥ तण्डुलान्भक्षयित्वा तु पत्रे निष्ठीवयेत्ततः । पिप्पलस्य तु नान्यस्य अभावे भूर्ज एव तु ॥ लोहितं यस्य दृश्येत हनुस्तालु च शीर्यते । गात्रं च (१)कम्पते यस्य तमशुद्धं विनिर्दिशेत्' । इति । शिरोरोपितपत्रकं तण्डुलान्भक्षयित्वा निष्ठीवयेत्प्राड्विवाकः । भक्षयित्वेति च ण्यन्तात्णिचि रूपम् । सर्वदिव्यसाधारणं च धर्मावाहनादि पूर्ववदिहापि कर्तव्यम् ॥ इति तण्डुलविधिः ॥

तप्तमाषविधिः पितामहेनोक्तः । तथा हि–'सौवर्णं राजतं वापि ताम्रं वा षोडशाङ्गुलम् । चतुरङ्गुलखातं तु मृन्मयं वाथ मण्डलम्'॥ वर्तुलमित्यर्थः । 'पूरयेद् घृततैलाभ्यां विंशत्या तु पलैस्तु तत् । सुवर्णमाषकं तस्मिन्सुतप्ते निक्षिपेत्ततः ॥ अङ्गुष्ठाङ्गुलियोगेन उद्धरेत्तप्तमाषकम् । कराग्रं यो न धुनुयाद्विस्फोटो वा न जायते । शुद्धो भवति धर्मेण निर्विकारकराङ्गुलिः' ॥ उद्धरेदिति वचनात्पात्रादुत्क्षेपणमात्रं न(२) वहिः प्रक्षेपणमाद(३)रणीयम् ॥

अपरः कल्पः–'सौवर्णे राजते ताम्रे आयसे मृन्मयेऽपि वा । गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः ॥ सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोधिताम् । सलिलेन सकृद्धौतां प्रक्षिपेत्तत्र मुद्रिकाम् ॥ भ्रमद्वीचितरङ्गाढ्ये ह्यनखस्पर्शगोचरे । परीक्षेतार्द्रपर्णेन चुरुकारं सुघोषकम् ॥ ततश्चानेन मन्त्रेण सकृत्तदभिमन्त्रयेत् ॥ परं पवित्रममृतं घृतं त्वं यज्ञकर्मसु । दह पावक पापं त्वं हिमशीतं शुचौ भव ॥ उपोषितं ततः स्नातमार्द्रवाससमागतम् । ग्राहयेन्मुद्रिकां तां तु घृतमध्यगतां तथा ॥ प्रदेशिनीं च तस्याथ परीक्षेयुः परीक्षकाः । यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिः' ॥ इति । अत्रापि धर्मावाहनाद्यनुसन्धातव्यम् । घृतानुमन्त्रणं प्राड्विवाकस्य । 'त्वमग्ने सर्वभूतानाम्' इति शोध्यस्याग्न्यभिमन्त्रणमन्त्रः । 'प्रदेशिनीं परीक्षेयुः' इतिवचनात् प्रदेशिन्यैव मुद्रिकोद्धरणम् ॥ इति तप्तमाषविधिः ॥

धर्माधर्माख्यदिव्यविधिश्च पितामहेनोक्तः । तथा च–'अधुना संप्रवक्ष्यामि धर्माधर्मपरीक्षणम् । हन्तॄणां याचमानानां प्रायश्चित्तार्थिनां नृणाम्' ॥ इति । हन्तॄणामिति साहसाभियोगेषु, याचमानानामिति अर्थाभियोगेषु, प्रायश्चित्तार्थिनामिति पातकाभियोगेषु । (४)रा-

(१) कम्पयेद्यस्य. ख. । (२) न प्रक्षेपणं ख. । (३) महारणीयं ग. । (४) चरुकारं ख. ।

जतं कारयेद्धर्ममधर्मं सीसकायसम्' इति प्रतिमाविधानं सासिकं वा आयसं वेति ॥ पक्षान्तरमाह–'लिखेद् भूर्जे पटे वापि धर्माधर्मौ सितासितौ । अभ्युक्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत् ॥ सितपुष्पस्तु धर्मः स्यादधर्मोऽसितपुष्पधृक् । एवंविधायोपलिख्य पिण्डयोस्तौ निधापयेत् ॥ गोमयेन मृदा वापि पिण्डौ कार्यौ समंततः । मृद्भाण्डकेऽनुपहते स्थाप्यौ चानुपलक्षितौ ॥ उपलिप्ते शुचौ देशे देवब्राह्मणसंनिधौ । आवाहयेत्ततो देवाँल्लोकपालांश्च पूर्ववत् ॥ धर्मावाहनपूर्वं तु प्रतिज्ञापत्रकं लिखेत्' ॥ ततः–'यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे । अशुद्धश्चेन्मम करे पाप(१) आयातु धर्मतः' ॥ इति ॥ अभिशस्तोऽभिमन्त्रयते । 'अभियुक्तस्तयोश्चैकं प्रगृह्णीताविलम्बितः । धर्मे गृहीते शुद्धः स्यादधर्मे तु स हीयते ॥ एवं समासतः प्रोक्तं धर्माधर्मपरीक्षणम्' ॥ इति ॥ इति धर्माधर्मदिव्यविधिः ॥

अन्ये च शपथा द्रव्याल्पत्वमहत्त्वविषया जातिविशेषविषयाश्च मन्वादिभिरुक्ताः । ते यथा—'निष्के तु सत्यवचनं द्विनिष्के पादलम्भनम् । त्रिकादर्वाक्तु पुण्यं स्यात्कोशपानमतः परम्' ॥ (मनुः ८।११३) । 'सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः । गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः' ॥ इत्यादयः । अत्र च शुद्धिविभावना मनुनोक्ता (८।११५)—न चा(२)र्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः' इति । आर्तिरपि—'यस्य नो राजदैविकं व्यसनं जायते घोरम्' इत्युक्तैव । कालनियमश्च एकरात्रमारभ्य त्रिरात्रपर्यन्तं त्रिरात्रमारभ्य पञ्चरात्रपर्यन्तम् । एकरात्रप्रभृतित्वं कार्यलाघवगौरवपर्यालोचनया द्रष्टव्यम् ॥ एवं दिव्यैर्जयपराजयावधारणे दण्डविशेषोऽपि दर्शितः कात्यायनेन—'शतार्धं दापयेच्छुद्धमशुद्धो दण्डभाग्भवेत्' इति । तं दण्डमाह—'विषे तोये हुताशे च तुलाकोशे च तण्डुले । तप्तमाषकदिव्ये च क्रमाद्दण्डं प्रकल्पयेत् ॥ सहस्रं षट्शतं चैव तथा पञ्चशतानि च । चतुस्त्रिद्व्येकमेवं च हीनं हीनेषु कल्पयेत्' ॥ इति ॥ 'निह्नवे भावितो दद्या'दित्युक्तदण्डेनायं दिव्यनिबन्धनो दण्डः समुच्चीयते ॥ इति दिव्यप्रकरणम् ॥

---

(१) पापमायातु ख. ।

(२) अस्य पूर्वार्धं 'यमिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति च' इति मनुस्मृतावालोचनीयम् ।

(वी० मि०) अथ दायविभागप्रकरणमारभते। तल्लक्षणं चोक्तं नारदेन—

विभागोऽर्थस्य पैत्र्यस्य तनयैर्यत्र कल्प्यते।
दायभागमिति प्रोक्तं व्यवहारपदं बुधैः॥

पैत्र्यस्य तनयपदाभ्यां स्ववर्जितेन सम्बन्धस्य प्रत्यासन्नमात्रस्योपलक्षणम्। विभागः साधरणस्वत्वाश्रयस्य व्यवस्थाविशेषादिभिः तदपगमे प्रतिनियतस्वत्वाधानम्। दायो धनं स्वामिसम्बन्धवशाल्लब्धधनं तस्य भागो विभागः। अत्र जीवितपितृकविभागमादावाह—

विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान्॥
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिनः॥११४॥
यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः॥
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा॥११५॥
शक्तस्यानीहमानस्य किञ्चिद्दत्वा पृथक् क्रिया॥
न्यूनाधिकविभक्तानां धर्मः पितृकृतः स्मृतः॥११६॥

पिता चेद्विभागं स्वार्जितस्वाभ्युद्धृतस्वत्वधनस्य कुर्यात्तदा इच्छया स्वेच्छानुसारेण न्यूनाधिकमपि द्रव्यं दत्वा सुतान् विभजेत्। तदाह विष्णुः—'पिता यत्पुत्रान्विभजेत्तस्य स्वेच्छया स्वयमुपात्तेऽर्थे'। मनुश्च—

पैतृकं तु पिता द्रव्यमनवाप्यं यदाप्नुयात्।
न तत्पुत्रैर्भजेत्सार्द्धमकामः स्वयमर्जितम्॥

पिताऽर्जितं तदुद्धृतं च विहाय द्रव्यान्तरे पित्रा विभज्यमाने सर्वे सुताः समांशभागिनः स्युः। ज्येष्ठस्य ज्येष्ठभागेन दशांशविंशांशादिसहितेनांशेन विभजेत्। पुत्राणां च स्वस्य समांशकरणम्। विपक्षे तु पितुर्विभागकर्तुः पत्नीनां यासां भर्त्रा श्वशुरेण वा न स्त्रीधनं दत्तं ताः पत्न्यो गृहीतस्त्रीधनाः पत्न्यः समधनाः संविभक्तव्यधनाः कार्याः। यदि तु—

द्वावंशौ प्रतिपद्येत विभजेन्नात्मनः पिता।

इति तु नारदवचनानुसारेण। 'स्वल्पेन वा संविभज्य भूयिष्ठमादाय तिष्ठे'दिति हारीतवचनानुसारेण द्विगुणं प्रचुरतरं वा धनं स्वयं

गृह्णाति तदा स्वभागादेव समांशिकाः कार्याः । शक्तस्य स्वयमेवार्जनसमर्थस्य पितृद्रव्यमनीहमानस्याऽनिच्छतः पुत्रस्य पित्रा भ्रातृभिश्च किञ्चित्तण्डुलप्रस्थादिकं तत्पुत्रविप्रतिपत्तिनिरासार्थं दत्त्वा पृथक्क्रिया विभागः कार्यः । न्यूनाधिकद्रव्यदानपूर्वकं विभक्तानां पुत्राणां पितृकृतस्तादृशोऽपि विभागो धर्म्यः स्मृतः, तस्मादुत्तरकाले न विप्रतिपत्तव्यम् । पितुस्तु लोकविद्विष्टत्वादधर्म्य एव तादृशो विभाग इति तात्पर्यम् । आपस्तम्बः–'एकधनेन ज्येष्ठं तोषयित्वा जीवत्पुत्रेभ्यो विभजेत्समम्' । एकेन धनेन श्रेष्ठधनेन । जीवदिति विशेषाभिधानान्मृतस्य पत्नी भागं न भजते इत्यभिप्रैति ॥ ११४—११६ ॥

(मिता०) प्रमाणं मानुषं दैवमिति भेदेन वर्णितम् ।
अधुना वर्ण्यते दायविभागो योगमूर्तिना ॥

तत्र दायशब्देन यद्धनं स्वामिसम्बन्धादेव निमित्तादन्यस्य स्वं भवति तदुच्यते । स च द्विविधः अप्रतिबन्धः सप्रतिबन्धश्च । तत्र पुत्राणां पौत्राणां च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं च स्वं भवतीत्यप्रतिबन्धो दायः । पितृव्यभ्रात्रादीनां तु पुत्राभावे स्वाम्यभावे च स्वं भ(१)वतीति सप्रतिबन्धो दायः । एवं तत्पुत्रादिष्वप्यूहनीयः । विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु व्यवस्था(२)पनम् । एतदेवाभिप्रेत्योक्तं नारदेन–'विभागोऽर्थस्य पि(३)त्र्यस्य तनयैर्यत्र कल्प्यते । दायभाग इति प्रोक्तं व्यवहारपदं बुधैः' ॥ इति । पि(३)त्र्यस्येति स्वत्वनिमित्तसंबन्धोपलक्षणम् । तनयैरित्यपि प्रत्यासन्नोपलक्षणम् । इदमिह निरूपणीयम् । कस्मिन्काले कस्य कथं कैश्च विभागः कर्तव्य इति । तत्र कस्मिन् काले कथं कश्चेति तत्र श्लोकव्याख्यान एव वक्ष्यते । कस्य विभाग इत्येतावदिह चिन्त्यते । किं विभागात्स्वत्वमुत स्वस्य सतो विभाग इति । तत्र स्वत्वमेव तावन्निरूप्यते । किं शास्त्रैकसमधिगम्यं स्वत्वमुत प्रमाणान्तरसमाधिगम्यमिति । तत्र शास्त्रैकसमधिगम्यमिति तावद्युक्तं गौतमवचनात्–'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोः' ॥ इति । प्रमाणान्तरगम्ये स्वत्वं नेदं वचनमर्थवत्स्यात् । तथा स्तेनातिदेशे मनुः (८।३४०)—

(१) अत्र पुत्रसद्भावः स्वामिसद्भावश्च प्रतिबन्धः तदभावे पितृव्यत्वेन भ्रातृत्वेन च स्वं भवतीति विशेषः ख. घ. पुस्तकयोः । (२) द्रव्यस्य व्यवस्थापनं ख. । (३) पैत्रस्य ग. घ. ।

'योऽद(१)त्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम् । याजनाध्या(२)पनेनापि यथा स्तेनस्तथैव सः' ॥ इति । अदत्तादायिनः सकाशाद्याजनादिद्वारेणापि द्रव्यमर्जयतां दण्डविधानमनुपपन्नं स्यात्स्वत्वस्य लौकिकत्वे । अपि च—लौकिकं चेत्स्वत्वं मम स्वमनेनापहृतमिति न ब्रूयादपहर्तुरेव स्वत्वात् । अन्य(३)थान्यस्य स्वं तेनापहृतमिति नापहर्तुः स्वम् । एवं तर्हि सुवर्णरजतादिस्वरूपवदस्य वा स्वमन्यस्य वा स्वमिति संशयो न स्यात् । तस्माच्छास्त्रैकसमधिगम्यं स्वत्वमिति । अत्रोच्यते—लौकिकमेव स्वत्वं लौकिकार्थक्रियासाधनत्वात् व्रीह्यादिवत् । आहवनीयादीनां हि शास्त्रगम्यानां न लौकिकक्रियासाधनमस्ति । नन्वाहवनीयादीनामपि पाकादिसाधनत्वमस्त्येव । नैतत् । न हि तत्राहवनीयादिरूपेण पाकादिसाधनत्वम् । किं तर्हि प्रत्यक्षादिपरिदृश्यमानाग्न्यादिरूपेण । इह तु सुवर्णादिरूपेण न क्रयादिसाधनत्वमपि तु स्वत्वेनैव । न हि यस्य यत्स्वं न भवति तत्तस्य क्रयाद्यर्थक्रियां साधयति । अपि च प्रत्यन्तवासिनामप्यदृष्टशास्त्रव्यवहाराणां स्वत्वव्यवहारो दृश्यते । क्रयविक्रयादिदर्शनात् । किं च—निय(४)तोपायकं स्वत्वं लोकसिद्धमेवेति न्यायविदो मन्यन्ते । तथा हि—लिप्सासूत्रे तृतीये वर्णके द्रव्यार्जननियमानां क्रत्वर्थत्वे स्वत्वमेव न स्यात् स्वत्वस्यालौकिकत्वादिति पूर्वपक्षासंभवमाशङ्क्य द्रव्यार्जनस्य प्रतिग्रहादिना स्वत्वसाधनत्वं लोकसिद्धमिति पूर्वपक्षः समर्थितो गुरुणा । ननु च द्रव्यार्जनस्य क्रत्वर्थत्वे स्वत्वमेव न भवतीति' याग एव न संवर्तेत । प्रलपितमिदं केनापि 'अर्जनं स्वत्वं नापादयतीति विप्रतिषिद्धम्' इति वदता । तथा सिद्धान्तेऽपि स्वत्वस्य लौकित्वमङ्गीकृत्यैव विचारप्रयोजनमुक्तम्—'अतो नियमातिक्रमः पुरुषस्य न क्रतोः' इति । अस्य चार्थ एवं विवृतः—यदा द्रव्यार्जननियमानां क्रत्वर्थत्वं तदा नियमार्जितेनैव द्रव्येण क्रतुसिद्धि(५)र्न नियमातिक्रमार्जितेन द्रव्येणेति न पुरुषस्य नियमातिक्रमदोषः(६) पूर्वपक्षे । राद्धान्ते त्वर्जननियमस्य

(१) अदत्तादायिनश्चौरस्य. । (२) याजनाध्यापनाद्वापि ख. ।
(३) अन्यथा स्वं ख. । (४) नियतोपाधिकं घ. ।
(५) क्रतुसिद्धिर्नियमातिक्रमार्जितेन द्रव्येण न क्रतुसिद्धिरिति घ.।
(६) दोष इति पूर्वपक्षे घ. ।

पुरुषार्थत्वात्तदतिक्रमेणार्जितेनापि द्रव्येण क्रतुसिद्धिर्भवति, पुरुषस्यैव नियमातिक्रमदोष इति नियमातिक्रमार्जितस्यापि स्वत्वमङ्गीकृतम्। अन्यथा क्रतुसिद्ध्यभावात्। न चैतावता चौर्यादिप्राप्तस्यापि स्वत्वं स्यादिति मन्तव्यम्। लोके तत्र स्वत्वप्रसिद्ध्यभावात् व्यवहारविसंवादाच्च। एवं प्रतिग्रहाद्युपायके स्वत्वे लौकिके स्थिते-'ब्राह्मणस्य प्रतिग्रहादय उपायाः, क्षत्रियस्य विजितादयः, वैश्यस्य कृष्यादयः, शूद्रस्य शुश्रूषादयः' इत्यदृष्टार्था नियमाः। रिक्थादयस्तु सर्वसाधारणाः-'स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु' इत्युक्ताः। तत्राऽप्रतिबन्धो दायः रिक्थम्। क्रयः प्रसिद्धः। संविभागः सप्रतिबन्धो दायः परिग्रहोऽनन्यपूर्वस्य जलतृणकाष्ठादेः स्वीकारः। अधिगमो निध्यादेः प्राप्तिः। एतेषु निमित्तेषु सत्सु स्वामी भवति। (१)ज्ञातेषु ज्ञायते स्वामी। 'ब्राह्मणस्याधिकं लब्धम्' इति ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तदधिकमसाधारणम्। 'क्षत्रियस्य विजितम्' इत्यत्राधिकमित्यनुवर्तते। क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम। 'निर्विष्टं वैश्यशूद्रयोः' इत्यत्राप्यधिकमित्यनुवर्तते। वैश्यस्य कृषिगोरक्षादिलब्धं निर्विष्टं तदसाधारणम्। शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं तदसाधारणम। एवमनुलोमजानां प्रतिलोमजानां च लोकप्रसिद्धेषु स्वत्वहेतुषु यद्यदसाधारणमुक्तं 'सूतानामश्वसारथ्यम्' इत्यादि तत्तत्सर्वं निर्विष्टशब्देनोच्यते। सर्वस्यापि भृतिरूपत्वात्। 'निर्वेशो भृतिभोगयोः' इति त्रिकाण्डीस्मरणात्। तत्तदसाधारणं वेदितव्यम्। यदपि 'पत्नी दुहितरश्च' इत्यादिस्मरणं तत्रापि स्वामिसंबन्धितया बहुषु दायविभावितया प्राप्तेषु लोकप्रसिद्धेऽपि स्वत्वे व्यामोहनिवृत्त्यर्थं स्मरणमिति सर्वमनवद्यम। यदपि मम स्वमनेनापहृतमिति न ब्रूयात्स्वत्वस्य लौकिकत्व इति तदप्यसत्—स्वत्वहेतुभूतक्रयादिसंदेहात्स्वत्वसंदेहोपपत्तेः। विचारप्रयोजनं तु-'यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम्। तस्योत्सर्गेण शुध्यन्ति जप्येन तपसैव च'। इति। शास्त्रैकसमधिगम्ये स्वत्वे गर्हितेनासत्प्रतिग्रहवाणिज्यादिना लब्धस्य स्वत्वमेव नास्तीति तद(२)विभाज्यमेव। यदा तु (३)लौकिकं स्वत्वं तदाऽसत्प्रतिग्रहा-

(१) कृतेषु ख.। (२) न विभाज्यमेव ग.। (३) स्वत्वं लौकिकं तदा ग.।

दिलब्धस्यापि स्वत्वात्तत्पुत्राणां तद्विभाज्यमेव । 'तस्योत्सर्गेण शुद्ध्यन्ति' इति प्रायश्चित्तमर्जयितुरेव, तत्पुत्रादीनां तु दायत्वेन स्वत्वमिति न तेषां दोषसम्बन्धः । 'सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः । प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च' । इति (१०।१५) मनुस्मरणात् ।

इदानीमिदं संदिह्यते-किं विभागात्स्व(१)त्वमुत स्वस्य सतो विभाग इति । तत्र विभागात्स्व(२)त्वमिति तावद्युक्तम् । जातपुत्रस्याऽऽधानविधानात् । यदि जन्मनैव स्वत्वं स्यात्तदोत्पन्नस्य पुत्रस्यापि तत्स्वं साधारणमिति द्रव्यसाध्येष्वाधानादिषु पितुरनधिकारः स्यात् । तथा विभागात्प्राक् पितृप्रसादलब्धस्य विभागप्रतिषेधो नोपपद्यते । सर्वानुमत्या दत्तत्वाद्विभागप्राप्त्यभावात् । यथाह-'शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत् । त्रीण्येतान्यविभज्यानि प्रसादो यश्च पैतृकः' ॥ इति । तथा-'भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत् । सा यथाकाममश्नीयाद्दद्याद्वा स्थावरादृते' ॥ इति प्रीतिदानवचनं च नोपपद्यते जन्मनैव स्वत्वे । न च स्थावरादृते यद्दत्तमिति सम्बन्धो युक्तो व्यवहितयोजनाप्रसङ्गात् । यदपि-'मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः । स्थावरस्य तु सर्वस्य न पिता न पितामहः' ॥ तथा-'पितृप्रसादाद् भुज्यन्ते वस्त्राण्याभरणानि च । स्थावरं तु न भुज्येत प्रसादे सति पैतृके' ॥ इति स्थावरस्य प्रसा(३)ददाने प्रतिषेधवचनं तत्पितामहोपात्तस्थावरविषयम् । अतीते पितामहे तद्धनं पितापुत्रयोः (४)साधारणमपि मणिमुक्तादि पितुरेव । स्थावरं तु साधारणमित्यस्मादेव वचनादवगम्यते । तस्मान्न जन्मना स्वत्वं किंतु स्वामिनाशाद्विभागाद्वा स्वत्वम् । अत एव पितुरूर्ध्वं विभागात्प्राग्द्रव्यस्वत्वस्य प्रहीणत्वादन्येन गृह्यमाणं न निवार्येत इति चोद्यस्यानवकाशः । तथैकपुत्रस्यापि पितृप्रयाणादेव पुत्रस्य स्वमिति न विभागमपेक्षत इति । अत्रोच्यते-लोकप्रसिद्धमेव स्वत्वमित्युक्तम् । लोके च पुत्रादीनां जन्मनैव स्वत्वं प्रसिद्धतरं नापह्नवमर्हति । विभागशब्दश्च बहुस्वामिकधनविष(५)यो लोकप्रसिद्धो ना-

---

(१) स्वमुत. घ. । (२) प्रसादादिह न प्रति ख. । (३) प्रसाददाने प्रति घ. ।
(४) समानमपि घ. । (५) विषयः प्रसिद्धो ग. ।

न्यदीय(१)विषयो न प्रहीणविषयः । '(२)तथोत्पत्त्यैवार्थस्वामित्वं लभेतेत्याचार्याः' इति गौतमवचनाच्च । 'मणिमुक्ताप्रवालानाम्' इत्यादिवचनं च जन्मना स्वत्वपक्षे एवोपपद्यते । न च पितामहोपात्तस्थावरविषयमिति युक्तम् । 'न पिता न पितामहः' इति वचनात् । पि(३)तामहस्य हि स्वार्जितमपि पुत्रे पौत्रे च सत्यदेयमिति वचनं जन्मना स्वत्वं गमयति । यथा परमते मणिमुक्ताप्र(४)वालवस्त्राभरणादीनां पैतामहानामपि पितुरेव स्वत्वं वचनात्, एवमस्मन्मतेऽपि पित्रार्जितानामप्येते(५)षां पितुर्दानाधिकारो वचनादित्यविशेषः । यत्तु 'भर्त्रा प्रीतेन' इत्यादिविष्णुवचनं स्थावरस्य प्रीतिदानज्ञापनं तत्स्वोपार्जितस्यापि पुत्राद्यभ्यनुज्ञयैवेति व्याख्येयम् । पूर्वोक्तमणिमुक्तादिवचनैः स्थावरव्यतिरिक्तस्यैव प्रीतिदानयोग्यत्वनिश्चयात् । यदप्यर्थसाध्येषु वैदिकेषु कर्मस्वनधिकार इति, तत्र तद्विधानबलादेवाधिकारो गम्यते । तस्मात्पैतृके पैतामहे च द्रव्ये जन्मनैव स्वत्वम्, तथा हि पितुरावश्यकेषु धर्मकृत्येषु वाचनिकेषु प्रसाददानकुटुम्बभरणापद्विमो(६)क्षादिषु च स्थावरव्यतिरिक्तद्रव्यविनियोगे स्वातन्त्र्यमिति स्थितम् । स्थावरे तु स्वार्जिते पित्रादिप्राप्ते च पुत्रादिपारतन्त्र्यमेव । 'स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम् । असंभूय सुतान्सर्वान्न दानं न च विक्रयः ॥ ये जाता येऽप्यजाताश्च ये च गर्भे व्यवस्थिताः । वृत्तिं च तेऽभिकाङ्क्षन्ति न दानं न च विक्रयः' ॥ इत्यादिस्मरणात् । अस्यापवादः—'एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम् । आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः' ॥ अस्यार्थः— अप्राप्तव्यवहारेषु पुत्रेषु पौत्रेषु (७)वाऽनुज्ञानादावसमर्थेषु भ्रातृषु वा तथाविधेष्वविभक्तेष्वपि सकलकुटुम्बव्यापिन्यामापदि तत्पोषणे वावश्यकर्तव्येषु च पितृश्राद्धादिषु स्थावरस्य दानाधमनविक्रयमेकोऽपि समर्थः कुर्यादिति । यत्तु वचनम्—'अविभक्ता विभक्ता वा सपिण्डाः स्थावरे समाः । एको ह्यनीशः सर्वत्र दानाधमनविक्रये' ॥ इति, तदप्यविभक्तेषु द्रव्यस्य मध्यस्थत्वादेकस्यानी(८)श्वरत्वात् सर्वाभ्यनुज्ञावश्यं कार्या । विभक्तेषु तूत्तरकालं विभक्ताविभक्तसंश-

(१) न्यदीयधनविषयो घ. । (२) तं तथोत्पत्त्यैव ख. । (३) पितृपितामहस्य घ. ।
(४) मुक्तावस्त्राभरणा ख—घ. । (५) एतेषां मणिमुक्तादीनां. ।
(६) विमोक्षणादिषु घ. । (७) वा अनुज्ञादानादा ख. । (८) अनीशकत्वात् घ. ।

यद्युदासेन व्यवहारसौकर्याय सर्वाभ्यनुज्ञा न पुनरेकस्यानीश्वरत्वेन। अतो विभक्तानुमतिव्यतिरेकेणापि व्यवहारः सिध्यत्येवेति व्याख्येयम्। यदपि–'स्वग्रामज्ञातिसामन्तदायादानुमतेन च। हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी'॥ इति, तत्रापि ग्रामानुमतिः। 'प्रतिग्रहः प्रकाशः स्यात्स्थावरस्य विशेषतः' इति स्मरणात् व्यवहारप्रकाशनार्थमेवापेक्ष्यते न पुनर्ग्रामानुमत्या विना व्यवहारसिद्धिः। सामन्तानुमतिस्तु सीमावि(१)प्रतिपत्तिनिरासाय। ज्ञातिदायानुमतेस्तु प्रयोजनमुक्तमेव 'हिरण्योदकदानेन' इति। 'स्थावरे विक्रयो नास्ति कुर्यादाधिमनुज्ञया' इति स्थावरस्य विक्रयप्रतिषेधात्। 'भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति। उभौ तौ पुण्यकर्माणौ नियतौ स्वर्गगामिनौ'॥ इति दानप्रशंसादर्शनाच्च। विक्रयेऽपि कर्तव्ये सहिरण्यमुदकं दत्त्वा दानरूपेण स्थावरविक्रयं कुर्यादित्यर्थः। पैतृके पैतामहे च धने जन्मनैव स्वत्वेऽपि विशेषं 'भूर्या पितामहोपात्ता' इत्यत्र वक्ष्यामः॥

(मिता०) इदानीं यत्र काले येन च यथा विभागः कर्तव्यस्तद्दर्शयन्नाह—

विभागमिति। यदा विभागं पिता चिकीर्षति तदा इच्छया (२) विभजेत् पुत्रानात्मनः सकाशात् पुत्रं पुत्रौ पुत्रान्। इच्छाया निरङ्कुशत्वादनियमप्राप्तौ नियमार्थमाह–ज्येष्ठं वा श्रेष्ठभागेनेति। ज्येष्ठं श्रेष्ठभागेन, मध्यमं (३)मध्यभागेन, कनिष्ठं कनिष्ठभागेन विभजेदित्यनुवर्तते। श्रेष्ठादिविभागश्च मनुनोक्तः (९।११२)–'(४)ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्। ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः' इति। वाशब्दो वक्ष्यमाणपक्षापेक्षः। सर्वे वा स्युः समांशिन इति। सर्वे वा ज्येष्ठादयः समांशभाजः कर्तव्याः। अयं

---

(१) सीमाप्रतिपत्ति ख–ग.।

(२) इच्छयेति ऐच्छिकविभाग एव विवृत उत्तरार्धेन। इच्छायाः संभवति उक्तपक्षद्वयावलम्बनत्वे स्वातन्त्र्यप्रयोगाद्वाक्यभेदापत्तेः, एकस्मै लक्षं कस्मैचित्कपर्दिकमन्यस्मै न किमपीत्यव्यवस्थापत्तेश्च व्य. म.।

(३) मध्यमभागेन घ.। (४) उद्ध्रियत इत्युद्धारः। ज्येष्ठस्याविभक्तसाधारणधनादुद्धृत्य विंशतितमो भागः सर्वद्रव्येभ्यश्च यच्छ्रेष्ठं तद्दातव्यमित्यादि। अयं चोद्धारविभागः कलौ नेष्टः कलिवर्ज्ये पाठात् व्य. म.

च विषमो विभागः स्वार्जितद्रव्यविषयः । पितृक्रमायाते तु समस्वाम्यस्य वक्ष्यमाणत्वान्नेच्छया विषमो विभागो युक्तः । विभागं चेत्पिता कुर्यादिति यदा पितुर्विभागेच्छा स तावदेकः कालः । अपरोऽपि कालो जीवत्यपि पितरि द्रव्यनिःस्पृहे निवृत्तरमणे, मातरि च निवृत्तरजस्कायां पितुरनिच्छायामपि पुत्रेच्छयैव विभागो भवति । यथोक्तं नारदेन–'अत ऊर्ध्वं पितुः पुत्रो विभजेयुर्धनं समम्' इति, पित्रोरूर्ध्वं विभागं प्रतिपाद्य–'(१)मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च । निवृत्ते चापि रमणे पितर्युपरतस्पृहे' ॥ इति दर्शितः । अत्र पुत्रा धनं समं विभजेयुरित्यनुषज्यते । गौतमेनापि–'ऊर्ध्वं पितुः पुत्रा रिक्थं विभजेरन्' इत्युक्त्वा 'निवृत्ते चापि रजसि' ति द्वितीयः कालो दर्शितः । जीवति चेच्छ(२)तीति तृतीयः कालः । तथा सरजस्कायामपि मातर्यनिच्छत्यपि पितर्यधर्मवर्तिनि दीर्घरोगग्रस्ते च पुत्राणामिच्छया भवति विभागः । यथाह शङ्खः–'अकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि रोगिणि च' इति ॥ ११४ ॥

(मिता०) पितुरिच्छाया विभागो द्विधा दर्शितः—समो विषमश्चेति । तत्र समविभागे विशेषमाह—

यदीति । यदा स्वेच्छया पिता सर्वानेव सुतान्समविभागिनः करोति तदा पत्न्यश्च पुत्रसमांशभाजः कर्तव्याः, यासां पत्नीनां भर्त्रा श्वशुरेण वा स्त्रीधनं न दत्तम् । दत्ते तु स्त्रीधने अर्धांशं वक्ष्यति–'दत्ते त्वर्धं प्रकल्पयेत्' इति । यदा तु श्रेष्ठभागादिना ज्येष्ठादीन् विभजति तदा पत्न्यः श्रेष्ठादिभागान्न लभन्ते किंतूद्धृतोद्धारात्समुदायात्समानेवांशान्लभन्ते स्वोद्धारं च । यथाहापस्तम्बः–'परीभाण्डं च गृहेऽलंकारो भार्यायाः' इति ॥ ५ ॥

(मिता०) 'ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युः समांशिन' इति पक्षद्वयेऽप्यवादमाह—

शक्तस्येति । स्वयमेव द्रव्यार्जनसमर्थस्य पितृद्रव्यमनीहमानस्यानिच्छ(३)तोपि यत्किञ्चिदसारमपि दत्वा पृथक् क्रिया=विभागः

---

(१) मातुरिति । रमणः कामः । उपरतस्पृहो विरक्तः । प्रत्तासु भगिनीषु चेति काकाक्षिवद्रजोरमणनिवृत्त्योर्विशेषणम् व्य. म. । (२) इच्छायामुक्तं, तदिच्छां विनापि विभागमाह बृहस्पतिः–'क्रमागते गृहक्षेत्रे पिता पुत्राः समांशिनः । पैतृकेन विभागार्हाः सुताः पितुरनिच्छया' ॥ अर्थात्पितामहाद्यर्जिते धने तदनिच्छयापि पुत्रा विभागार्हा इत्यर्थः व्य. म. ।

(३) छतो यत्किञ्चिदसारमपृथक् ख ग. ।

कार्यः पित्रा । तत्पुत्रादीनां दायजिघृक्षा माभूदिति ॥

(मिता०) ज्येष्ठं वा श्रेष्ठभागेनेति न्यूनाधिको विभागो दर्शितः। तत्र शास्त्रोक्तोद्धारादिविषमविभागव्यतिरेकेणाऽन्यथाविषमविभाग-निषेधार्थमाह—

न्यूनेति । न्यूनाधिकविभागेन विभक्तानां पुत्राणामसौ न्यूनाधि-कविभागो यदि धर्म्यः शास्त्रोक्तो भवति तदासौ पितृकृतः कृत एव न निवर्तेत इति मन्वादिभिः स्मृतः । अन्यथा तु पितृकृतोऽपि निव-र्तेत इत्यभिप्रायः । यथाह नारदः—'व्याधितः कुपितश्चैव विषयास-क्तमानसः । अन्यथा शास्त्रकारी च न विभागे पिता प्रभुः' ॥ इति ॥ ११६ ॥

(वी०मि०) अथ मृतपितृकविभागमाह—

विभजेरन् सुताः पित्रोरूर्ध्वमृक्थमृणं समम् ॥
मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ॥ ११७ ॥

पित्रोर्मातापित्रोः ऋक्थं धनमृणं च ऊर्ध्वं पित्रोर्मरणानन्तरं सुताः पुत्राः समं विभजेयुः । मातुर्धनं तद्दुहितरोऽपि भ्रातृभिः समं मात्रृणनिस्तरावशिष्टं चेत्तदा गृह्णीयुः ऋणं पुत्रा एव दद्युः । दुहि तृभ्य ऋते दुहितॄणामभावेऽन्वयो दुहितृपुत्रौ निजमातृलभ्यमंशं लभेयाताम् । तदाह मनुः—

जनन्यां संस्थितायां तु समं सर्वे सहोदराः ।
भजेरन् मातृकं रिक्थं भगिन्यश्च सनाभयः ॥
यास्तासां स्युर्दुहितरस्तासामपि यथांऽशतः ।

विभजेयुर्धनमित्यनुवृत्तौ नारदः—'मातुर्दुहितरोऽभावे दुहितॄणां समांशभागित्वं कुमारीणामेव' । तदाह बृहस्पतिः—

स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी ।
अप्रत्ता चेत्समूढा तु लभते मानमात्रकम् ॥

अपत्यानां पुत्राणां समूढा विवाहिता मानमात्रकं सम्मानमात्र-फलकं किञ्चिद्वस्त्रादि । गौतमः—'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठि-तानां च' । 'अप्रतिष्ठिताऽनपत्या दुर्भगा निर्धनभर्तृका चे'ति रत्नाकरः । मनुः—

मातुश्च यौतकं यत्स्यात् कुमारीभाग एव सः ।

यौतकं विवाहकाले पित्रादितो लब्धम् । वसिष्ठः–'अथ भ्रातॄणां दायविभागो याश्चाऽनपत्याः स्त्रियस्तासां च पुत्रलाभात्'। स्त्रिय इत्यत्र भ्रातॄणामित्यनुषङ्गः। तथा च विधवायाः शङ्कितपुत्राया भ्रातृभार्याभागः कर्तव्यः। तस्याः पुत्रे जाते स भागस्तत्पुत्रस्य, पुत्रव्यतिरेकनिश्चये तु स भागो देवरादिभिरेव ग्राह्यः । पितुरित्यनुवृत्तौ बृहस्पतिः—

तदभावे तु जननी तनयांशसमांशिनी ।
समांशा मातरस्त्वेषां तुरीयांशा च कन्यका ॥

जननी पुत्रवती, मातरः सपत्नीमातरोऽपुत्राः, एताः सर्वाः पुत्रतुल्यभागाः । एषां भगिनी तुरीयांशा अविवाहिता कन्या पितृधने भवतीत्यर्थः। व्यासः—

असुतास्तु पितुः पत्न्यः समांशाः परिकीर्तिताः ॥–॥ ११७॥

(मिता०) इदानीं विभागस्य कालान्तरं कर्त्रन्तरं प्रकारनियमं चाह—

विभजेरन्निति । पित्रोर्मातापित्रोरूर्ध्वं (१)प्रायणादिति कालो दर्शितः। सुता इति कर्तारो दर्शिताः। सममिति प्रकारनियमः। सममेवेति रिक्थमृणं च विभजेरन् । ननु—'ऊर्ध्वं पितुश्च मातुश्च' (मनुः ९।१०४) इत्युपक्रम्य (मनुः ९।१०५)—'ज्येष्ठ एव तु गृह्णीयात्पित्र्यं धनमशेषतः । शेषास्तमुपजीवेयुर्यथैव पितरं तथा' ॥ इत्युक्त्वोक्तम् (मनुः ९।११२)—'ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् । (२)ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः' ॥ इति । सर्वस्माद् द्रव्य(३)समुदायाद्विंशतितमो भागः सर्वद्रव्येभ्यश्च यच्छ्रेष्ठं तज्ज्येष्ठाय दातव्यम् । तदर्धं चत्वारिंशत्तमो भागो मध्यमं च द्रव्यं मध्यमाय दातव्यम् । तुरीयमशीतितमो भागो हीनं द्रव्यं च कनिष्ठाय दातव्यमिति मातापित्रोरूर्ध्वं विभजतामुद्धारविभागो मनुना दर्शितः। तथा (मनुः ९।११६।११७)—'उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना । एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽनुजः ॥ अंशमंशं यवीयांस इति धर्मो व्यवस्थितः' ॥ इति । ज्येष्ठस्य द्वौ भागौ तदनन्तरजातस्य सार्धमेको भागः ततोऽनुजानामेकैको विभाग इत्युद्धारव्यतिरेकेणापि विषमो विभागो दर्शितः(४) पित्रो-

(१) प्रयाणात् ख-ग. । (२) तदर्धं मध्यमस्य स्यात्तदर्धं तु कनीयस इति ख-म-पाठः. ।
(३) समुच्चयात् घ. । (४) दर्शितो मनुना ग. ।

रूर्ध्वं विभजताम् । जीवद्विभागे च स्वयमेव विषमो विभागो दर्शितो 'ज्येष्ठं वा श्रेष्ठभागेन' इति । अतः सर्वस्मिन्नपि काले विषमो विभागोऽस्तीति (१)कथं सममेव विभजेरन्निति नियम्यते । अत्रोच्यते सत्यम्-अयं विषमो विभागः (२)शास्त्रदृष्टस्तथापि लोकविद्विष्टत्वान्नानुष्ठेयः । 'अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु' इति निषेधात् । यथा—'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्' इति विधानेऽपि लोकविद्विष्टत्वादननुष्ठानम् । यथा वा—'मैत्रावरुणीं गां वशामनुबन्ध्यामालभेत' इति गवालम्भनविधानेऽपि लोकविद्विष्टत्वादननुष्ठानम् । उक्तं च—'यथा नियोगधर्मो नो नानुबन्ध्यावधोऽपि वा । तथोद्धारविभागोऽपि नैव संप्रति वर्तते' ॥ इति । (नियोग(३)मनतिक्रम्य यथानियोगं, नियोगाधीनो यो धर्मो 'देवराच्च सुतोत्पत्ति'रित्यादिः स नो भवति) आपस्तम्बोऽपि—'जीवन्पुत्रेभ्यो दायं विभजेत्समम्' इति(४)समतामुक्त्वा—'ज्येष्ठो दायाद इत्येक' इति कृत्स्नधनग्रहणं ज्येष्ठस्यैकीयमतेनोपन्यस्य 'देशविशेषे(५)ण सुवर्णं कृष्णा गावः कृष्णभौमः ज्येष्ठस्य(६) रथः पितुः(७) परीभाण्डं च गृहेऽलङ्कारो भार्याया ज्ञातिधनं चेत्येके' इत्येकीयमतेनैवोद्धारविभागं दर्शयित्वा तच्छास्त्रविप्रतिषिद्धमिति निराकृतवान् । तं च शास्त्रवि(८)प्रतिषेधं स्वयमेव दर्शयतिस्म मनुः-'पुत्रेभ्यो दायं विभजेदित्यविशेषेण श्रूयते' इति । तस्माद्विषमो विभागः शास्त्रदृष्टोऽपि लोकविरोधाच्छ्रुतिविरोधाच्च नानुष्ठेय इति सममेव विभजेरन्निति नियम्यते ॥

(मिता०) मातापित्रोर्धनं सुता विभजेरन्नित्युक्तं तत्र मातृधनेऽपवादमाह—

मातुरिति । मातुर्धनं दुहितरो विभजेरन् । ऋणाच्छेषं मातृकतर्णापाकरणावशिष्टम् । अतश्चर्णसमं न्यूनं वा मातृधनं सुता विभजेरन्नित्यस्य विषयः । एतदुक्तं भवति—मातृकृत(९)मृणं पुत्रैरेवापाकरणीयं न दुहितृभिः । ऋणावशिष्टं तु धनं दुहितरो गृह्णीयुरिति ।

---

(१) कथं विभजेरन्निति सममेव नियम्यते घ. ।
(२) शास्त्रदृष्टोस्ति ग. । (३) धनुश्चिह्नान्तर्गतो भागः ख. पुस्तकेऽधिकः. ।
(४) स्वमतमुक्त्वा ख. घ. । (५) विशेषेषु घ. । (६) उत्कृष्टोंऽशो ज्येष्ठस्य पितुः. ।
(७) परिभाण्डं ग. । (८) विप्रतिषिद्धं घ. । (९) कृतर्णं. ।

युक्तं चैतत् । 'पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः' इति स्त्र्यवयवानां दुहितृषु बाहुल्यात् स्त्रीधनं दुहितृगामि । पितृधनं पुत्रगामि पित्रवयवानां पुत्रेषु बाहुल्यादिति । तत्र च गौतमेन विशेषो दर्शितः—'स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानां च' इति । अस्यार्थः—प्रत्ताऽप्रत्तासमवायेऽप्रत्तानामेव स्त्रीधनम् । प्रत्तासु चाप्रतिष्ठिताप्रतिष्ठितासमवायेऽप्रतिष्ठितानामेवेति । अप्रतिष्ठिता निर्धनाः ॥

(मिता०) दुहित्रभावे मातृधनमृणावशिष्टं को गृह्णीयादित्यत आह—

ताभ्य इति । ताभ्यो दुहितृभ्यो विना दुहितॄणामभावे (१)अन्वयः पुत्रादिर्गृह्णीयात् । एतच्च—'विभजेरन्सुताः पित्रोरूर्ध्वम्' इत्यनेनैव सिद्धं स्पष्टार्थमुक्तम् ॥ ११७ ॥

(वी०मि०) अथाऽविभाज्यमाह—

पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितम् ॥
मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ॥ ११८ ॥
क्रमादभ्यागतं द्रव्यं हृतमभ्युद्धरेत्तु यः ॥
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥ ११९ ॥

पित्रोर्द्रव्यस्याऽविरोधेन व्ययं विना यदन्यद्वाणिज्यादिना द्रव्यं स्वयमर्जितं, यच्च मैत्रं मित्रसकाशाल्लब्धं, औद्वाहिकं विवाहलब्धं यत्तद्दायादानामन्येषां भ्रात्रादीनां न विभाज्यं भवेत् । पितृपितामहादिक्रमायातमपि द्रव्यं परैर्हृतमसामर्थ्यात् पित्रादिभिरनुद्धृतं य एकः स्वसामर्थ्येनोद्धरेत् तद्द्रव्यं स दायादेभ्यो न दद्यादित्यर्थः । तदाह-

कात्यायनः—

परभक्तप्रदानेन प्राप्ता विद्या यदन्यतः ।
तया प्राप्तं तु यद् द्रव्यं विद्याप्राप्तं तदुच्यते ॥

इति । अत्रापि लाभे पितृद्रव्यानुपश्लेषोऽविभाज्यत्वे बीजमिति प्रकाशः, तदयुक्तं पृथगुपादाने वैयर्थ्यापत्तेः । इदं तु विद्यार्जनकाले कुटुम्बस्य दायादैर्भरणाभावेऽविभाज्यं नो चेद्विभाज्यमेव ।

कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात्स लभेताऽश्रुतोऽपि सन् ॥

---

(१) दुहित्रन्वय इत्यपरार्कः ।

इति कात्यायनवचनात् । आद्येन चकारेण मधुपर्ककाले पूज्यतया लब्धस्य मनूक्तस्य । द्वितीयेन तु—

पितामहेन यद्दत्तं पित्रा वा प्रीतिपूर्वकम् ।
तस्य तन्नापहर्तव्यं मात्रा दत्तं च यद्भवेत् ॥

इति व्यासोक्तस्य स्वयमग्रे वक्ष्यमाणस्य च समुच्चयः । एवकाराभ्यामुभयत्र पितृद्रव्यानुपश्लेषापेक्षया व्यवच्छेदः । तुशब्देनाऽन्यदायादसाहित्यमुद्धरणे व्यवच्छिन्नम् ॥ ११८—११९ ॥

(मिता०) अविभाज्यमाह—

पितृद्रव्येति, क्रमादिति च । मातापित्रोर्द्रव्याविनाशेन यत्स्वयमर्जितं, मैत्रं मित्रसकाशाद्यल्लब्धं, औद्वाहिकं विवाहाद्यल्लब्धं दायादानां भ्रातॄणां तन्न भवेत् । क्रमात्पितृक्रमादायातं यत्किंचिद्द्रव्यं अन्यैर्हृतमसामर्थ्यादिना पित्रादिभिरनुद्धृतं यः पुत्राणां मध्य इतराभ्यनुज्ञयोद्धरति तद्दायादेभ्यो भ्रात्रादिभ्यो न दद्यादुद्धर्तैव गृह्णीयात् । तत्र क्षेत्रे तुरीयांशमुद्धर्ता लभते शेषं तु सर्वेषां सममेव । यथाह शङ्खः—'पूर्वं नष्टां तु यो भूमिमेकश्चेदुद्धरेत्क्रमात् । यथाभागं लभन्तेऽन्ये दत्वांशं तु तुरीयकम्' ॥ इति । क्रमादभ्यागतमिति शेषः । तथा विद्यया वेदाध्ययनेनाध्यापनेन वेदार्थव्याख्यानेन वा यल्लब्धं तदपि दायादेभ्यो न दद्यात् । अर्जक एव गृह्णीयात् । अत्र च 'पितृद्रव्याविरोधेन यत्किंचित्स्वयमर्जितम्' । इति (१)सर्वशेषः । अतश्च पितृद्रव्याविरोधेन यन्मैत्रमर्जितं, पितृद्रव्याविरोधेन यदौद्वाहिकं, पितृद्रव्याविरोधेन यत्क(२)मायातमुद्धृतं, पितृद्रव्याविरोधेन विद्यया यल्लब्धमिति प्रत्येकमभिसम्बध्यते । तथा च पितृद्रव्याविरोधेन प्रत्युपकारेण यन्मैत्रम्, आसुरादिविवाहेषु यल्लब्धम्, तथा पितृद्रव्यव्ययेन यत्क्रमायातमुद्धृतं, तथा पितृद्रव्यव्ययेन लब्धया विद्यया यल्लब्धं, तत्सर्वं सर्वैर्भ्रातृभिः पित्रा च वि(३)भजनीयम् । तथा पितृद्रव्याविरोधेनेत्यस्य सर्वशेषत्वादेव पितृद्रव्यविरोधेन प्रतिग्रहलब्धमपि विभजनीयम् । अस्य च सर्वशेषत्वाभावे मैत्रमौद्वाहिकमित्यादि नारब्धव्यम् । अथ पितृद्रव्यविरोधेनापि यन्मैत्रादिलब्धं तस्याविभाज्यत्वाय मैत्रादिवचनमर्थवदित्युच्यते तथा सति समाचारविरोधः, विद्यालब्धे नारदवचनविरोधश्च ।

(१) सर्वत्र शेषः ख. । (२) क्रमादायातं ख. । (३) समं विभजनीयं घ. ।

'कुटुम्बं बिभृयाद् भ्रातुर्यो विद्यामधिगच्छतः । भागं विद्याधनात्तस्मात्स लभेताश्रुतोऽपि सन्' ॥ इति । तथा विद्याधनस्याविभाज्यस्य लक्षणमुक्तं कात्यायनेन—'परभक्तोपयोगेन विद्या प्राप्तान्यतस्तु या । तया लब्धं धनं यत्तु विद्याप्राप्तं तदुच्यते' ॥ इति । तथा पितृद्रव्याविरोधेनेत्यस्य भिन्नवाक्यत्वे प्रतिग्रहलब्धस्याविभाज्यत्वमाचारवि(१)रुद्धमापद्येत । एतदेव स्पष्टीकृतं मनुना (९।२०८)—'अनुपघ्नन्पितृद्रव्यं श्रमेण यदुपार्जितम् । (२)दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च' ॥ इति । श्रमेण सेवायुद्धादिना । ननु पितृद्रव्याविरोधेन यन्मैत्रादिलब्धं द्रव्यं तदविभाज्यमिति न वक्तव्यम् । विभागप्राप्त्यभावात् । यद्येन लब्धं तत्तस्यैव नान्यस्येति प्रसिद्धतरम् । प्राप्तिपूर्वकश्च (३) प्रतिषेधः । अत्र कश्चिदित्थं प्राप्तिमाह—'यत्किंचित्पितरि प्रेते धनं ज्येष्ठोऽधिगच्छति । भागो यवीयसां तत्र यदि विद्यानुपालिनः' ॥ इति । ज्येष्ठो वा कनिष्ठो वा मध्यमो वा पितरि प्रेते अप्रेते वा यवीयसां वर्षीयसां चेति व्याख्यानेन पितरि सत्यसति च मैत्रादीनां विभाज्यत्वं प्राप्तं प्रतिषिध्यत इति । तदसत् । नह्यत्र प्राप्तस्य प्रतिषेधः किंतु सिद्धस्यैवानुवादोऽयम् । लोकसिद्धस्यैवानुवादकान्येव प्रायेणास्मिन्प्रकरणे वचनानि । अथवा 'समवेतैस्तु यत्प्राप्तं सर्वे तत्र समांशिनः' । इति प्राप्तस्यापवाद इति सन्तुष्यतु भवान् । अतश्च 'यत्किंचित्पितरि प्रेते' इत्यस्मिन्वचने ज्येष्ठादिपदाविवक्षया प्राप्तिरिति व्यामोहमात्रम् । अतो मैत्रादिवचनैः पितुः प्रागूर्ध्वं (५)वा विभाज्यत्वेनोक्तस्य 'यत्किंचित्पितरि प्रेते' इत्य(४)पवाद इति व्याख्येयम् । तथान्यदप्यविभाज्यमुक्तं मनुना (९।२१९)—'वस्त्रं पत्रमलङ्कारं कृतान्नमुदकं स्त्रियः । योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते' ॥ इति । धृतानामेव वस्त्राणामविभाज्यत्वं, यद्येन धृतं तत्तस्यैव । पि(६)तृधृतवस्त्राणि तु पितुरूर्ध्वं विभजतां श्राद्धभोक्त्रे दातव्यानि । यथाह बृहस्पतिः—'वस्त्रालङ्कारश

---

(१) विरोधश्चापद्येत घ. ।

(२) दायादेभ्य इत्यस्य स्थाने 'स्वयमीहितलब्धं तन्नाकामो दातुमर्हति' इत्युत्तरार्धं मनुस्मृतावुपलभ्यते. ।

(३) निषेधः घ. । (४) चाविभाज्य घ. । (५) इत्यस्यापवाद ख. ।

(६) पितृधृतानि ख. ।

व्यादि पितुर्यद्वाहनादिकम् । गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे स-मर्पयेत्' ॥ इति । अभिनवानि तु वस्त्राणि विभाज्यान्येव । पत्रं वा-हनमश्वशिबिकादि तदपि येनारूढं तत्तस्यैव । पित्र्यं तु वस्त्रवदेव। अश्वादीनां बहुत्वे तु तद्विक्रयोपजीविनां विभाज्यत्वमेव । वैषम्येण विभाज्यत्वे ज्येष्ठस्य । (मनुः ९।११९)-'अजाविकं सैकशफं न जातु विषमं भजेत् । अजाविकं सैकशफं ज्येष्ठस्यैव विधीयते' ॥ इति मनु-स्मरणात् । अलङ्कारोऽपि यो येन धृतः स तस्यैव । अधृतः साधा-रणो विभाज्य एव । (मनुः ९।२००) 'पत्यौ जीवति यः स्त्रीभिरल-ङ्कारो धृतो भवेत् । न तं भजेरन्दायादा भजमानाः प(१)तन्ति ते' ॥ इति । अलङ्कारो धृतो भवेदिति वि(२)शेषेणोपादानादधृतानां विभा-ज्यत्वं गम्यते । कृतान्नं तण्डुलमोदकादि तदप्यविभाज्यं यथासंभवं भोक्तव्यम् । उदकं उदकाधारः कूपादिः, तच्च विषमं मूल्यद्वारेण न विभाज्यं पर्यायेणोपभोक्तव्यम् । स्त्रियश्च दास्यो विषमाः न मूल्य-द्वारेण विभाज्याः पर्यायेण कर्म कारयितव्याः । अवरुद्धास्तु पित्रा स्वैरिण्याद्याः समा अपि पुत्रैर्न विभाज्याः । 'स्त्रीषु च संयुक्तास्ववि-भागः' इति गौतमस्मरणात् । योगश्च क्षेमं च योगक्षेमम् । योगश-ब्देनालब्धलाभकार(३)णं श्रौतस्मार्ताग्निसाध्यं इष्टं कर्म लक्ष्यते । क्षे-मशब्देन लब्धपरिरक्षणहेतुभूतं बहिर्वेदिदानतडागारामनिर्माणादि पूर्तं कर्म लक्ष्यते । तदुभयं पैतृकमपि पितृद्रव्यविरोधार्जितमप्यवि भाज्यम् । यथाह लौगाक्षिः-'क्षेमं पूर्तं योगमिष्टमित्याहुस्तत्त्वद-र्शिनः । अविभाज्ये च ते प्रोक्ते शयनासनमेव च' ॥ इति । योगक्षे-मशब्देन योगक्षेमकारिणो राजमन्त्रिपुरोहितादय उच्यन्ते इति केचित् । छत्रचामरशस्त्रोपानत्प्रभृतय इत्यन्ये । प्रचारो गृहारामा-दिषु प्रवेशनिर्गममार्गः सोऽप्यविभाज्यः । यत्तूशनसा-क्षेत्रस्यावि-भाज्यत्वमुक्तम्-'अविभाज्यं सगोत्राणामासहस्रकुलादपि । याज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः' ॥ इति, तद् ब्राह्मणोत्पन्नक्षत्रि-यादिपुत्रविषयम् । 'न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै । यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेत्' ॥ इति स्मरणात् । याज्यं याजन-कर्मलब्धम् । पितृप्रसादलब्धस्याविभाज्यत्वं वक्ष्यते । नियमातिक्र-मस्याविभाज्यत्वमनन्तरमेव निरासि । पितृद्रव्यविरोधेन यदर्जितं

(१) पतन्त्यधः ग. । (२) विशेषस्योपादाना ग. । (३) करणं ख. ।

तद्विभजनीयमिति स्थितं, तत्राऽर्जकस्य भागद्वयं, वसिष्ठवचनात् । 'येन चैषां स्वयमुपार्जितं स्यात्स द्व्यंशमेव लभेते'ति ॥ ११८-११९ ॥

(वी०मि०) अस्यापवादमाह—

सामान्यार्थसमुत्थाने विभागस्तु समः स्मृतः ॥

सर्वेषां भ्रातॄणां साधारणेऽर्थार्जनव्यापारे कृषिवाणिज्यादिरूपे तु समः सर्वेषां विभागः । तुशब्देन पितृद्रव्यानुपश्लेषार्जितत्वनिबन्धनमविभाज्यत्वमुक्तं व्यवच्छिनत्ति ॥

(मिता०) अस्यापवादमाह—

सामान्येति । अविभक्तानां भ्रातॄणां (१)सामान्यस्यार्थस्य कृषिवाणिज्यादिना संभूय समुत्थाने सम्यग्वर्धने केनचित्कृते सम एव विभागो नार्जयितुरंश(२)द्वयम् ॥

(वी०मि०) अथ पैतामहे धने भिन्नपितृकाणां पौत्राणां विभागमाह—

अनेकपितृकाणां तु पितृतो भागकल्पना ॥ १२० ॥

यत्रैकस्य पुत्र एकः परस्य तु चत्वारः पुत्रास्तत्र भागद्वयं कार्यम् । तत्रैको भाग एकपुत्रेण ग्राह्यः । परस्य पुत्रैश्चतुर्भिर्मिलित्वा चाऽपरो भागो ग्राह्यः । तुशब्देन पौत्रसंख्यया भागसंख्यां व्यवच्छिनत्ति ॥ १२० ॥

(मिता०) पित्र्ये द्रव्ये पुत्राणां विभागो दर्शितः । इदानीं पैतामहे पौत्राणां विभागे विशेषमाह—

अनेकेति । यद्यपि पैतामहे द्रव्ये पौत्राणां जन्मना स्वत्वं पुत्रैरविशिष्टं तथापि तेषां पितृद्वारेणैव पैतामह(३)द्रव्यविभागकल्पना न स्वरूपापेक्षया । एतदुक्तं भवति-यदाऽविभक्ता भ्रातरः पुत्रानुत्पाद्य दिष्टं गतास्तदैकस्य द्वौ पुत्रावन्यस्य त्रयोऽपरस्य चत्वार इति पुत्राणां वैषम्ये तत्र द्वावेकं स्व(४)पित्र्यमंशं लभेते, अन्ये त्रयोऽप्येकमंशं पित्र्यं, चत्वारोऽप्येकमेवांशं पित्र्यं लभन्त इति । तथा केषुचित्पुत्रेषु ध्रियमाणेषु केषुचित्पुत्रानुत्पाद्य विनष्टेस्वप्यय(५)मेव न्यायो ध्रियमाणाः स्वानंशानेव लभन्ते, नष्टानामपि पुत्राः पित्र्यानेवांशां लभन्त इति वाचनिकी व्यवस्था ॥ १२० ॥

---

(१) साधारणार्थस्य ग-घ. । (२) भागद्वयम् घ. ।
(३) द्रव्ये विभागा ख. । (४) पित्र्यंशं घ. । (५) ष्वयमेव ख-ग. ।

(वी०मि०) पैतामहे धने पित्रा सह विभागे पितुरिच्छया नांशकल्पना किन्तु पितुर्द्विगुणः पुत्राणां च समोंऽशः स्यादित्याह—

भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा ॥

तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः(१) ॥१२१॥

भूर्हिरण्यादिद्रव्यं वा निबन्धो राजव्यवस्थापितं तरिकग्राह्यादिपणादिकं यत्पितामहेनार्जितं तत्र पितुः पुत्रस्य चोभयोः सदृशं साम्यं स्यान्न पितुरिच्छयैव विभाग इत्यर्थः। ननु—

द्रव्ये पितामहोपात्ते स्थावरे जङ्गमे तथा।
सममंशं समाख्यातं पितुः पुत्रस्य चैव हि ॥

इति बृहस्पतिवचनात्सम एवांशः पूर्वोक्तनारदवचनविरोधात्। बृहस्पतिवचने त्वंशभागित्वं तुल्यमित्येवार्थः, न त्वंशस्य तुल्यत्वमपि। एवकारः सदृशमित्यत्रान्वेति। चकारात्प्रपितामहोपार्जिते प्रपौत्रस्यापि स्वं भवतीति समुच्चिनोति ॥ १२१ ॥

(मिता०) अधुना विभक्ते पितर्यविद्यमानभ्रातृके वा पौत्रस्य पैतामहे द्रव्ये विभागो नास्ति। (२)अध्रियमाणे पितरि 'पितृतो भागकल्पना' इत्युक्तत्वात्। भवतु वा स्वार्जितवत्पितुरिच्छयैवेत्याशङ्कित आह—

भूरिति। भूः शालिक्षेत्रादिका। निबन्ध एकस्य प(३)र्णभरकस्येयन्ति पर्णानि, तथा एकस्य क्रमुकफलभरस्येयन्ति क्रमुकफलानीत्याद्युक्तलक्षणः। द्रव्यं सुवर्णरजतादि यत्पितामहेन प्रतिग्रहविजयादिना लब्धं तत्र पितुः पुत्रस्य च (४)स्वाम्यं लोकप्रसिद्धमिति कृत्वा विभागोऽस्ति। हि यस्मात्तत्सदृशं समानं तस्मान्न पितुरिच्छयैव विभागो नापि पितुर्भागद्वयम्। अतश्च पितृतो भागकल्पनेत्येतत्स्वाम्येऽपि वाचनिकम्। 'विभागं चेत्पिता कुर्यात्' इत्येतत्स्वार्जितविषयम्। तथा—'द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता' इत्येतदपि स्वार्जितविषयम्। 'जीवतोरस्वतन्त्रः स्याज्जरयापि समन्वितः' इत्येतदपि पारतन्त्र्यं मातापित्रर्जितद्रव्यविषयम्। तथा—

(१) पुत्रस्य चैव हि—इति मु. पु. पाठः।
(२) ध्रियमाणे तु पितरि ग.।
(३) भारकस्य ख.। (४) स्वाम्यमर्थसिद्धमिति।

'अनीशास्ते हि जीवतोः' इत्येतदपि । तथा सरजस्कायां मातरि सस्पृहे च पितरि विभागमनिच्छत्यपि पुत्रेच्छया पैतामहद्रव्यविभागो भवति । तथाऽविभक्तेन पित्रा पैतामहे द्रव्ये दीयमाने विक्रीयमाणे वा पौत्रस्य निषेधेऽप्यधिकारः । पित्रर्जिते न तु निषेधाधिकारः, तत्परतन्त्रत्वात् । अनुमतिस्तु कर्तव्या । तथा हि-पैतृके पैतामहे च स्वाम्यं यद्यपि जन्मनैव, तथापि पैतृके पितृपरतन्त्रत्वात् पि(१)तुश्चार्जकत्वेन प्राधान्यात् पित्रा विनियुज्यमाने स्वार्जिते द्रव्ये पुत्रेणाऽनुमतिः कर्तव्या । पैतामहे तु द्वयोः स्वाम्यमविशिष्टमिति निषेधाधि(२)कारोऽस्तीति विशेषः । मनुरपि (९।२०९)-'पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात् । न तत्पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितम्' ॥ इति । यत्पितामहार्जितं केनाप्यपहृतं पितामहेनानुद्धृतं यदि पितोद्धरति तत्स्वार्जितमिव पुत्रैः सार्धमकामः स्वयं न विभजेदिति वदन् पितामहार्जितमकामोऽपि पुत्रेच्छया पुत्रैः सह विभजेदिति दर्शयति ॥ १२१ ॥

(वी० मि०) अथ विभागानन्तरं जातस्य पुत्रस्य विभागमाह—

विभक्तेषु सुतो जातः सवर्णायां विभागभाक् ॥
दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितात् ॥ १२२ ॥

विभक्तेषु पुत्रेषु पश्चात्सवर्णायां पत्न्यां जातः सुतो विभागभाक् सकलभ्रातृविभक्तद्रव्याणां वृद्धिभागं व्ययितस्य च विहायाऽवशिष्टानां यथोचितभागभाग् भवति । यदि तु निर्गुणो विभक्तजस्तदा दृश्यमात्राद्गोमहिष्यादेरायव्ययविशोधितात्तस्य विभक्तजस्य विभागः स्यात् । अथ—

मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च ।

इति नारदेन भ्रातृसम्भावनायां विभागस्यार्थतः प्रतिषेधात्कथं विभक्तजस्य सम्भव इति चेत् उच्यते । पितुरिच्छया बलवत्या नारदवचनमपोह्यते । अन्यथा प्रकृतवचनस्य निर्विषयत्वापत्तेः । इदं प्रकृतवचनं विभागकाले गर्भस्थमधिकृत्य । विभागानन्तराहितगर्भोत्पन्ने मनुः—

ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव धनं हरेत् ।
संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह ॥

---

(१) पितुः स्वार्जकत्वेन ख. । (२) करोप्यस्तीति ख. ।

पितृमरणे पित्र्यमंशं पितृसंसृष्टाद् गृह्णीयादिति(१)(वाशब्दार्थः)।
बृहस्पतिः—

पित्रा सह विभक्ता ये सम्पन्ना वा सहोदराः।
जघन्यजाश्च ये तेषां पितृभागहरास्तु ते ॥

तथा—

पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितम्।
विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः ॥
यथा धने तथर्णेऽपि दानाधानक्रियेषु च।
परस्परमनीशास्ते मुक्त्वाऽसौ चोदकक्रियाः ॥-॥ १२२ ॥

(मिता०) विभागोत्तरकालमुत्पन्नस्य पुत्रस्य कथं विभागकल्पनेत्यत आह—

विभक्तेष्विति । विभक्तेषु पुत्रेषु पश्चात्सवर्णायां भार्यायामुत्पन्नो विभागभाक्। विभज्यत इति विभागः। पित्रोर्विभागस्तं भजतीति विभागभाक्। पित्रोरूर्ध्वं तयोरंशं लभते इत्यर्थः। मातृभागं चासत्यां दुहितरि। 'मातुर्दुहितरः शेषम्' इत्युक्तत्वात्। असवर्णायामुत्पन्नस्तु स्वांशमेव पित्र्याल्लभते। मा(२)तृकं तु सर्वमेव। एतदेव मनुनोक्तम् (९।२१६)—'ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्' इति। पित्रोरिदं पित्र्यमिति व्याख्येयम्। 'अनीशः पूर्वजः पित्रोर्भ्रातुर्भागे विभक्तजः' इति स्मरणात्। विभक्तयोर्मातापित्रोर्विभागे विभागात्पूर्वमुत्पन्नो न स्वामी विभक्तजश्च भ्रातुर्भागे न स्वामीत्यर्थः। तथा विभागोत्तरकालं पित्रा यत्किंचिदर्जितं तत्सर्वं विभक्तजस्यैव। 'पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितम्। विभक्तजस्य तत्सर्वमनीशाः पूर्वजाः स्मृताः' ॥ इति स्मरणात्। ये च विभक्ताः पित्रा सह संसृष्टाः तैः सार्धं पितुरूर्ध्वं विभक्तजो विभजेत्। यथाह मनुः (९.२१६)—'संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सह' इति ॥

(मिता०) पितुरूर्ध्वं पुत्रेषु विभक्तेषु पश्चादुत्पन्नस्य कथं विभागकल्पनेत्यत आह—

दृश्याद्वेति। तस्य पितरि प्रेते भ्रातृविभागसमयेऽस्पष्टगर्भायां मातरि भ्रातृविभागोत्तरकालमुत्पन्नस्यापि विभागः। तद्विभागः कुत इत्यत आह। दृश्याद्भ्रातृभिर्गृहीताद्धनात्। कीदृशात् आयव्ययविशो-

(१) द्वितीयाद्यार्थः—इति क.ख. पुस्तकयोः पाठः। (२) मातुर्भागं तु सर्वमेव ग–घ.।

धितात् आयः प्रतिदिवसं प्रतिमासं प्रत्यब्दं वा यदुत्पद्यते, व्ययः पितृकृतर्णापाकरणं, ताभ्यामायव्ययाभ्यां यच्छोधितं तत्तस्मादुद्धृत्य तद्भागो दातव्यः स्यात्। एतदुक्तं भवति–प्रातिस्विकेषु भागेषु तदुत्थमायं प्रवेश्य पि(१)तृकृतं चर्णमपनीयाऽवशिष्टेभ्यः स्वेभ्यः स्वेभ्यो भागे(२)भ्यः किंचित्किंचिदुद्धृत्य विभक्तजस्यं भागः स्वभागसमः कर्तव्य इति। एतच्च विभा(३)गसमयेऽप्रजस्य, भ्रातुर्भार्यायामस्पष्टगर्भायां विभगादूर्ध्वमुत्पन्नस्यापि वेदितव्यम्।स्पष्टगर्भायां तु प्रवसं प्रतीक्ष्य विभागः कर्तव्यः। यथाह वसिष्ठः—'अथ भ्रातृणां दायविभागो याश्चाऽनपत्याः स्त्रियस्तासामापुत्रलाभात्' इति। गृहीतगर्भाणामाप्रसवात्प्रतीक्षणमिति योजनीयम् ॥ १२२ ॥

(वी० मि०) 'विद्यया लब्धमेव चे'ति प्रागुक्तचकारसमुच्चयं दर्शयन्नेव विभक्तस्य सौदायिकभ्रातृधनाप्राप्तिमाह—

पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत् ॥
पितुरूर्ध्वं विभजतां माताऽप्यंशं समं हरेत् ॥ १२३ ॥

पितृभ्यामिति पितामहादेरप्युपलक्षणम्। मृतपितृकविभागे न केवलभ्रातरो भागिनः किन्तु तेषां जनन्यः सपत्नीमातरश्चेत्याह पितुरिति। ऊर्ध्वं मरणानन्तरम्। अपिशब्देन सपत्नीमातृसमुच्चयः ॥ १२३ ॥

(मिता०) विभक्तजः पित्र्यं मातृकं च सर्वं धनं गृह्णातीत्युक्तं तत्र यदि विभक्तः पिता माता वा विभक्ताय पुत्राय स्नेहवशादाभरणादिकं प्रयच्छति तदा विभक्तजेन दानप्रतिषेधो न कर्तव्यो नापि दत्तं प्रत्याहर्तव्यमित्याह—

पितृभ्यामिति। मातापितृभ्यां विभक्ताभ्यां पूर्वं विभक्तस्य पुत्रस्य यद्दत्तमलङ्कारादि तत्तस्यै(४)व न विभक्तजस्य स्वं भवति। न्यायसाम्याद्विभागात्प्रागपि यस्य यद्दत्तं तत्तस्यैव। तथा असति विभक्तजे विभक्तयोः पित्रोरंशं तदूर्ध्वं विभजतां यस्य यद्दत्तं तत्तस्यैव नान्यस्येति वेदितव्यम् ॥

(१) कृतमृणं घ.। (२) भागिभ्यो यत्किंचिदुद्धृत्य घ.।
(३) समये भ्रातुर्भार्यायामप्रजायामस्पष्टगर्भायां स्वभागा ग, समये भ्रातृभार्यायामप्रजस्य स्पष्टगर्भायां विभागादूर्ध्वं घ.। (४) तस्यैव पुत्रस्य ख.।

(मिता०) जीवद्विभागे स्वपुत्रसमांशित्वं पत्नीनामुक्तं 'यदि कुर्यात्समानंशान्' इत्यादिना। पितुरूर्ध्वं विभागेऽपि प(१)त्नीनां स्वपुत्रसमांशित्वं दर्शयितुमाह—

पितुरिति। पितुरूर्ध्वं पितुः प्र(२)यणादूर्ध्वं विभजतां मातापि स्वपुत्रांशसममंशं हरेत्। यदि स्त्रीधनं न दत्तम्। दत्ते त्वर्धांशहारिणीति व(३)क्ष्यते ॥ १२३ ॥

(वी० मि०) मृतपितृकविभागे विशेषान्तरमाह—

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ॥
भगिन्यश्च निजादंशाद्दत्वांऽशं तु तुरीयकम् ॥ १२४ ॥

उपनयनविवाहाद्यसंस्कृता भ्रातरः पूर्वसंस्कृतैर्भ्रातृभिः समुदायद्रव्यात् संस्कार्याः। भगिन्यश्च कुमार्यः निजात् सुवर्णानुसारिणः पुत्रांशात्तुरीयकमंशं दत्वा संस्कार्याः। आद्येन तुशब्देन (४)संस्कारे द्रव्यसंख्यानियमस्य, द्वितीयेन तदभावस्य व्यवच्छेदः। तुरीयांशस्य भगिनीविवाहानिर्वाहकत्वे यावता विवाहो निर्वहति तावद्धनं वित्तानुरूपेण सर्वैर्देयम्। 'अनूढानां कन्यानां वित्तानुरूपेण संस्कारं कुर्यु'रिति विष्णुवचनात्। तदिदं ग्रन्थकृता समुच्चितम् ॥ १२४ ॥

(मिता०) पितरि प्रेते यद्यसंस्कृता भ्रातरः सन्ति, तदा तत्संस्कारे कोऽधिक्रियत इत्यत आह—

असंस्कृता इति। पितुरूर्ध्वं विभजद्भिर्भ्रातृभिरसंस्कृता भ्रातरः समुदायद्रव्येण संस्कर्तव्याः। असंस्कृतासु भगिनीषु विशेषमाह—

भगिन्य इति। अस्यार्थः—भगिन्यश्चाऽसंस्कृताः सं(५)स्कर्तव्या भ्रातृभिः। किं कृत्वा निजादंशाच्चतुर्थमंशं दत्वा। अनेन दुहितरोऽपि पितुरूर्ध्वमंशभागिन्य इति गम्यते। तत्र निजादंशादिति प्रत्येकं परिकल्पितादंशादुद्धृत्य चतुर्थांशो दातव्य इत्य(६)यमर्थो न भवति, किंतु यज्जातीया कन्या तज्जातीयपुत्रभागाच्चतुर्थांशभागिनी सा कर्तव्या। एतदुक्तं भवति–यदि ब्राह्मणी सा कन्या तदा ब्रा-

(१) मातुः स्वपुत्र ख.। (२) प्रयाणात् ख. घ.। (३) वक्ष्यति ग.।
(४) संस्कारे–इति नास्ति ख० पुस्तके। (५) संस्कार्याः ग.।
(६) इत्येवमर्थो ख. इत्यर्थो ग.।

ह्मणीपुत्रस्य यावानंशो भवति तस्य चतुर्थांशस्तस्या भवति । तद्यथा यदि कस्यचिद्ब्रा(१)ह्मणस्यैका पुत्री पुत्रश्चैकः कन्या चैका तत्र पित्र्यं सर्वमेव द्रव्यं त्रिधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तुरीयमंशं कन्यायै दत्त्वा शेषं पुत्रो गृह्णीयात् । (२)यदा तु द्वौ पुत्रौ एका च कन्या तदा पितृधनं सर्वं त्रिधा विभज्य एकं भागं चतुर्धा विभज्य तुरीयमंशं कन्यायै दत्त्वा शेषं द्वौ पुत्रौ विभज्य गृह्णीतः । अथ त्वेकः पुत्रो द्वे कन्ये तदा पित्र्यं धनं त्रिधा विभज्य एकं भागं चतुर्धा विभज्य तत्र द्वौ भागौ द्वाभ्यां कन्याभ्यां दत्त्वावशिष्टं सर्वं पुत्रो (३)गृह्णातीत्येवं समानजातीयेषु समविषमेषु भ्रातृषु भगिनीषु च योजनीयम् । यदा तु ब्राह्मणीपुत्र एकः क्षत्रियाकन्या चैका तत्र पि(४)तृधनं सप्तधा विभज्य क्षत्रियापुत्रभागांस्त्रींश्चतुर्धा विभज्य तुरीयांशं क्षत्रियाकन्यायै दत्त्वा शेषं ब्राह्मणीपुत्रो (५)गृह्णाति । यत्र तु द्वौ ब्राह्मणीपुत्रौ क्षत्रियाकन्या चैका तत्र पित्र्यं धनमेकादशधा विभज्य तेषु त्रीनंशान् क्षत्रियापुत्रभागांश्चतुर्धा विभज्य चतुर्थमंशं क्षत्रियाकन्यायै दत्त्वा शेषं सर्वं ब्राह्मणीपुत्रौ विभज्य (६)गृह्णीतः । एवं जातिवैषम्ये भ्रातॄणां भागिनीनां च संख्यायाः साम्ये वैषम्ये च सर्वत्रोहनीयम् । (७)न च 'निजादंशाद्दत्त्वांशं तु तुरीयकं'मिति तुरीयांशाविवक्षया संस्कारमात्रोपयोगि द्रव्यं दत्त्वेति व्याख्यानं युक्तं, मनुवचनविरोधात् । (९ । ११८) 'स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक् । स्वात्स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सवः ॥ इति । अस्यार्थः । ब्राह्मणादयो भ्रातरो ब्राह्मणीप्रभृतिभ्यो भगिनीभ्यः स्वेभ्यः स्वजातिविहितेभ्योंऽशेभ्यः 'चतुरोंऽशान्हरेद्विप्र' इत्यादिवक्ष्यमाणेभ्यः स्वात्स्वादंशादात्मीयादात्मीयाद्भागाच्चतुर्थं चतुर्थं भागं दद्युः । न चात्रात्मीयभागादुद्धृत्य चतुर्थांशो देय इत्युच्यते, किंतु स्वजातिविहितादेकस्मादेकस्मादंशात्पृथक्पृथगेकस्याप्येकस्यै कन्यायै चतुर्थांऽशो देय इति जातिवैषम्ये संख्यावैषम्ये च विभागक्लृप्तिरुक्तैव । 'पतिताः स्युरदित्सव' इत्यकरणे प्रत्यवायश्रवणादवश्यं दातव्यता प्रती-

---

(१) कस्यचिद् ब्राह्मण्येवैका ख. । (२) अथ तु ग. घ. ।
(३) गृह्णीयात् एवं ग. । (४) पित्र्यं धनं घ. । (५) गृह्णीयात् ग. ।
(६) गृह्णीयाताम् ग. । (७) नच दत्त्वांशं तु ग. घ. ।

यते। अत्रापि चतुर्थभागवचनमविवक्षितं संस्कारमा(१)त्रोपयोगि द्रव्यदानमेव विवक्षितमिति चेन्न। स्मृतिद्वयेऽपि चतुर्थांशदानावि-वक्षायां प्रमाणाभावाददाने प्रत्यवायश्रवणाच्चेति। यदपि कैश्चिदुच्य-ते। अंशदानविवक्षायां बहुभ्रातृकायाः (२)बहुधनत्वं बहुभगिनीकस्य च निर्धनता प्राप्नोतीति तदुक्तरीत्या परिहृतमेव। न ह्यत्राऽऽत्मीयाद्भा गादुद्धृत्य चतुर्थांशस्य दानमुच्यते येन तथा स्यात्। अतोऽस्म-त्सहायमेधातिथिप्रभृतीनां व्याख्यानमेव (३)चतुरस्रं न भारुचेः। तस्मात्पितुरूर्ध्वं कन्याप्यंशभागिनी पूर्वं चेद्यत्किंचित्पिता ददाति तदेव लभते विशेषवचनाभावादिति सर्वमनवद्यम्॥ १२४॥

(वी० मि०) अथ भिन्नजातीयानां भ्रातॄणां विभागमाह—

चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः॥
क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः॥१२५॥

[ब्राह्म(४)णस्य ब्राह्मण्यादिचतसृषु भार्यासु जाताश्चत्वारः पुत्रा यथाक्रमं चतुस्त्रिद्व्येकभागभाजो भवन्ति]। क्षत्रियस्य क्षत्रियादिति-सृषु भार्यासु जातास्त्रयः पुत्रा यथाक्रमं त्रिद्व्येकभागभाजो भव-न्ति। वैश्यस्य वैश्याशूद्रयोर्जातास्तु पुत्रा यथाक्रमं द्व्येकभागभाजो भवन्तीत्यर्थः। इदं तु प्रतिग्रहलब्धभूव्यतिरिक्तविषयम्।

न प्रतिग्रहभूर्देया क्षत्रियस्य सुताय वै।
यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेत्॥

इति स्मरणात्। शूद्रापुत्रस्य यदेकांशभागित्वमभिहितं तज्जी-वता पित्रा तस्मै प्रीत्या किञ्चिद्धृतादानपक्षे। अन्यथा तु—

ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्।
यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत्॥

इति वचनानां सभागित्वमिति मन्तव्यम्॥ १२५॥

(मिता०) एवं 'विभागं चेत्पिता कुर्या'दित्यादिना प्रबन्धेन समानजातीयानां भ्रातॄणां परस्परं पित्रा सह विभागक्लृप्तिरुक्ता।

---

(१) संस्कारोपयोगि ख.। (२) बहुधनकत्वं घ.। (३) वरिष्ठं न भारुचेः ग.।

(४)[ ] एतदन्तर्गतो ग्रन्थः पूर्वापरानुसन्धानेन प्रवेशितः क.ख.पुस्तकयोर्नास्ति। कीदृगाकारः कियानंशोऽत्र भ्रष्ट इति तु न शक्यते वोढुम्. स.।

अधुना भिन्नजातीयानां विभागमाह—

चतुरिति । 'तिस्रो वर्णानुपूर्व्येण' इति ब्राह्मणस्य चतस्रः क्षत्रियस्य तिस्रो वैश्यस्य द्वे शूद्रस्यैकेति भार्या दर्शिताः । तत्र ब्राह्मणात्मजा ब्राह्मणोत्पन्ना वर्णशः वर्णशब्देन ब्राह्मणादि(१)वर्णाः स्त्रिय उच्यन्ते । 'संख्यैकवचनाच्च वीप्सायाम्' इत्यधिकरणकारकादेकवचनाद्वीप्सायां शस् । अतश्च वर्णे वर्णे ब्राह्मणो(२)त्पन्नाः यथाक्रमं चतुस्त्रिद्व्येकभागाः स्युर्भवेयुः । एतदुक्तं भवति-ब्राह्मणेन ब्राह्मण्यामुत्पन्ना एकैकशश्चतुरश्चतुरो भागांल्लभन्ते । तेनैव क्षत्रियायामुत्पन्नः प्रत्येकं त्रींस्त्रीन् वैश्यायां द्वौ द्वौ शूद्रायामेकमेकमिति । क्षत्रजाः क्षत्रियेणोत्पन्नाः वर्णशः इत्यनुवर्तते यथाक्रमं त्रिद्व्येकभागाः । क्षत्रियेण क्षत्रियायामुत्पन्नाः प्रत्येकं त्रींस्त्रीन्, वैश्यायां द्वौ द्वौ, शूद्रायामेकमेकम् । विड्जाः वैश्येनोत्पन्नाः प्रत्येकं द्वौ द्वौ भागौ लभन्ते । शूद्रायामेकमेकम् । शूद्रस्यैकैव भार्येति भिन्नजातीयपुत्राभावात्तत्पुत्राणां पूर्वोक्त एव विभागः। यद्यपि चतुस्त्रिद्व्येकभागा इत्यविशेषेणोक्तं तथापि प्रतिग्रहप्राप्तभूव्यतिरिक्तविषयमिदं द्रष्टव्यम् । यतः स्मरन्ति-'न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै । यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेत्' ॥ इति । प्रतिग्रहणात्क्रयादिना लब्धा भूः क्षत्रियादिसुतानामपि भवत्येव । शूद्रापुत्रस्य विशेषप्रतिषेधाच्च । 'शूद्र्यां द्विजातिभिर्जातो न भूमेर्भागमर्हति' इति । यदि क्रयादिप्राप्ता भूः क्षत्रियादिसुतानां न भवेत्तदा शूद्रापुत्रस्य विशेषप्रतिषेधो नोपपद्यते । यत्पुनः (मनुः ९ । १५५)–'ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक् । यदेवास्य पिता दद्यात्तदेवास्य धनं भवेत्' ॥ इति, तदपि जीवता पित्रा यदि शूद्रापुत्राय किमपि (३)प्रदत्तं स्यात्तद्विषयम् । यदा तु प्रसाददानं नास्ति तदैकांशभागित्यविरुद्धम् ॥१२५ ॥

(वी०मि०) एवं तत्र तत्र विभागे जातेऽपि साधारणद्रव्यस्यैकतरेणापहृतस्य तदीयस्वत्वमसाधारणं न जातं तस्य विभागाभावादिति पुनस्तद्द्रव्यविभागः कार्य इत्याह—

अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते ॥
तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः ॥ १२६ ॥

---

(१) वर्णास्त्रिय उच्यन्ते ग. घ. । (२) त्पन्ना एकैकशश्चतुस्त्रि ग. । (३) प्रत्तं ग. ।

समैः पूर्वजातविभागसदृशैः । शेषं स्पष्टम् ॥ १२६ ॥

(मिता०) अथ सर्वविभागशेषं किंचिदुच्यते—

अन्योन्येति । परस्परापहृतं समुदायद्रव्यं विभागकाले (१)चाज्ञातं विभक्ते पितृधने यद् दृश्यते तत्समैरंशैर्विभजेरन्नित्येवं स्थितिः शास्त्रमर्यादा । अत्र समैरंशैरिति वदतोद्धारविभागो निषिद्धः । विभजेरन्निति वदता येन दृश्यते तेनैव न ग्राह्यमिति दर्शितम् । एवं च वचनस्यार्थवत्त्वान्न समुदायद्रव्यापहारे दोषाभावपरत्वम् । ननु मनुना ज्येष्ठस्यैव समुदायद्रव्यापहारे दोषो दर्शितो न कनीयसाम् । (मनुः ९।२१३) 'यो(२) ज्येष्ठो विनिकुर्वीत लोभाद् भ्रातॄन् यवीयसः । सोऽज्येष्ठः स्यादभागश्च नियन्तव्यश्च राजभिः' ॥ इति वचनात् । नैतत् । यतः संभावितस्वातंत्र्यस्य पितृस्थानीयस्य ज्येष्ठस्यापि दोषं वदता ज्येष्ठपरतन्त्राणां कनीयसां पुत्रस्थानीयानां दण्डापूपिकनीत्या सुतरां दोषो दर्शित एव । तथा चाविशेषेणैव दोषः श्रूयते । गौतमः— 'यो वै भागिनं भागान्नुदते चयते चैनं स यदि वैनं चयतेऽथ पुत्रमथ पौत्रं चयत' इति । यो भागिनं भागार्हं भागान्नुदते भागादपाकरोति भागं तस्मै न प्रयच्छति स भागान्नुन्न एनं चोत्ता(३)रं चयते नाशयति दोषिणं करोति । यदि तं न नाशयति तदा तस्य पुत्रं पौत्रं वा नाशयतीति ज्येष्ठविशेषमन्तरेणैव साधारणद्रव्यापहारिणो दोषः श्रु(४)तः । अथ साधारणं द्रव्यमात्मनोऽपि स्वं भवतीति स्वबुद्ध्या गृह्यमाणं न दोषमावहतीति मतम् । तदसत् । स्वबुद्ध्या गृहीतेऽप्यवर्जनीयतया परस्वमपि गृहीतमेवेति निषेधानुप्रवेशाद्दोषमावहत्येव । यथा मौद्गे चरौ विपन्ने सदृशतया माषेषु गृह्यमाणेषु 'अयज्ञिया वै माषाः' इति निषेधो न प्रविशति मुद्गावयवबुद्ध्या गृह्यमाणत्वादिति पूर्वपक्षिणोक्ते मुद्गावयवेषु गृह्यमाणेष्ववर्जनीयतया माषावयवा अपि गृह्यन्त एवेति निषेधः प्रविशत्येवेति राद्धान्तिनोक्तम् । तस्माद्वचनतो न्यायतश्च साधारणद्रव्यापहारे दोषोऽस्त्येवेति सिद्धम् ॥ १२६ ॥

---

(१) वा ज्ञातं ख. च ज्ञातं ग. । (२) यो लोभाद्विनिकुर्वीतेति पाठः । (३) नोत्तारं ख. । (४) श्रूयते घ ।

(वी० मि०) समानवर्णानामौरसादीनां द्वादशविधानां पुत्राणां परस्परविभागं क्वचिदविभागं च रक्षणपूर्वकमाह—

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ॥
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥ १२७ ॥

परक्षेत्रे अपुत्रेण देवरादिना विगोत्रेण वा गुरुनियोगेनोत्पादितः पुत्रो बीजिक्षेत्रिणोरुभयोरपि सम्पूर्णरिक्थग्राही पिण्डदाता धर्मतो धर्मानुसारेण भवति । यदि बीजिनः क्षेत्रिणो वा पश्चादौरसोऽपि यद्यन्यर्जः ।

त्रिभागं क्षेत्रजो भुङ्क्ते चतुर्थं पुत्रिकासुतः ।

इति ब्रह्मपुराणादिति चकारार्थः । अपिशब्देन बीजिक्षेत्रिणोः पितुः समुच्चयः ॥ १२७ ॥

(मिता०) द्व्यामुष्यायणस्य भागविशेषं दर्शयंस्तस्य स्वरूपमाह—

अपुत्रेणेति । अपुत्रां गुर्वनुज्ञात इत्याद्युक्तविधिना अपुत्रेण देवरादिना परक्षेत्रे परभार्यायां गुरुनियोगेनोत्पादितः पुत्र उभयोर्बीजिक्षेत्रिणोरसौ रिक्थी रिक्थहारी पिण्डदाता च धर्मत इति । अस्यार्थः । यदासौ नियुक्तो देवरादिः स्वयमप्यपुत्रोऽपु(१)त्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवृत्तो यं जनयति स द्विपितृको द्व्यामुष्यायणो द्वयोरपि रिक्थहारी पिण्डदाता च । यदा तु नियुक्तः पुत्रवान् केवलं क्षेत्रिणः पुत्रार्थं प्र(२)यतते तदा तदुत्पन्नः क्षेत्रिण एव पुत्रो भवति न बीजिनः । स च न नियमेन बीजिनो रिक्थहारी पि(३)ण्डदो वेति । यथोक्तं मनुना (९।५३)—'क्रियाभ्युपगमात्क्षेत्रं बीजार्थं यत्प्रदीयते । तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च' ॥ इति । क्रियाभ्युपगमादिति, अत्रोत्पन्नमपत्यमावयोरुभयोरपि भवत्विति संविदङ्गीक(४)रणाद्यत्क्षेत्रं क्षेत्रस्वामिना बी(५)जावपनार्थं बीजिने दीयते तत्र तस्मिन्क्षेत्रे उत्पन्नस्यापत्यस्य बीजिक्षेत्रिणौ भागिनौ स्वामिनौ दृष्टौ महर्षिभिः । तथा (मनुः ९।५२)—'फलं त्वनभिसन्धाय क्षेत्रिणा बीजिना तथा । प्रत्यक्षं क्षेत्रिणामर्थो बीजाद्योनिर्बलीयसी' ॥ इति । फलं त्वनभिसन्धायेति । अत्रोत्पन्नमपत्यमावयोरुभयोरस्त्वि-

(१) अपरस्य घ । (२) प्रवर्तते घ । (३) पिण्डदाता चेति ग ।
(४) करणेन यत्क्षेत्रं । (५) बीजवापनार्थं ग ।

त्येवमनभिसन्धाय परक्षेत्रे यदपत्यमुत्पाद्यते तदपत्यं क्षेत्रिण एव । यतो बीजाद्योनिर्बलीयसी गवाश्वादिषु तथा दर्शनात् । अत्रापि नि(१)योगो वाग्दत्ताविषय एव । इतरस्य नियोगस्य मनुना निषिद्धत्वात् (९।५९।६०)—'देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ् नियुक्तया । प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ॥ विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि । एकमुत्पादयेत्पुत्रं न द्वितीयं कथञ्चन' ॥ इत्येवं नियोगमुपन्यस्य मनुः स्वयमेव निषेधति (९।६४।६८)· 'नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः । अन्यस्मिन्हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥ नोद्वाहिकेषु मंत्रेषु नियोगः कीर्त्यते क्वचित् । न विवाहविधावुक्तं विधवावेदनं पुनः ॥ अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः । मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति ॥ स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा । वर्णानां सङ्करं चक्रे कामोपहतचेतनः ॥ ततः प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियम् । नियोजयत्यपत्यार्थे गर्हन्ते तं हि साधवः' ॥ इति ॥ न च विहितप्रतिषिद्धत्वाद्विकल्प इति मन्तव्यम् । नियोक्तॄणां निन्दाश्रवणात् । स्त्रीधर्मेषु व्यभिचारस्य बहुदोषश्रवणात्, संयमस्य प्रशस्तत्वाच्च । यथाह मनुरेव (५।१५७)—'कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः । न तु नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु' ॥ इति जीवनार्थं पुरुषान्तराश्रयणं प्रतिषिध्य (मनुः ५।१५८।१६१)—'आसीताऽऽमरणात्क्षान्ता नियता ब्रह्मचारिणी । यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥ अनेकानि सहस्राणि कौमारब्रह्मचारिणाम् । दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम् ॥ मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता । स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥ अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते । सेह निन्दामवाप्नोति परलोकाच्च हीयते' ॥ इति पुत्रार्थमपि पुरुषान्तराश्रयणं निषेधति । तस्माद्विहितप्रतिषिद्धत्वाद्विकल्प इति न युक्तम् । एवं विवाहसंस्कृतानियोगे प्रतिषिद्धे कस्तर्हि धर्म्यो नियोग इत्यत आह (मनुः ९।६९ ७०) 'यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः । तामनेन विधानेन निजो विन्देत देवरः ॥ यथाविध्य(२)धिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् । मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ' ॥ इति । यस्मै

(१) तथानियोगो घ । (२) विध्यभिगम्यैनां ख ।

वाग्दत्ता कन्या स प्रतिग्रहमन्तरेणैव तस्याः पतिरित्यमादेव वच-नादवगम्यते । तस्मिन्प्रेते देवरस्तस्य ज्येष्ठः कनिष्ठो वा निजः सो-दरो विन्देत परिणयेत् । यथाविधि यथाशास्त्रमधिगम्य परिणीय अनेन विधानेन घृताभ्यङ्गवाङ्नियमादिना शुक्लवस्त्रां शुचिव्रतां मनो-वाक्कायसंयतां मिथो रहस्यागर्भग्रहणात्प्रत्यृत्वेकवारं गच्छेत् । अयं च विवाहो वाचनिको घृताभ्यङ्गादिनियमवन्नियुक्ताभिगमनाङ्गमि-ति न देवरस्य भार्यात्वमापादयति । अतस्तदुत्पन्नमपत्यं क्षेत्रस्वामि-न एव भवति न देवरस्य । संविदा तूभयोरपि ॥ १२७ ॥

(वी०मि०) द्वादशानां पुत्राणां लक्षणान्याह औरस इत्यादिना—

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ॥
क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥ १२८ ॥
गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतो मतः ॥
कानीनः कन्यकाजातो मातामहसुतो मतः ॥ १२९ ॥
अक्षतायां क्षतायां वा जातः पौनर्भवः (१)स्मृतः ॥
दद्यान्माता पिता यं वा स पुत्रो दत्तको भवेत् ॥ १३० ॥
क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात् स्वयं कृतः ॥
दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः ॥ १३१ ॥
उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः ॥
पिण्डदोंऽशहरश्चै(२)षां पूर्वाभावे परः परः ॥ १३२ ॥
सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः ॥
जातोऽपि दास्यां शूद्रेण कामतोंऽशहरो भवेत् ॥ १३३ ॥
मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिनम् ॥
अभ्रातृको हरेत्सर्वं दुहितॄणां सुतादृते ॥ १३४ ॥

धर्मपत्नी धर्मेण परिणीता सवर्णा तस्यां जातः परिणेतृस-काशादौरसः पुत्रः । अत्र सावर्ण्यं द्विजातित्वेन ब्राह्मण्यादित्रयस्य

(१) पौनर्भवः सुतः—इति मुद्रितपुस्तके पाठः ।
(२) पिण्डदोंऽशहरस्तेषां—इति क. पुस्तके पाठः ।

विवक्षितम्। अन्यथा ब्राह्मणविवाहितयोः क्षत्रियावैश्ययोस्तेनोत्पन्नः पुत्रो न द्वादशविधपुत्रान्तर्भूतः स्यादिति पारिजातः। परिणेतुरुरसा जनितत्वादौरसः।

अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति।

इति वसिष्ठोक्तव्यवस्थया परिणीता कन्या पुत्रिका तस्यां जातः सुतः पुत्रिकासुत इति समाख्याबललभ्यं लक्षणं, स चौरससमः मातामहस्य रिक्थग्राही पिण्डदश्च। अत्र विशेषमाह मनुः—

मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः।
द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुः॥

परक्षेत्रनियुक्तेन सगोत्रेणाऽसगोत्रेण वा जातः क्षेत्रजः क्षेत्रिणः पुत्रः। यत्र तु यदपत्यमत्रोत्पत्स्यते तदावयोः समानं भविष्यतीति व्यवस्था कृता तत्र बीजिक्षेत्रिणोरुभयोरपि पुत्र इति पूर्वश्लोकार्थः। तदाह मनुः—

क्रियाभ्युपगमार्थेन बीजार्थं यत्प्रदीयते।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च॥

इति। गृहे पत्न्यामन्येन प्रच्छन्नः अनियोगेऽपि चौर्यरताऽऽहितगर्भमूलक उत्पन्नो यः स तु गूढजः स्मृतः। अत्र मनुः—

उत्पद्यते गृहे यस्य न च ज्ञायेत कस्यचित्।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः॥

इति। तल्पं पत्नी। कन्यकायां कुमार्यां जातः पुत्रः कानीनः। स च मातामहसुतः। विष्णुः—

पुत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्।
परिणेतुर्निरपत्यत्वे तु तस्यापि स पुत्रः।

आद(१)तायां तु यो जातः सवर्णेन पितुर्गृहे।
स कानीनः सुतस्तस्य यस्मै सा दीयते पुनः॥

इति ब्रह्मपुराणात्। पुनर्विवाहिता पुनर्भूस्तस्यां क्षतायां पूर्वपत्युपभुक्तयामक्षतायामतादृश्यां वा जातः सुतः पौनर्भवः। तत्र कात्यायनः—

तस्यां पौनर्भवो जातो व्यक्तमुत्पादकस्य सः।

---

(१) अदत्तायां तु–इति क. पु. पाठः।

पिता (१)तदभावे तदनुज्ञायां वा माता यं पुत्रं प्रीत्याऽद्भि(२)रन्यस्मै दद्यात् स प्रतिग्रहीतुर्दत्तकः पुत्रो भवति । मनुः—

रिक्थ(३)गोत्रे जनयितुर्न हरेद्दत्त्रिमः सुतः ।
रिक्थ(४)गोत्रानुगः पिण्डो व्यपैति ददतः स्वधाम् ॥

स्वधा श्राद्धम् । ताभ्यां मातापितृभ्यां विक्रीतो यः क्रीतः पुत्रः स क्रेतुर्भवति । स्वयं स्वकृतया मम पुत्रो भवेति प्रार्थनया कृतस्तव पुत्रोऽस्मीति स्वीकारितः कृत्रिमः पुत्रः । चकारेण मातापित्रनुमत्येति समुच्चीयते । तत्सद्भावे तत्परतंत्रत्वात् । प्रार्थनं विनैव स्वयं पुत्रत्वेनाऽऽत्मानं मातापित्रभावे परित्यक्तं वा यो ददाति स स्वयं दत्तः प्रतिग्रहीतुः पुत्रः । गर्भे स्थितो मातृविवाहेनैव पित्रोर्विवाहितो वोढुः पुत्रः सहोढजः । तदाह मनुः—

या गर्भिणी संस्क्रियते ज्ञाताऽज्ञाताऽथवा सती ।
वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥

यस्तु मातापितृभ्यामुत्सृष्टो भरणासामर्थ्येन परित्यक्तोऽन्येन पुत्रतया गृह्यते स ग्रहीतुः सुतोऽपविद्धसंज्ञः । एषां द्वादशानां पुत्राणां पूर्वपूर्वाभावे परः परः पुत्रः पिण्डदोंऽशहरश्च भवति । अंशपदं पुत्रिकाक्षेत्रजस्थले समग्रांशपरं, लिखितब्रह्मपुराणवचनाच्च ।

उत्पन्ने त्वौरसे पुत्रे तृतीयांशहराः सुताः ।
सवर्णा, असवर्णास्तु ग्रासाच्छादनभाजनाः ॥

इति कात्यायनवचनाच्च । सवर्णदत्तकृत्रिमगूढोत्पन्नाऽपविद्धपुत्रानुरोधेनापि समग्रांशपरमंशपदम् ।

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः ।
शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम् ॥

इति मनुवचनं त्वौरसस्य सगुणत्वेऽन्येषां निर्गुणत्वे चेत्यवधेयम् । सोऽयं चकारः समुच्चयार्थः । अयं विधिः पूर्वाभावे पर इत्येवंरूपः सजातीयेषु सवर्णेषु त्रैवर्णिकेषु पुत्रेषु मयोक्तः । असवर्णेषु पुत्रिकापुत्रे सत्यपि क्षेत्रजः सवर्णोऽशभागित्यादिव्यवस्था द्रष्टव्या, उक्तकात्यायनवचनस्वरसात् । शूद्रेण तु दास्यामपरिणीतशूद्रायामपि

---

(१) तद्भावे–इति क. ख. पुस्तकयोः । (२) प्रीत्यादिभिः–इति ख. पु. पाठः ।
(३) गोत्ररिक्थे–इति मुद्रितपुस्तके पाठः । (४) गोत्ररिक्थानुगः–इति मु. पु. पाठः ।

जातः कामतः पितुरिच्छया पुत्रान्तरतुल्यांशहरो भवेत् । मृते पितरि भागकरणे परिणीतापुत्रा भ्रातरस्तं दासीपुत्रमर्धभागभाजं कुर्युः । परिणीतापुत्रभ्रातृविहीनस्तु दासपुत्रः पितुर्दुहितॄणां सुताद्दते दौहित्रासत्त्वे कैमुतिकन्यायात् दुहित्रसत्त्वे सर्वं पितृधनं हरेत् ॥ १२८–१३४ ॥

(मिता०) समानासमानजातीयानां पुत्राणां विभागक्लृप्तिरुक्ता । अधुना मुख्यगौणपुत्राणां दायग्रहणव्यवस्थां दर्शयिष्यंस्तेषां स्वरूपं तावदाह—

औरस इति । उरसो जात औरसः पुत्रः स च धर्मपत्नीजः सवर्णा धर्मविवाहोढा धर्मपत्नी तस्यां जातः औरसः पुत्रो मुख्यः । तत्सम औरससमः पुत्रिकायाः सुतः पुत्रिकासुतः अत एवौरससमः । यथाह वसिष्ठः—'अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् । अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति' ॥ इति । अथवा पुत्रिकैव सुतः पुत्रिकासुतः सोऽप्यौरससम एव पित्रवयवानामल्पत्वात् मात्रवयवानां बाहुल्याच्च । यथाह वसिष्ठः—'द्वितीयः पुत्रिकैव' इति । द्वितीयः पुत्रः पुत्रिकैवेत्यर्थः । द्यामुष्यायणस्तु जनकस्यौरसा(१)दपकृष्टोऽन्यक्षेत्रोत्पन्नत्वात् । क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा । इतरेण सपिण्डेन देवरेण वोत्पन्नः पुत्रः क्षेत्रजः ॥ १२८ ॥

(मिता०) गृह इति । गूढजः पुत्रो भर्तृगृहे प्रच्छन्न उत्पन्नो हीनाधिकजातीयपुरुषजत्वपरिहारेण पुरुषविशेषजत्वनिश्चयाभावेऽपि सवर्णजत्वनिश्चये सति बोद्धव्यः । कानीनस्तु कन्यकायामुत्पन्नः पूर्ववत्सवर्णासु मातामहस्य पुत्रः । यद्यनूढा सा भवेत्तथा पितृगृह एव संस्थिता । अथोढा तदा वोढुरेव पुत्रः । यथाह मनुः (९।१७२)— 'पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः(२) । तं कानीनं वदेन्नाम्ना वोढुः(३) कन्यासमुद्भवम्' ॥ इति ॥ १२९ ॥

(मिता०) अक्षतायामिति । पौनर्भवस्तु पुत्रोऽक्षतायां क्षतायां वा पुनर्भ्वां सवर्णादुत्पन्नः । मात्रा भर्त्रनुज्ञया प्रोषिते प्रेते वा भर्तरि पित्रा वोभाभ्यां वा सवर्णाय यस्य दीयते स तस्य दत्तकः पुत्रः । यथाह मनुः (९।१६८)—'माता पिता वा(४) दद्यातां यमद्भिः पुत्रमा-

(१) स्यौरसान्निकृष्टो घ । (२) रहः अप्रकाशम् । (३) वोढुः कन्यापरिणेतुः ।
(४) वाशब्दान्मात्रभावे पितैव दद्यात् । पित्रभावे मातैव । उभयसत्वे तु उभावपीति मदनः ।

पदि । सदृ(१)शं प्रीतिसयुक्तं स ज्ञेयो दत्रिमः सुतः' ॥ इति । आपद्ग्रहणादनापदि न देयः । दातुरयं प्रतिषेधः । तथा एकपुत्रो न देयः । 'न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा' इति वसिष्ठस्मरणात् । तथाऽनेकपुत्रसद्भावेऽपि ज्येष्ठो न देयः । (मनुः ९।१०६) 'ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः' इति तस्यैव पुत्रकार्यकरणे मुख्यत्वात् । पुत्रप्रतिग्रहप्रकारश्च 'पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि चावेद्य निवेशनमध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसंनिकृष्ट एव प्रतिगृह्णीयात्' इति वसिष्ठेनोक्तः । अदूरबान्धवमित्यत्यन्तदेशभाषाविप्रकृष्टस्य प्र(२)तिषेधः । एवं क्रीतस्वयंदत्तकृत्रिमेष्वपि योजनीयम् । समानन्यायत्वात् ॥ १३० ॥

(मिता०) क्रीतश्चेति । क्रीतस्तु पुत्रस्ताभ्यां मातापितृभ्यां मात्रा पित्रा वा विक्रीतः पूर्ववत् तथैकं पुत्रं ज्येष्ठं च वर्जयित्वा आपदि सवर्ण इत्येव । यत्तु मनुनोक्तम् (९।१७४)—'क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् । स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा' ॥ इति, तद्गुणैः सदृशोऽसदृशो वेति व्याख्येयं न जात्या । 'सजातीयेष्वयं प्रोक्तस्तनयेषु' इत्युपसंहारात् । कृत्रिमः स्यात्स्वयं कृतः कृत्रिमस्तु पुत्रः स्वयं पुत्रार्थिना धनक्षेत्रप्रदर्शनादिप्र(३)लोभनैव पुत्रीकृतो मातापितृविहीनः तत्सद्भावे तत्परतन्त्रत्वात् । दत्तात्मा तु पुत्रो यो मातापितृविहीनस्ताभ्यां त्यक्तो वा तवाहं पुत्रो भवामीति स्वयं द(४)त्तत्वमुपगतः । सहोढजस्तु गर्भे स्थितो गर्भिण्यां परिणीतायां यः परिणीतः स वोढुः पुत्रः ॥ १३१ ॥

(मिता०) उत्सृष्ट इति । अपविद्धो मातापितृभ्यामुत्सृष्टो यो गृह्यते स ग्रहीतुः पुत्रः । सर्वत्र सवर्ण इत्येव ॥

(मिता०) एवं मुख्यामुख्यपुत्राननुक्रम्यैतेषां दायग्रहणे क्रममाह—

पिण्डद इति । एतेषां पूर्वोक्तानां पुत्राणां द्वादशानां पूर्वस्य पूर्वस्याभावे उत्तर उत्तरः श्राद्धदोऽंशहरो धनहरो वेदितव्यः । औरसपौत्रिकेयसमवाये औरसस्यैव धनग्रहणे प्राप्ते मनुरपवादमाह (९।१३४)—'पुत्रिकायां कृतायां तु यदि पुत्रोऽनु जायते । समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः' ॥ इति । तथा अन्येषामपि पूर्वस्मि-

(१) सदृशं कुलगुणादिभिर्न जात्येति मेधातिथिः, सदृशं जात्येति कुल्लूकः।

(२) निषेधः घ । (३) प्रलोभनैः घ । (४) स्वयं दत्त उपनतः ग, घ, ।

न्पूर्वस्मिन्सत्यप्युत्तरेषां पुत्राणां चतुर्थांशभागित्वमुक्तं वसिष्ठेन । तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्येत च(१)तुर्थभागभागी स्याद्दत्तक इति । दत्तकग्रहणं क्रीतकृत्रिमादीनां प्रदर्शनार्थम् । पुत्रीकरणाविशेषात् । तथा च कात्यायनः—'उत्पन्ने त्वौरसे पुत्रे च(२)तुर्थांशहराः सुताः । सवर्णा असवर्णास्तु ग्रासाच्छादनभाजनाः' ॥ इति सवर्णा दत्तकक्षेत्रजादयस्ते सत्यौरसे चतुर्थांशहराः । असवर्णाः कानीनगूढोत्पन्नसहोढजपौनर्भवास्ते त्वौरसे सति न चतुर्थांशहराः किं तु ग्रासाच्छादनभाजनाः । यदपि विष्णुवचनम्—'अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः । पौनर्भवश्च नैवैते पिण्डरिक्थांशभागिनः' ॥ इति । तदप्यौरसे सति चतुर्थांशनिषेधपरमेव । औरसाद्यभावे तु कानीनादीनामपि सकलपित्र्यधनग्रहणमस्त्येव । 'पूर्वाभावे परः परः' इति वचनात् । यदपि मनुवचनम् (९।१६३)—'एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः । शेषाणामानृशंस्यार्थं प्रदद्यात्तु प्रजीवनम्' ॥ इति, तदपि दत्तकादीनामौरसप्रतिकूलत्वे निर्गुणत्वे च वेदितव्यम् । तत्र क्षेत्रजस्य विशेषो दर्शितस्तेनैव (मनुः९।१६४)—'षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् । औरसो विभजन् दायं पित्र्यं पञ्चममेव वा' ॥ इति । प्रतिकूलत्वनिर्गुणत्वसमुच्चये षष्ठमंशम्, एकतरसद्भावे पञ्चममिति विवेक्तव्यम् । यदपि मनुना पुत्राणां षट्कद्वयमुपन्यस्य पूर्वषट्कस्य दायादबान्धवत्वं, उत्तरषट्कस्यादायादबान्धवत्वमुक्तम् (मनु-९।१५९।१६०)—'औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥ कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः' ॥ इति, तदपि स्वपितृसपिण्डसमानोदकानां संनिहितरिक्थहरान्तराभावे पूर्वषट्कस्य तद्रिक्थहरत्वमुत्तरषट्कस्य तु तन्नास्ति । बान्धवत्वं पुनः समानगोत्रत्वेन सपिण्डत्वेन चोदकप्रदानादिकार्यकरत्वं वर्गद्वयस्यापि सममेवेति व्याख्येयम् । (मनुः ९।१४२)—'गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमःसुतः । गो(३)त्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधाम्' ।

(१) चतुर्थांश. ग. घ । (२) तृतीयांशहरा इति तु कल्पतरौ पाठः ।

(३) गोत्रेति । गोत्ररिक्थे अनुगच्छतीति गोत्ररिक्थानुगः प्रायस्तत्समनियत इति यावत् । दत्त्रिमः केवलः द्व्यामुष्यायणे गोत्राद्यनुवृत्तेः । पिण्डः श्राद्धमौर्ध्वदेहिकादीति मेधातिथिकुल्लूकभट्टादयः । पिण्डः सापिण्ड्यं, स्वधौर्ध्वदेहिकश्राद्धादीत्यपरे व्य. म. ।

काशीसंस्कृतसीरीज्-पुस्तकमाला ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परंतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि मूल्यम् ।

१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १) रु० १—८
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । (वेदान्तं १) रु० ८—०
३ वैशेषिकदर्शनम् । पं० श्रीढुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् (वैशेषिकं १) रु० २—८
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । (वैदिकं १) रु० ०—६
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । (व्याकरणं १) रु० ८—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता । (न्यायं १) रु० ६—०
७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । (वेदान्तं २) रु० ०—८
८ अलङ्कारप्रदीपः । पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः । रु० ०—८
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्रं १) रु० ०—१२
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १) रु० २—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम । (कर्मकाण्डम् १) रु० ०—८
१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २) रु० १—४
१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम । (वेदान्तं ३) रु० १—४
१४ कुमारसंभवं महाकाव्यम् । महाकवि-श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं २) रु० १-८

१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-भाषाटीकासहितः । (छंदः १) रु० ०—६

१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटिप्पणा । (न्यायं २) रु० १—०

१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे हरिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यसहितस्नानत्रिकाण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवकण्डिकासूत्रैः यमलजननशान्ति-पृष्टोदिवि-शौच-भोजन—कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्पण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०

१८ संक्षेपशारीरकम्-मधुसूदनीटीकासहितम् संपूर्ण (वेदान्तं४) रु० ८—०

१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनिर्मितिः । (व्याकरणं २) रु० ०—८

२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । (कर्मकाण्डं) रु० १—०

२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् श्रीगन्धर्वराज पुष्पदन्ताचार्यविरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटीका-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषाविम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च समन्वितम् । (स्तोत्रवि० १) रु० १—०

२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायविन्दुः—भाषाटीकासहितः (बौद्धन्याय वि० १) रु० १—८

२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः (व्याकरणं ३) रु० ४—०

२४ न्यायवार्त्तिकतात्पर्य्यटीका-श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण (न्यायविभाग ३) रु० ६—०

२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया सारविवेचिन्या व्याख्यया सहितः (मीमांसा १) रु० २—०

२६ पौरोहित्यकर्मसारः (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमाकान्तशर्मणा संगृहीतः । (कर्मकाण्डवि० ३) रु० ०—४

२७ लघुशब्देन्दुशेखरः म० म० श्रीनागेशभट्टविरचितः । अव्ययीभावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीयकृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः । (व्या०४) रु० ४-८

२८ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् पञ्चसर्गात्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया पं० श्रीकनकलालठक्कुरकृताऽर्थप्रकाशिकाटीकया च समलङ्कृतम् (काव्यवि० ३) रु० ०—१२

९ कामसूत्रम् । श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नरासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम् । बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम् । (काम०२) रु० ८—०

१० न्यायकुसुमाञ्जलीः । न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः । महामहोपाध्यायरुचिदत्तकृतमकरन्दोद्भासितमहामहोपाध्याय वर्द्धमनोपाध्यायप्रणितप्रकाशसाहतः (न्यायं४) रु० ६—०

११ परिभाषेन्दुशेखरः । म० म० श्रीनागेशभट्टरचितः । म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या–तत्त्वप्रकाशिकया टीकया च सहितः । (व्याकरणं ४) रु० ३—०

१२ अर्थसंग्रहः । पूर्वमीमांसासारसंग्रहरूपः । श्रीलौगाक्षिभास्करविरचितः । श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः । (मीमां०२) रु०१—०

१३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनाभाष्योपबृंहणम् । परमर्षिभारद्वाजोद्द्योतकरविरचितम् । महर्षि-गोतमादिचरितसस्खलितबृहत्भूमिकासहितम् । (न्यायं) रु० ६—०

१४ शुक्लयजुर्वेदसंहिता । वाजसनेयिमाध्यन्दिनशाखीया । श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता । (भाग १–२–३–४)(वैदिकं ३) रु० ८—०

१५ शुक्लयजुर्वेदकाण्वसंहिता । श्रीसायणाचार्यविरचितभाष्यसहिता । १ अध्यायादारभ्य २० अध्यायपर्यन्ता । (वैदिकं ४) रु० ६—०

१६ सिद्धान्तलेशसंग्रहः । श्रीमदप्पयदीक्षितविरचितः । श्रीमत्परमहंसपरिव्राज़काचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः । (वेदान्तं ४) रु० ६—०

१७ काशिका । श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः विद्वद्वर–वामन–जयादित्यविनिर्मिता । (व्याकरणं ५) रु० ६—०

१८ प्राकृतप्रकाशः । भामहकृतः । श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः । टिप्पण्या च संयोजितः । (व्याकरणं ६) रु० १—४

१९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः । भाषानुवादसमेतः । (वेदान्तं ५) रु० २—०

२० श्रीनारदीयसंहिता । ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः । (ज्योतिषं २) रु० ०—६

२१ मेदिनीकोशः–मेदिनीकारविरचितः । (कोशं १) रु० १—८

२२ मीमांसादर्शनम् । श्रीशबरस्वामिविरचितभाष्यसहितम् । (भाग१—२) (मीमांसा ३) रु० १०—०

४३ न्यायदर्शनम् । श्रीगोतमसुनीप्रणितम् । श्रीवात्स्यायनमुनीप्र- भाष्यसहितम् । श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविर- तन्यायसूत्रवृत्त्यनुगतम् । टिप्पण्यादिसहितम् (न्यायं ६) रु० ६

४४ दानमयूखः। विद्वद्वरश्रीनीलकण्ठभट्टविरचितः। (धर्मशास्त्रं१) रु० १

४५ कालमाधवः। विद्वद्वरश्रीमाधवाचार्यविरचितः। (धर्मशास्त्रं२) रु० १-

४६ भास्वती। श्रीमच्छतानन्दविरचिता । श्रीमातृप्रसाद (दैवज्ञभूषण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहरण भाषाटीकाभ्यां सहिता । (ज्योतिषं ३। रु० २-

४७ फक्किकाप्रकाशः। उपाध्यायोपाह्ववैयाकरणकेसरीविरुदाङ्कितमणि- लेन्द्रदत्तशर्मविरचितः । पं० सीतारामशर्मकृतटिप्पण्या विभूषितः। (व्याकरणं ७) रु० १

४८ मिताक्षरा। श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या--श्रीमत्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामि- कृता। शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च। (वेदा०६) रु० १

४९ काव्यप्रकाशः । श्रीमम्मटाचार्यविरचितः। पं० श्रीहरिशङ्करशर्मणा मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः। (काव्य०४) रु०४

५० अधिकरणकौमुदी । श्रीदेवनाथठक्कुरकृता। (मीमां० ४) रु० ॥-

५१ रघुवंशमहाकाव्यम्। महाकविश्रीकालिदासविरचितम् महामहोपाध्याय श्रीमल्लिनाथकृतसञ्जीविनीटीकयोपेतम् पं० श्रीकनकलालठक्कुरेण विरचितया भावबोधिनी टिप्पण्या समलङ्कृतम् संपूर्णम्। रु० १

५२ काथबोधः। साजनीकृत टीकोपेतः। दत्तात्रेय सम्प्रदायाऽनुगतः। रु० ।-

५३ रसचन्द्रिका । पर्वतीय-पण्डितप्रवर-श्रीविश्वेश्वरपाण्डेय निर्मिता (काव्य० ६) रु० १-

५४ अलङ्कारमुक्तावली । पर्वतीय-विद्वद्वर-श्रीविश्वेश्वर पाण्डेय- निर्मिता— (अलं० वि० १) रु० ॥

पत्रादिप्रेषणस्थानम्
जयकृष्णदास-हरिदासगुप्तः,
चौखम्बा संस्कृत सीरीज आफीस,
विद्याविलास प्रेस, गोपालमंदिर के उत्तर फाटक
बनारस सिटी ।

Registered with the Registrar of News papers for India under letter No. J. 7 Press 59/60 (Clause 122 of the Postal Guide)

PRINTED BOOK

BOOK-